अन्वयार्थौ–(मनुजः सुदृढैः कृष्णैः नयनच्छेदस्थितैः घनैः सूक्ष्मैः पक्ष्मभिः सौभाग्यं चिरम् आयुः धनेशत्वं च लभते) मनुष्य सुदृढ काले नेत्रोंके छेदोंमें स्थित घने पतले पक्ष्म (बरौनी) से अच्छा भाग्य बहुत कालकी आयु और धनका स्वामी होताहै ॥ २६० ॥

पक्ष्मभिरधमा विरलैः पिङ्गैः स्थूलैर्विवर्णैश्च ।
पक्ष्मततिविरहिताः पुनरगम्यनारीरताः पापाः ॥२६१ ॥

अन्वयार्थौ–(विरलैः पिंगैः स्थूलैः विवर्णैः पक्ष्मभिः अधमा भवन्ति) विरल, पीली, मोटी, बुरी रंगकी बरौनीवाले पुरुष अधम होते हैं और (पुनः पक्ष्मततिविरहिताः पुरुषाः अगम्यनारीरताः पापाः भवंति) फिर बरौनीकीपंक्ति रहित पुरुष जो स्त्री भोगनेयोग्य नहीं तिन स्त्रियोंको भोगनेवाले और पापी होते हैं ॥ २६१ ॥

अनिमेषो रहितः पुरुषः स्यादेकमात्रानिमेषोऽपि ।
नियतं द्विमात्रनिमेषः परजन्माश्रित्य जीवति सः ॥२६२॥

अन्वयार्थौ–(अनिमेषः एकमात्रानिमेषः अपि पुरुषः रहितः स्यात्) थोडे निमेषवाला और एक मात्रामें निमेष लगानेवाला पुरुष इष्टोंसे रहित होता है और (द्विमात्रनिमेषः सः पुरुषः नियतं परजन्माश्रित्य जीवति) दो मात्रामें जितना समय लगे उतने समयमें निमेषवाला पुरुष निश्चय दूसरे मनुष्यके आसरेसे रहै ॥ २६२ ॥

धनिनस्त्रिमात्रानिमेषास्तथा चतुर्मात्रनिमेषवंतोऽपि ।
न तु पंचमात्रनिमेषश्चिरायुषो भोगिनो धनिनः ॥ २६३ ॥

अन्वयार्थौ–(त्रिमात्रानिमेषाः तथा चतुर्मात्रानिमेषवंतः अपि धनिनो भवंति) तीन मात्रामें तथा चार मात्रामें पलक लगानेवाले धनी होते हैं

और (पंचमात्रनिमेषाः चिरायुषः भोगिनः धनिनो न तु भवन्ति) जिसका पांचमात्रामें पलक लगै वह बडी आयुवाले और भोगी धनी नहीं होतेहैं २६३

नयननिमेषैरल्पैर्मध्यैः दीर्घैश्च जायते पुंसाम् ।
आयुः स्वल्पं मध्यं सुदीर्घमथानुपूर्विकया ॥ २६४ ॥

अन्वयार्थौ-(पुंसाम् अल्पैः मध्यैर्दीर्घैः नयननिमेषैः आयुः स्वल्पं मध्यं सुदीर्घं आनुपूर्विकया जायते) जिन पुरुषोंके नेत्र थोडे पलक लगनेवाले हों उनकी आयु थोडी होती है मध्यम हो तो मध्यमायु और जो बहुत देरमें पलक लगनेवाले होयँ उनकी दीर्घ आयु होती है इस क्रमसे आयु जाननी चाहिये ॥ २६४ ॥

जानु प्रदक्षिणीकृत्य यावत् करो घण्टिकामादत्ते ।
तादिदमिह समयमानं मात्राशब्देन निगदति ॥ २६५ ॥

अन्वयार्थौ-(यावत् करः जानु प्रदक्षिणीकृत्य घंटिकाम् आदत्ते, तदिदं समयमानम् इह मात्राशब्देन निगदति) हाथ जितना देरमें जानुतक फिरके गलेकी घैंटिको पकडे उतनेही समयको यहाँ मात्रा कहते हैं ॥ २६५ ॥

मन्दरमन्थानकमथ्यमानजलराशिघोषगंभीरम् ।
बालस्य यस्य रुदितं स महीं महीयान् संपालयति॥२६६॥

अन्वयार्थौ-(यस्य बालस्य रुदितं मंदरमंथानकमथ्यमानजलराशिघो-षगंभीरं स्यात् स महीयान् महीं संपालयति) जिस बालकका रोना मंद-राचल पर्वतसे मथे जाते समुद्रके शब्दके तुल्य गंभीर हो वह महान् पृथ्वीका पालनेवाला होताहै ॥ २६६ ॥

बाष्पाम्बुविनिर्मुक्तं स्निग्धमदीनरोदनं शस्तम् ।
रूक्षं दीनं घघरमश्रु पुनर्दुःखदं पुंसाम् ॥ २६७ ॥

अन्वयार्थौ-(पुंसां विनिर्मुक्तं बाष्पाम्बु स्निग्धम् अदीनरोदनं शस्तम्) पुरुषके छोडे हुए आंसू चिकने गरीबोंकेसे नहीं ऐसा रोनेवाला श्रेष्ठ होता है

और (पुनः रूक्षं दीनं घर्घरम् अश्रु दुःखदं भवति) रूक्षे गरीबीके जिसमें घर्घर शब्दके आंसू निकलें वह दुःखका देनेवाला होताहै ॥ २६७ ॥

बालेन्दुनते वित्तं दीर्घे पृथुलोन्नते श्यामे ।
नासावंशविनिर्गतदले इव भ्रूदले दिशतः ॥ २६८ ॥

अन्वयार्थौ–(बालेन्दुनते दीर्घे पृथुलोन्नते श्यामे नासावंशविनिर्गतदले इव भ्रूदले वित्तं दिशतः) बालचंद्रमासी झुकीहुई, बडी, चौडी, ऊँची काली और नाकके बांसेसे निकली भौंहें बहुत धनको देती है ॥ २६८ ॥

नृणामयुते स्निग्धे मृदुतनुरोमान्विते भ्रुवौ शस्ते ।
हीने स्थूले सूक्ष्मे खरपिङ्गलरोमके न शुभे ॥ २६९ ॥

अन्वयार्थौ–(नृणां भ्रुवौ अयुते स्निग्धे मृदुतनुरोमान्विते शस्ते) मनुष्योंकी भौंहें मिली न होंय चिकनी और नरम छोटे रोमोंसे युक्त होंतो श्रेष्ठ होती हैं और (हीने स्थूले सूक्ष्मे खरपिंगलरोमके न शुभे) हीन, मोटी, छोटी, खरदरी तथा पिंगलवर्णके रोमोंवाली भौंहें शुभ नहीं हैं ॥ २६९ ॥

ह्रस्वान्ता बहुदुःखानामगम्ययोषाजुषां च मध्यनताः ।
स्तोकायुषामतिनता विषमाः खण्डा भ्रुवो दरिद्राणाम् ॥ २७० ॥

अन्वयार्थौ–(बहुदुःखानां पुरुषाणां भ्रुवः खंडा ह्रस्वांता भवंति) बहुत दुःखी पुरुषोंकी भौंहके खंड अर्थात् टूक छोटे छोरवाले होते हैंऔर (अगम्ययोषाजुषां भ्रुवः खंडा मध्यनता भवंति) अगम्य स्त्रियोंके गमन करनेवालोंकी भौंहके टुकडे बीचमें झुके हुए होते हैं और (स्तोकायुषां भ्रुवः खंडा अतिनताः भवंति) थोडी आयुवालोंकी भौंहके खंड बहुत झुके हुए होतेहैं और (दरिद्राणां भ्रुवः खंडाः विषमाः भवंति) दरिद्रियोंकी भौंहके खंड ऊंचे नीचे होतेहैं ॥ २७० ॥

धनवन्तः सुतवन्तः शिखरैः पुरुषाः समुन्नतैर्विशदैः ।
निम्नैः पुनर्भवन्ति द्रव्यसुखापत्यपरिहीनाः ॥ २७१ ॥

अन्वयार्थौ–(पुरुषाः समुन्नतैः विशदैः शिखरैः धनवंतः सुतवन्तो भवन्ति) पुरुष अच्छी और ऊंची भौंहों करिके धन और संतानवाले होतेहैं और

(पुनः निम्नैः शिखरैः द्रव्यसुखापत्यपरिहीनाः भवन्ति) और नीची भौंहोंसे धन, सुख, तथा संतानसे रहित होते हैं ॥ २७१ ॥

परिपूर्णकर्णपाली पिप्पलिकाद्यवयवः सुसंस्थानः ।
लघुविवरो विस्तीर्णः कर्णः प्रायेण भूमिभुजाम् ॥ २७२ ॥

अन्वयार्थौ-(श्लोकेऽस्मिन् क्रमान्वयः) परिपूर्ण हैं कानके अंग जिसमें पिप्पलिकाको आदि अवयव अच्छे सुडौल बनेहुए, छोटे छेदवाले ऐसे बडे कान बहुधा राजाओंके होते हैं ॥ २७१ ॥

आद्यः प्रलम्बकर्णः सुखी स्वभावपीनमृदुकर्णः ।
मतिमान्मूषककर्णश्चमूपतिः शङ्खकर्णः स्यात् ॥ २७३ ॥

अन्वयार्थौ-(प्रलंबकर्णः स्वभावपीनमृदुकर्णः आद्यः सुखी स्यात्) लम्बे कानवाला और स्वभाव करिके नरम तथा मोटे कानोंवाला पहिलीही अवस्थामें सुखी होता है और (मषककर्णः मतिमान् भवेत्) मूसेकेसे कान वाला बुद्धिमान् होता है और (शंखकर्णः चमूपतिः स्यात् शंखकेसे कानों-वाला सेनाका पति अर्थात् स्वामी होता है ॥ २७३ ॥

चिपिटश्रवणैर्भोगी दीर्घायुर्दीर्घरोमभिः श्रवणैः ।
अतिपीनैरतिभोगी श्रवणैर्जननायको भवति ॥ २७४ ॥

अन्वयार्थौ-(चिपिटश्रवणैः भोगी भवति) मनुष्य चिपकेसे कानोंसे भोगी होताहै और (दीर्घरोमभिः श्रवणैः दीर्घायुर्भवति) बडे २ रोमोंवाले कानोंसे बडी आयुवाला होताहै और (अतिपीनश्रवणैः भोगी तथा जन-नायका भवति)बहुत मोटे कानोंसे भोगी और मनुष्योंका स्वामी होताहै २७४

ह्रस्वैर्निःस्वाः कर्णैर्निर्मांसैः पापमृत्यवो ज्ञेयाः ।
व्यालंबिभिः शिरालैः क्रूराः स्युः प्रायशः कुटिलैः॥२७५॥

अन्वयार्थौ-(ह्रस्वैः कर्णैः नराः निःस्वाः भवन्ति) छोटे कानोंसे मनुष्य दरिद्री होते हैं और (तथा निर्मांसैः पापमृत्यवः ज्ञेयाः) मांसरहित कानोंसे

पापसे मरनेवाले होते हैं और (व्यालंबिभिः शिरालैः तथा कुटिलैः कर्णैः प्रायशः कराः स्युः) लम्बे नसीले और कुटिल अर्थात् टेढे कानोंसे बहुधा क्रूर अर्थात् खोटे होते हैं ॥ २७५ ॥

येषां पृथुलाः क्षुद्राः कर्णाः स्युः कर्णशष्कुलीहीनाः ।
स्वल्पायुषो दरिद्रा विलोक्यमाना विरूपास्ते ॥ २७६ ॥

अन्वयार्थौ–(येषां कर्णाः पृथुलास्ते पुरुषाः स्वल्पायुषः स्युः) जिनके कान चौडे होयँ व पुरुष स्वल्पायु होते हैं और (येषां कर्णाः क्षुद्राः ते दरिद्राः भवंति) जिनके कान ओछे होंवे दरिद्री होते हैं और (येषां कर्णशष्कुलीहीनाः ते पुरुषाः विरूपाः विलोक्यमानाः भवंति) बीचकी नसोंसे हीन कानोंवाले पुरुष देखनेमें कुरूप होते हैं ॥ २७६ ॥

विपुलमूर्ध्वमधिकमुन्नतमर्द्धेन्दुसन्निभं राज्यम् ।
प्रदिशत्याचार्यपदं शुक्तिविशालं नृणां भालम् ॥ २७७ ॥

अन्वयार्थौ–(विपुलम् ऊर्द्धम् अधिकम् उन्नतम् अर्द्धेन्दुसंमितं नृणां भाल राज्यं प्रदिशति) मनुष्यका लिलार चौडा ऊंचा और आधे चंद्रमाके आकार होय तो राज्य देनेवाला होता है और (शुक्तिविशाल नृणां भालम् आचार्यपदं प्रदिशति) सीपीकी नाईं चमकदार और बडा मनुष्यका लिलार होय तो आचार्यपदको देनेवाला होता है ॥ २७७ ॥

स्वल्पैर्धर्मपरा धनहीनाः संवृतैस्तथाविषमैः ।
निम्नैः केवलबंधनवधभाजः क्रूरकर्माणः ॥ २७८ ॥

अन्वयार्थौ–(स्वल्पैः भालः धर्मपरणाः भवंति) छोटे लिलारवाले धर्ममें तत्पर होते हैं और (संवृतैः तथा विषमैः भालैः धनहीनाः भवंति) ढके वा औंधे तथा ऊंचे नीचे लिलारवाले धनहीन होते हैं और (निम्नैः भालः केवलबंधनवधभाजः क्रूरकर्माणो भवंति) नीचे लिलारवाले केवल कैद मार इनक पानेवाले और क्रूरकर्म अर्थात् खोटे काम करनेवाले होते हैं ॥ २७८ ॥

भालस्थलस्थिताभिः सुशिराभिरधमाः सदैव पापकराः ।
अभ्युन्नताभिराढ्यास्ताभिरपि स्वस्तिकाकृतिभिः २७९॥

अन्वयार्थौ–(भालस्थलस्थिताभिः सुशिराभिः रेखाभिः अधमाः सदैव पापकराः भवन्ति) लिलारमें स्थित नसों करिके जो रेखा होय तो नीच और सदा पाप करनेवाले होते हैं और (अभ्युन्नताभिः तथा स्वस्तिकाकृतिभिः रेखाभिः अपि ताभिः आढ्याः भवन्ति) ऊंची और सांथियेके आकार उनही लिलारकी नसोंसे जो रेखा होय तो धनवान् अर्थात् धनाढ्य होते हैं ॥ २७९ ॥

रेखाभिर्वर्षशतं पञ्चभिरायुर्ललाटसंस्थाभिः ।
पुरुषाणां स्त्रीणां वा कर्मकरत्वं करोति श्रीः ॥ २८० ॥

अन्वयार्थौ–(ललाटसंस्थाभिः पंचाभिः रेखाभिः पुरुषाणां वा स्त्रीणां वर्षशतम् आयुर्भवति) लिलारमें स्थित जो पाँच रेखा होयँ तो पुरुष वा स्त्रीकी सौवर्षकी आयु होती है और (श्रीः कर्मकरत्वं करोति) लक्ष्मी उनके कामको करनेवाली अर्थात् टहलनी होती है ॥ २८० ॥

भालस्थलस्थितेन स्फुटेन रेखाचतुष्टयेन नृणाम् ।
वर्षाण्यशीतिरायुर्वसुधेशत्वं पुनर्भवति ॥ २८१ ॥

अन्वयार्थौ–(भालस्थलस्थितेन स्फुटेन रेखाचतुष्टयेन नृणाम् अशीतिः वर्षाणि आयुर्भवति) लिलारमें स्थित प्रकट चार रेखा करिके मनुष्यकी अस्सीवर्षकी आयु होती है और (पुनः वसुधेशत्वं भवति) और पृथ्वीका राजा होता है ॥ २८१ ॥

स्यादायुर्लेखाभिस्तिसृभिर्द्वाभ्यामथैकया नियतम् ।
शरदां सप्ततिषष्टिं चत्वारिंशदपि क्रमशः ॥ २८२ ॥

अन्वयार्थौ–(तिसृभिः रेखाभिः शरदां सप्ततिः भवति) तीन रेखा करिके ७० वर्षकी आयु होती है और (द्वाभ्यां रेखाभ्यां षष्टिर्भवति) दो रेखा करिके ६० वर्षकी आयु होती है और (एकया रेखया चत्वा-

रिंशत् अपि क्रमशः नियतम् आयुर्भवति) एक रेखा करिके ४० वर्षकी क्रमसे निश्चय आयु होती है ॥ २८२ ॥

भाले लेखाहीने पंचाधिकविंशतिसमाः ।
आयुः स्याद्ध्रुवमखिलाः जायन्ते संपदः सपदि ॥ २८३ ॥

अन्वयार्थौ–(भाले लेखाहीने सति पंचाधिकविंशतिसमाःआयुःस्यात्) जो रेखारहित लिलार होय तो २५ वर्षकी आयु होय और(ध्रुवम् अखिलाः सपदि संपदो जायन्ते) निश्चय संपूर्ण संपदा शीघ्रही होय ॥ २८३ ॥

यदि वा तिर्यग्दीर्घास्तिस्रो रेखाः शतायुषां भाले ।
भूमिजुषां तु चतस्रः पुनरायुः पंचहीनशतम् ॥ २८४ ॥

अन्वयार्थौ–(यदि वा शतायुषां भाले दीर्घाःतिर्यक् तिस्रः रेखाःभवंति अथवा सौवर्षकी आयुवालोंके लिलारमें बडी तिरछी तीन रेखा होती हैं और (पुनः भूमिजुषां तु चतस्रः पंचहीनशतम् आयुर्भवति) फिर भूमिवालोंके लिलारमें बडी तिरछी चार रेखा होय तो पांच कम सौवर्षकी आयु होती है ॥ २८४ ॥

जीवति वर्षाण्यशीतिः केशान्तोपगते रेखे ।
भालेन वर्षनवतिः पुरुषो रेखाचितेन पुनः ॥ २८५ ॥

अन्वयार्थौ–(यदि केशान्तोपगते रेखे भवतः तर्हि अशीतिः वर्षाणि नरो जीवति) जो दो रेखा केशोंके अंत तक जाँय तो वह पुरुष८०वर्षतक जीवैहै और (पुनः रेखाचितेन भालेन पुरुषः वर्षनवतिर्जीवति) जो फिर अनेक रेखा करिके युक्त लिलार होय तो वह पुरुष९०वर्ष जीवैहै॥ २८५॥

रेखाः सप्ततिरायुः पंचैवाग्रस्थिताः पुनः षष्टिः ।
बह्वयो नृणां शतार्द्धं दशोनमपि भङ्गुरा ददते ॥ २८६ ॥

अन्वयार्थौ–(यदि पंचैव रेखा अग्रस्थिता भवंति तदा सप्ततिर्वा षष्टिरायुर्भवति) जो पांच रेखा आगे स्थित होय तौ ७० अथवा ६० वर्षकी आयु होती है और (नृणां बह्वयः रेखाः शतार्द्धम् आयुः ददते) मनुष्योंके

बहुत रेखा होंय तो) ५० वर्षकी आयु होती है और (यदि भंगुराः पंच-रेखा भवंति तदा दशोनम् अपि शतार्द्धम् आयु वदते) जो वेही पांच रेखा टूटीफूटी होंय तो दश कम पचास अर्थात् ४० वर्षकी आयु होती है॥ २८६॥

भ्रूयुग्मोपगताभिस्त्रिंशद्वर्षाणि जीवति शरीरी ।
विंशत्यब्दानि पुनर्लेखाभिर्वा च वक्राभिः ॥ २८७ ॥

अन्वयार्थौ-(भ्रूयुग्मोपगताभि-रेखाभिः शरीरी त्रिंशद्वर्षाणि जीवति) दोनों भौंहोंके ऊपर जो रेखा होंय तो मनुष्य तीस वर्षतक जीवै है और (पुनःवक्राभिः रेखाभिः विंशत्यब्दानि जीवति) फिर जो वेही टेढी रेखा होंय तो २० वर्ष जीवै है ॥ २८७ ॥

छिन्नाभिरगम्यस्त्रीगामी क्षुद्राभिरपि नरोऽल्पायुः ।
रेखाभिर्मनुजः स्यादित्याह सुमंतविप्रेन्द्रः ॥ २८८ ॥

अन्वयार्थौ-(छिन्नाभिः रेखाभिः अगम्यस्त्रीगामी स्यात्) टूटी फूटा रेखाओंसे मनुष्य अगम्या स्त्रीसे भोग करनेवाला होय और (क्षुद्राभिः अपि रेखाभिः नरः अल्पायुः स्यात्) छोटी रेखाओंसेभी मनुष्य थोडी आयुवाला होताहै और (रेखाभिः एवम् मनुजः स्यात् इति सुमन्तविप्रेन्द आह) सुमन्त नाम ब्राह्मणने मनुष्यकी ऐसी रेखाओंका यह फल कहाहै ॥ २८८॥

श्रीवत्सकार्मुकाद्या यस्य शिरारोमाभिः कृता भाले ।
रेखाभिर्वा नृपतिर्भोगी वा जायते सपदि ॥ २८९ ॥

अन्वयार्थौ-(यस्य भाले श्रीवत्सकार्मुकाद्याः शिरारोमाभिः रेखाभिः कृताः भवंति स नृपतिर्वा भोगी सपदि जायते) जिसके लिलारमें नसों रोमोंकी रेखाओं करिके श्रीवत्स और धनुषको आदि लेकर चिह्न हों सो पुरुष राजा वा भोगी शीघ्रही होती है ॥ २८९ ॥

मस्तकमिभकुम्भनिभं भूमिभुजां मण्डलं गवाद्यानाम् ।
भोगवतां भवति समं क्रमोन्नतं मण्डलज्ञानाम् ॥ २९० ॥

अन्वयार्थौ-(भूमिभुजां मस्तकम् इभकुंभनिभं भवति) राजाओंके मस्तक हाथीके मस्तकके तुल्य होते हैं और (गवाद्यानां मंडलं भवति)

उनके यहां गौ आदिका समूह होता है और (भोगवतां मस्तकं समं भवति) भोगनेवालोंका मस्तक बराबर होता है और (मंडलेशानां मस्तकं क्रमोन्नतं भवति) मंडलेशोंका मस्तक क्रम करिके ऊंचा होता है॥ २९० ॥

विकसच्छत्राकारं यस्य शिरो युवतिकुचनिभं वापि ।
नृपतिः स सार्वभौमो निम्नं वा यस्य स महीशः ॥ २९१ ॥

अन्वयार्थौ—(यस्य शिरः विकसच्छत्राकारं वा युवतिकुचनिभं भवति स सार्वभौमः नृपतिर्भवति) जिसका मस्तक खुलेहुए छातेके आकार वा स्त्रीके कुचके आकार हो वह सर्वभूमिका राजा होता है और (यस्य शिरः निम्नं स महीशो भवति) जिसका मस्तक नीचा होय सो भूमिका राजा होता है ॥ २९१ ॥

विषमो धनहीनानां करोटिकाभश्चिरायुषो मूर्द्धा ।
द्राघिष्ठो दुःखवतां चिपिटो मातृपितृघ्नानाम् ॥ २९२ ॥

अन्वयार्थौ—(धनहीनानां मूर्द्धा विषमो भवति) दरिद्रोंका मस्तक ऊंचानीचा होता है और (चिरायुषः मूर्द्धा करोटिकाभो भवति) बडी आयुवालोंका मस्तक खोपडीके आकार होता और (दुःखवतां मूर्द्धा द्राघिष्ठो भवति) दुःख पानेवालोंका मस्तक बहुतही लम्बा होता है और (मातृपितृघ्नानां मूर्द्धा चिपिटो भवति) माता पिताके मारनेवालोंका मस्तक चिपटासा होताहै ॥ २९२ ॥

धनविरहितो द्विमौलिः पापरतो मीनमौलिरतिदुःखी ।
अधमरुचिर्घटमौलिर्वनतमौलिः सदा निन्द्यः ॥ २९३ ॥

अन्वयार्थौ—(द्विमौलिः धनविरहितः स्यात्) दो मस्तकवाला दरिद्री होता है और (मीनमौलिः पापरतः वा अतिदुःखी स्यात्) मछलीके मस्तकवाला पाप करनेमें चाह रक्खे और बहुत दुःखी होताहै और (घट-मौलिः अधमरुचिः स्यात्) घडेकेसे मस्तकवाला नीचोंमें संगति करनेवाला

होता है और (वननतमौलिः सदा निंद्यः स्यात्) कंठ और झुके हुए मस्तकवाला सदा निन्दनीय होता है ॥ २९३ ॥

अत्रुटिताग्राः स्निग्धा ऋजवो मृदवः समास्तनीयांसः ।
अस्तोकदीर्घबहवस्तरङ्गिणो भूभुजां केशाः ॥ २९४ ॥

अन्वयार्थौ-(अत्रुटिताग्राः स्निग्धाः ऋजवः मृदवः समाः तनीयांसः अस्तोकदीर्घबहवः तरङ्गिणः भूभुजां केशाः भवति) नहीं टूटे हैं शिरे जिनके और चिकने, सीधे, नरम, बराबर, पतले, बहुत लंबे और बहुत छोटे नहीं व बलदार ऐसे बाल राजाओंके होते हैं ॥ २९४ ॥

ऊर्ध्वा रूक्षाः कपिलाः स्थूला विषमाः खरविभिन्नाग्राः ।
अतिह्रस्वदीर्घकुटिला जटिला विरला दरिद्राणाम् ॥ २९५ ॥

अन्वयार्थौ-(ऊर्ध्वाः रूक्षाः कपिलाः स्थूलाः विषमाः खरविभिन्नाग्राः अतिह्रस्वदीर्घकुटिलाः जटिलाः विरलाः दरिद्राणां भवंति) ऊंचे, रूखे, भूरे, ऊंचे नीचे, खरदरे, आगे फटे हुए, बहुत छोटे बहुत बडे, बहुत टेढे, बलदार मिलेहुऐ, जुदे, जुदे ऐसे बाल दरिद्रियोंके होते हैं ॥ २९५ ॥

अङ्गं यद्यपि पुंसां स्त्रीणां वा पिशितविरहितं सूक्ष्मम् ।
परुषं शिरावनद्धं तत्तदनिष्टं परं ज्ञेयम् ॥ २९६ ॥

अन्वयार्थौ-(यद्यपि पुंसाम् अंगं वा स्त्रीणाम् अपि अंगं पिशितविरहितं सूक्ष्मं परुषं शिरावनद्धं तत्तत्परम् अनिष्टं ज्ञेयम्) जिन पुरुषोंका अंग मांस वा स्त्रियोंका अंग मांस रहित, पतला, खरदरा, चमकती हैं नसें जि-समें ऐसा हो तो बुरा है ॥ २९६ ॥

आयुः परीक्षापूर्वं नृणां लक्षणं तदा ज्ञेयम् ।
व्यर्थं लक्षणज्ञानं लोके क्षीणायुषां यस्मात् ॥ २९७ ॥

अन्वयार्थौ-(नृणाम् आयुः परीक्षापूर्वं तदा लक्षणं ज्ञेयम् यस्माल्लोके क्षीणायुषां लक्षणज्ञानं व्यर्थं भवति) मनुष्योंकी आयु परीक्षा पूर्वक होय तो वह लक्षणभी ठीक है जिससे कि लोकमें बहुत कमती आयुवालोंके लक्षण झूठे होते हैं ॥ २९७ ॥

यल्लक्ष्म पुनः शुभमपि करे रेखाप्रभृतिकं च संवदति ।
बाह्याभ्यन्तरमपरं तत्र समुद्रेण निर्दिष्टम् ॥ २९८ ॥

अन्वयार्थौ-(यल्लक्ष्म शुभम् अपि पुनः करे रेखाप्रभृतिकं च पुनः संवदति अपरं लक्षणं बाह्याभ्यंतरं तत्र समुद्रेण निर्दिष्टम्) जो लक्षण शुभभी हैं औरहाथकी रेखाओंका लक्षणभी कहता है तिन दोनोंमें बाहिरी और भीतरी लक्षणोंको औरभी जानने चाहिये यह समुद्रने कहाहै ॥ २९८ ॥

इति महत्तमश्रीनरसिंहात्मजदुर्लभराजविरचिते तिलकापरनाम्नि नरस्त्रीलक्षणशास्त्रे शारीरिकाधिकारः प्रथमः ॥ १ ॥

संहतिसारानूकस्नेहोन्मानप्रमाणमानानि ।
क्षेत्राणि प्रकृतिरथो मिश्रमेतदपि शारीरम् ॥ १ ॥

अन्वयार्थौ-(संहतिसारानूकस्नेहोन्मानप्रमाणमानानि क्षेत्राणि प्रकृतिः अपि एतत् मिश्रं शारीरम्) बनावट जोड बल आचरण प्रीति उँचाई लंबाई चौडाई आकार स्वभाव इनके मिलनेका नाम क्षेत्र और शरीर है॥ १ ॥

यत्र मिथः श्लिष्टत्वं मांसस्नाय्वस्थिसंधिबंधानाम् ।
संहननं संघातः संहतिरिति कथ्यते सद्भिः ॥ २ ॥

अन्वयार्थौ-(यत्र मांसस्नाय्वस्थिसंधिबंधानां मिथः श्लिष्टत्वं संहननं संघातः इति सद्भिः संहतिः कथ्यते) मांस बडी बडी नसें और हाड जोडकी जगह बंधान आपसमें मिलना इसीका न संहनन और संघात है सत्पुरुष इसको संहति कहते हैं ॥ २ ॥

यंत्रारिष्टमिवाङ्गं प्रत्यङ्गं दृश्यते देहे ।
संस्थानेन सुरूपं संहतिर्भवति सा महेच्छ ॥ ३ ॥

अन्वयार्थौ-(देहे यंत्रारिष्टम् इव अङ्गं प्रत्यङ्गं दृश्यते संस्थानेन सुरूपं हे महेच्छ सा संहतिर्भवति) शरीरमें यंत्रकीसी भांति शुभाशुभ

लक्षण अंग अंगमें दीखते हैं सोई बनावट करिके रूप होता है हे महेच्छ अर्थात् महाशय ! सोई संहति होती है ॥ ३ ॥

मांसास्थिसन्धिबन्धो ह्यशिथिलो हि लक्ष्यते यस्य ।
स च संहतिमान्धन्यो दीर्घायुर्जायते नियतम् ॥ ४ ॥

अन्वयार्थों-(यस्य मांसास्थिसन्धिबंधः अशिथिलः लक्ष्यते स संहतिमान् नियतं धन्यः दीर्घायुर्जायते) जिसका मांस,हाड, सन्धि बंधन, ढीले नहीं दीखें सो संहतिमान् ऐसे शरीरवाला निश्चय धन्य और बडी आयुवाला होता है ॥ ४ ॥

संहतिरहितो रूक्षः पिशितविहीनः शिरायुतः शिथिलः ।
स्थूलास्थिसन्निवेशो भवति क्लेशावहः स पुमान् ॥ ५ ॥

अन्वयार्थों-(यः पुरुषः संहतिरहितः रूक्षः पिशितविहीनः शिरायुतः शिथिलः स्थूलास्थिसन्निवेशः स पुमान् क्लेशावहः भवति) जिस पुरुषका शरीर अच्छी बनावटका नहीं होय और रूखा, मांसरहित थोडे (सका, बडा बडी नसें दीखें और ढीला, मोटे हाड होयँ जिसमें सो ऐसा पुरुष दुःख भोगनेवाला होता है ॥ ५ ॥

अथ सारः ।

त्वग्रक्तमांसमेदोऽस्थिमज्जाशुक्राण्यनुक्रमेण नृणाम् ।
साराः सप्त भवेयुः समासतस्तत्फलं ब्रूमः ॥ ६ ॥

अन्वयार्थों-(अनुक्रमेण नृणां सप्त साराः भवेयुः त्वक् रक्त मांस मेदः अस्थि मज्जा शुक्रं समासतः तत्फलं वयं ब्रूमः) क्रमसे मनुष्योंके ७ सार होते हैं, चर्म, रक्त, मांस, चर्बी, हाड मज्जा, वीर्य सो संक्षेपसे उनका फल हम कहते हैं ॥ ६ ॥

स्निग्धत्वचो धनाढ्यास्तनुत्वचः कुबुद्धयो मनुजाः ।
सुभगा मृदुत्वचः स्युः प्रागुक्तात्रित्वचः सुखिनः ॥ ७ ॥

अन्वयार्थौ—(स्निग्धत्वचः मनुजाः बोधनाढ्याः तनुत्वचः मनुजाः कुबुद्धयः, मृदुत्वचः सुभगाः स्युः, प्रागुक्तत्रित्वचः सुखिनो भवन्ति) चिकनी खालवाले मनुष्य ज्ञानवान् होते हैं और पतली खालवाले मनुष्य खोटी बुद्धिके होते हैं और नरम खालवाले सुंदर होते हैं और पहले कहीगई तीन त्वचावाले सुखी होते हैं ॥ ७ ॥

रसनोष्ठदन्तपीठकरांघ्रिगुदतालुलोचनान्तेन ।
रक्तेन रक्तसारा धनतनयस्त्रीसुखोपेताः ॥ ८ ॥

अन्वयार्थौ—(रसनोष्ठदन्तपीठकरांघ्रिगुदतालुलोचनान्तेन रक्तेन मनुजाः रक्तसाराः धनतनयस्त्रीसुखोपेताः भवंति) जीभ, होठ, मसूढे, हाथ, पाँव, गुदा, तालुवा, नेत्रोंके अंत जो ये सात लाल होयँ तो वह पुरुष रक्तसार कहाताहै, वे धन-संतान-स्त्री करिके युक्त सुखी होते हैं ॥ ८ ॥

सर्वाङ्गीणेन चितो यथाप्रदेशं घनेन मांसेन ।
उक्तः स मांससारो विद्याधनरूपपरिकलितः ॥ ९ ॥

अन्वयार्थौ—(यथाप्रदेशं घनेन सर्वाङ्गीणेन मांसेन चितः स मांससारः उक्तः विद्याधनरूपपरिकलितो भवति) जैसा जिस जगह चाहिये वैसे कडे मांस करके जो पुरुष युक्त होय सो मांससार कहाताहै और वह विद्या, धन, रूप इन करिके युक्त होता है ॥ ९ ॥

नखदन्तदृष्टिस्निग्धो मेदस्सारः सुखान्वितः सुतवान् ।
स्थूलास्थिरस्थिसारः कान्तो विद्यां गतः सबलः ॥ १० ॥

अन्वयार्थौ—(नखदन्तदृष्टिस्निग्धः मनुजः मेदस्सारो भवति सुखान्वितः सुतवान् स्यात्) नख, दाँत, दृष्टी यह जिस पुरुषके चिकने होयँ वह मेद सार कहाताहै, वह सुखी और पुत्रवान् होताहै और (स्थूलास्थिरस्थिसारः मनुजः कान्तः विद्यां गतः सबलः स्यात्) मोटे हाडवाला अस्थिसार कहाताहै वह पुरुष विद्यावान् और बलवान् होता है ॥ १० ॥

घनशुक्रोपचययुतः संस्थितियों महाबलः स्निग्धः ।
कथितः स मज्जसारो बहुतनयः स्त्रैणसुखभागी ॥ ११ ॥

अन्वयार्थौ-(यः घनशुक्रोपचययुतः संस्थितिः स्निग्धः महाबलः स मज्जसारः कथितः स एव बहुतनयः स्त्रैणसुखभागी स्यात्) जो बहुत वीर्यके समूहसे स्थित है, जिसकी मज्जा चिकनी बहुत बल करिके युक्त होय, सो मज्जासार कहाता है सो पुरुष बहुत पुत्र और स्त्रियोंके सुखका भोगनेवाला होता है ॥ ११ ॥

यो भवति शुक्रसारो विद्यासौभाग्यरूपपरिकलितः ।
प्रायेण सप्तसारः सर्वोत्कर्षप्रदः पुरुषः ॥ १२ ॥

अन्वयार्थौ (यः पुरुषः शुक्रसारो भवति स विद्यासौभाग्यरूपपरिकलितः स्यात्) जो पुरुषके शुक्रसार अर्थात् वीर्यका बल होय तो विद्या और सौभाग्य रूप करिके युक्त होता है और (यः पुरुषः प्रायेण सप्तसारो भवति सः सर्वोत्कर्षप्रदो भवति) जो पुरुषके बहुत करिके सप्तसार होय तो सब प्रकार करिके अधिकताका देनेवाला होता है ॥ १२ ॥

अथाऽनूकम् ।

पूर्वभवे ह्यनवरतं सत्त्वस्वरूपगतिभिरभ्यस्तम् ।
पुनरिह यदनुक्रियते तदनूकं कथ्यते सद्भिः ॥ १३ ॥

अन्वयार्थौ-(सत्त्वस्वरूपगतिभिः पूर्वभवे अभ्यस्तम् अनवरतम् इह पुनः यत् अनुक्रियते सद्भिः तत् अनूकं कथ्यते) जैसे सत्त्वस्वरूप गति मनुष्योंने पहिले जन्ममें अभ्यास किया था वही इस जन्ममें भी बराबर होय तो उसीके नामको पंडित अनूक कहते हैं ॥ १३ ॥

सिंहव्याघ्रगरुत्मद्वृषभानूका भवन्ति ये मनुजाः ।
अप्रतिहतप्रतापा जितरथास्ते नराधीशाः ॥ १४ ॥

अन्वयार्थौ-(ये मनुजाः सिंहव्याघ्रगरुत्मद्वृषभानूका भवंति ते अप्रतिहतप्रतापा जितरथाः नराधीशाः भवन्ति) जिन मनुष्योंके सिंह-बघेरे-

गरुड-बैलकेसे आचरण होयँ तो नहीं रुका है तेज जिनका और जीते हैं रथी आदि योद्धा जिन्होंने सो ऐसे मनुष्य राजा होते हैं ॥ १४ ॥

वानरमहिषक्रोडच्छगलानूकाः सुखार्त्तसुसहित्ताः ।
रासभकरभानूका धनहीना दुःखिताः प्रायः ॥ १५ ॥

अन्वयार्थौ-(वानरमहिषक्रोडच्छगलानूकाः सुखार्त्ताः सुसहिता भवन्ति तथा रासभकरभानूकाः प्रायः धनहीनाः दुखिताः भवंति) बंदर, भैंसा, सूकर, बकरा इनकेसे आचरणवाले सुख, अर्थ सहित होते हैं और गधा, ऊँट इनकेसे आचरणवाले निश्चय दरिद्री और दुःखी होते हैं ॥ १५ ॥

अथ स्नेहः ।

चित्तप्रसत्तिजननं प्रीणनमिति कथ्यते ध्रुवं स्नेहः ।
तन्मूलमिह ज्ञेयं सुखसौभाग्यादिकं सर्वम् ॥ १६ ॥

अन्वयार्थौ-(चित्तप्रसत्तिजननं प्रीणनं ध्रुवं स्नेहः इति कथ्यते इह तन्मूलं सर्वं सुखसौभाग्यादिकं ज्ञेयम्) चित्तकी प्रसन्नताको उत्पन्न करनेवाला स्नेह है, सो इस लोकमें इससे सकल सुख सौभाग्य आदि प्राप्त होते हैं ॥ १६ ॥

रसनायां दशनेषु त्वचि लोचनयोर्नखेषु केशेषु ।
पुण्यवतां प्रायेण स्नेहोयं षड्विधो ज्ञेयः ॥ १७ ॥

अन्वयार्थौ-(पुण्यवतां रसनायां दशनेषु त्वचि लोचनयोः नखेषु केशेषु प्रायेण अयं स्नेहः षड्विधः ज्ञेयः) पुण्यवानोंके जीभमें, दाँतोंमें, त्वचामें, नेत्रोंमें, नखोंमें, बालोंमें यह स्नेह अर्थात् चिकनाई छः प्रकारसे जानने योग्य है ॥ १७ ॥

प्रियभाषित्वं रसनास्निग्धत्वं सुभोजनं रदाः स्निग्धाः ।
अतिसौख्यं त्वक्स्निग्धा नियतं भुजते भुजिष्योऽपि ॥ १८ ॥

अन्वयार्थौ-(यस्य रसनास्निग्धत्वं स भुजिष्योऽपि नियतं प्रियभाषित्वं भजते) जिसकी जीभ चिकनी हो वह दासभी निश्चय प्रियबोलनेवाला हो

(यस्य रदाः स्निग्धाः स भुजिष्योऽपि नियतं सुभोजनं भजते) जिसके दाँत चिकने हों वह दासभी सुभोजन पाता है और (यस्य त्वक् स्निग्धा स भुजिष्योऽपि नियतम् अतिसौख्यं भजते) जिसकी त्वचा चिकनी हो वह (दासभी) निश्चित अतिसुख पाता है ॥ १८ ॥

जनस्निग्धो नयनस्निग्धः समधिकधनं नखस्निग्धः ।
केशस्निग्धो बहुविधसुगन्धमाल्यं नरो लभते ॥ १९ ॥

अन्वयार्थौ-(नयनस्निग्धः जनस्निग्धः भवति) नेत्रोंमें चिकनाईसे मनुष्योंमें प्रीति करनेवाला होताहै (नखस्निग्धः समधिकधनं लभते) और नखोंमें चिक्कणता होय तो अधिक धनवाला होता है और (केशस्निग्धः नरः बहुविधसुगंधमाल्यं लभते) बालोंमें जिसके चिकनाई होय वह पुरुष अनेक प्रकारकी सुगंधमालाको प्राप्त करता है ॥ १९ ॥

मञ्जिष्ठादीनामिव तुलया यत्तोलनं भवति पुंसाम् ।
उन्मीयतेऽत्र नियतं तदुच्यते सद्भिरुन्मानम् ॥ २० ॥

अन्वयार्थौ-(पुंसां मंजिष्ठादीनाम् इव तुलया यत्तोलनं भवति अत्र नियतं उन्मीयते सद्भिः तत् उन्मानम् उच्यते) मंजीठ आदि चीजोंको जैसे तराजूमें तौलना होता है तैसे ही पुरुषोंका भी उन्मान किया जाता है इस लिये निश्चय बुद्धिमान् पुरुष उसको उन्मान कहते हैं ॥ २० ॥

यो व्यर्द्धभारदेहः स विश्वम्भरेश्वरो भवति ।
भारवपुर्यः पुनरिह जगति स कोटिध्वजो भवति ॥२१॥

अन्वयार्थौ-(यः व्यर्द्धभारदेहः स विश्वम्भरेश्वरो भवति) जिसका शरीर ढाई भार तोलमें हों वह संपूर्ण पृथ्वीका पालनेवाला राजा होय और (पुनः इह भारवपुः यः जगति स कोटिध्वजो भवति) जिस पुरुषका शरीर एक भार तोलमें हो वह करोडपति होता है ॥ २१ ॥

आरार्द्धं यस्याङ्गं स सुखाढ्यो भोगभाजनवान् ।
आरार्द्धार्द्धतनुर्यः स दुर्गतो दुःखितः प्रायः ॥ २२ ॥

अन्वयार्थौ-(यस्य अङ्गं आरार्द्धं सः पुरुषः सुखाढ्यः भोगभाजनवान् भवति) जिसका अंग आधा भार तोलमें होय सो पुरुष सुख और भोगका पानेवाला होय और (यः पुरुषः आरार्द्धार्द्धतनुः प्रायः स दुर्गतः दुःखितः स्यात्) जिस पुरुषका शरीर चौथाई भार तोलमें होय तो निश्चय दरिद्र और दुःख भोगनेवाला होता है ॥ २२ ॥

काष्ठेषु मणिषु वज्रेष्वाकरधातुषु तथान्यवस्तुषु च ।
स्निग्धं यत्तद्गुरु यद्रूक्षं च लघु तद्वदिदम् ॥ २३ ॥

अन्वयार्थौ-(काष्ठेषु मणिषु वज्रेषु आकरधातुषु तथा अन्यवस्तुषु यत् स्निग्धत्वं रूक्षत्वं तद्वत् गुरु च पुनः तत् इदं लघु भवति) काठमें मणिमें हीरामें जितनी खानिकी धातु हैं उनमें वा और वस्तुओंमें जो चिकनाई और रूखापन तैसे इनमें भारीपन और हलकापन सो वह चिकनापन ही जानना चाहिये ॥ २३ ॥

अथ प्रमाणम् ।

आपार्ष्णितलशिरोन्तं यदिह वपुर्मीयते प्रकर्षेण ।
प्रवदन्ति तत्प्रमाणं केप्यायामं पुनः प्राहुः ॥ २४ ॥

अन्वयार्थौ-(आपार्ष्णितलं शिरोन्तं यत् इह वपुः प्रकर्षेण मीयते पुनः केपि तत् प्रमाणम् आयामं प्राहुः प्रवदंति) पाँवके तलवेसे लेकर शिरतक जो यह शरीर तोलकर नापा जाय उसी प्रमाणको कोई आयाम कहतेहैं॥ २४ ॥

शतमष्टाभिः समधिकं ज्येष्ठः स्यान्मध्यमोपि षण्णवतिः ।
चतुरधिकाशीतिरथाङ्गुलानि दैर्घ्यात्पुमानधमः ॥ २५ ॥

अन्वयार्थौ-(यः पुमान् दैर्घ्यात् अंगुलानि अष्टभिः अधिकं शतं स ज्येष्ठः स्यात्) जिस पुरुषकी लम्बाई १०८ अंगुलकी होय सो ज्येष्ठ

अर्थात् उत्तम होता है और (षण्णवतिः दैर्घ्यात् अंगुलानि अपि मध्यमः स्यात्) जिसकी लम्बाई ९६ अंगुलकी होय सो मध्यम अर्थात् बीचका होता है और (चतुरधिकाशीतिःदैर्घ्यात् अंगुलानि अधमः स्यात्) जिसकी लम्बाई ८४ अंगुलकी होय सो अधम अर्थात् नीच होता है ॥ २५ ॥

दैर्घ्या गुल्फोपगता चतुरङ्गुलिका भवेदथो जङ्घा ।
दैर्घ्ये चतुर्विंशतिरथोङ्गुलचतुष्टयं जानु ॥ २६ ॥

अन्वयार्थौ-(गुल्फोपगता दैर्घ्या चतुरङ्गुलिका भवेत् अथो जंघा दैर्घ्ये चतुर्विंशतिर्भवेत् अथो जानु अंगुलचतुष्टयं भवेत्) जिसके टकनेकी लंबाई ४ अंगुल होय और पिंडलीकी लम्बाई २४ अंगुल होय और जानुकी लंबाई ४ अंगुल होती है ॥ २६ ॥

ऊरू जंघातुल्यौ बस्तिः स्याद्द्वादशाङ्गुलायामा ।
तदर्द्धमितं नाभियुतमुदरं च कुचसहितम् ॥ २७ ॥

अन्वयार्थौ-(ऊरू जंघातुल्यौ द्वादशांगुलायामा बस्तिः स्यात् नाभियुतम् उदरं कुचसहितं स्यात्) ऊरू और जंघा बराबर होती हैं और १२ अंगुलकी लम्बी बस्ति कहते हैं और नाभियुक्त उदर कुच सहितकी लंबाई उससे आधी होती है ॥ २७ ॥

चत्वारि ग्रीवा स्याच्चिबुककुचान्तमङ्गुलानि मुखम् ।
द्वादश पुंसां भवतीत्यायामोष्टाधिकं शतकम् ॥ २८ ॥

अन्वयार्थौ-(चत्वारि ग्रीवा स्यात् चिबुककुचान्तं द्वादश अंङ्गुलानि मुखं भवति पुंसाम् अष्टाधिके शतकम् आयामः) गर्दनकी लंबाई चार अंगुलकी और ठोढी कुचके अंतकी लम्बाई१२अंगुलकी मुखसे होती है और पुरुषकी लंबाई १०८ अंगुलकी कहते हैं ॥ २८ ॥

एतदपि मतं केषामष्टोत्तरमुत्तमस्य भवति शतम् ।
मध्यस्याष्टविहीनं ततो दशनो जघन्यस्य ॥ २९ ॥

अन्वयार्थौ-(उत्तमस्य पुरुषस्य अष्टोत्तरं शतम् अंगुलं शरीर मध्यस्य पुरुषस्य अष्टविहीनं जघन्यस्य ततः दशोनम् अंगुलं शरीरम्-एतत् केषाम् अपि मत भवति) उत्तम पुरुषका १०८ अंगुलका शरीर होता है और मध्यम पुरुषका १०० अंगुलका और अधम पुरुषका ९८ अंगुलका शरीर होता है यहभी किसीका मत है ॥ २९ ॥

इदं मतमप्यन्यस्योत्तममुत्तमे नरे भवति ।
मध्ये मध्यं हीने तदपि विहीनं परिज्ञेयम् ॥ ३० ॥

अन्वयार्थौ-(उत्तमे नरे उत्तमम् आयुः मध्यमे नरे मध्यमम् आयुः ततोऽपि हीनं मतमिदमप्यन्यस्य परिज्ञेयम्) उत्तम पुरुषकी १०८ वर्ष और ५ दिनकी आयु [illegible] है और मध्यम पुरुषकी मध्यम आयु होती है-और अधम पुरुषकी अधम आयु होती है यह भी और किसीका मत है ॥ ३० ॥

उत्तममध्यमहीनाः कालक्षे [illegible]नुमानतो ये स्युः ।
निजपर्वाङ्गुलिसंख्या नियतं तेषां विबोद्धव्या ॥ ३१ ॥

अन्वयार्थौ-(कालक्षेत्रानुमानतः ये नराः उत्तममध्यमहीनाः स्युः तेषां निजपर्वांगुलिसंख्या नियतं विबोद्धव्या) समय क्षेत्रके अनुमानसे जो मनुष्य उत्तम मध्यम अधम होते हैं, तिन पुरुषोंकी अपने पोरुओंके अंगुलोंसे गिनती निश्चय जाननी चाहिये ॥ ३१ ॥

रामो दशरथसूनुर्बालिरपि विंशतिशतांगुलौ चैव ।
पूर्वं मानाधिक्याद्द्वावपि पुनरेतौ दुःखितौ तदिह ॥ ३२ ॥

अन्वयार्थौ-(दशरथसूनुः रामः तथा बालिः अपि विंशतिशतांगुलौ बभूवतुः पूर्वं मानाधिक्यात् द्वौ अपि पुनः तत् इह एतौ दुःखितौ जातौ) दशरथका पुत्र राम और राजा बालि ये दोनों १२० अंगुलके पहले मानसे अधिक हुए सोई वे इतने दुःखी हुए ॥ ३२ ॥

अथ मानम् ।

जलभृतकटाहमध्यासीनस्य चतुर्दिशं नरस्य बहिः ।
पतति यदम्बुद्रोणं परिणाहत्वेन तन्मानम् ॥ ३३ ॥

अन्वयार्थौ-(जलभृतकटाहमध्यासीनस्य नरस्य चतुर्दिशं बहिः यत् द्रोणम् अम्बु पतति परिणाहत्वेन तत् मानम्) जलकी भरी हुई कढाईके बीचमें जिस मनुष्यके बैठनेसे चारों ओर बाहरको जो ३२ सेर पानी गिरे उस प्रमाण करिके उसे मान कहते हैं ॥ ३३ ॥

मानोपेतशरीराश्चिरायुषः संपदान्विताः पुरुषाः ।
तद्धीनाधिक्ययुताः पुनर्भजन्ते सदा दुःखम् ॥ ३४ ॥

अन्वयार्थौ-(मानोपेतशरीराः पुरुषाः चिरायुषः संपदान्विताः भवन्ति) मानके शरीर युक्त जो ऐसे पुरुष होयँ वे बडी आयुवाले और संपदायुक्त होते हैं और (पुनः तद्धीनाधिक्ययुताः सदा दुःखं भजन्ते) फिर उससे कमती बढती मानके शरीरवाले होयँ तो सदा दुःखको भजते हैं ३४

यदि वा तिर्यङ्मानं नरस्य पद्मासनोपविष्टस्य ।
जानुयुगलबाह्यपक्षांतराश्रितं सोऽत्र परिणाहः ॥ ३५ ॥

अन्वयार्थौ-(पद्मासनोपविष्टस्य नरस्य यदि वा तिर्यङ्मानं भवति) जो पद्मासन अर्थात् कमलके आसनमें बैठे उस पुरुषके मानको तिर्यङ्मान कहते हैं और (तथा जानुयुगलबाह्यपक्षांतराश्रितं सः अत्र परिणाहः) जो दोनों जानु बाहरको और बगलकोभी रहें तो उस मानका नाम परिणाह है ॥ ३५ ॥

आसनतो भालान्तं शरीरमध्ये तथोपविष्टस्य ।
यन्मानं स्यादूर्ध्वं स चोच्छ्रयः कथ्यते सद्भिः ॥ ३६ ॥

अन्वयार्थौ-(शरीरमध्ये तथोपविष्टस्य आसनतः भालान्तं यन्मानं स्यात् तत् ऊर्ध्वं स सद्भिः उच्छ्रयः कथ्यते) शरीरके बीचमें बैठा जो पुरुष

उसके आसनसे ललाटके अंततक जो प्रमाण है सोई कहिये ऊर्ध्वमान उसीके नामको पंडित उच्छ्रय कहते हैं ॥ ३६ ॥

यस्योच्छ्रयः समः स्यात्परिणाहेनोदितेन भाग्यवशात् ।
नियतं जगति प्रायः स पुमान् पुरुषोत्तमो भवति ॥ ३७ ॥

अन्वयार्थौ–(यस्य उच्छ्रयः भाग्यवशात् उदितेन परिणाहेन समःस्यात् स पुमान् जगति प्रायः नियतं पुरुषोत्तमो भवति) जिस पुरुषका उच्छ्रय-मान भाग्यके वशसे उदित जो परिणाह तिसके बराबर होय सो पुरुष जगत्में बहुधा निश्चय उत्तम पुरुष होता है ॥ ३७ ॥

अंगोपांगानामिह विस्तारायामपरिधिभेदेन ।
मानं यथानुरूपं संक्षेपेण प्रवक्ष्यामि ॥ ३८ ॥

अन्वयार्थौ–(इह अंगोपाङ्गानां विस्तारायामपरिधिभेदेन यथानुरूपं मानं संक्षेपेण प्रवक्ष्यामि) जो इस ग्रंथमें अंग उपांगमें विस्तार, आयाम, परिधि इन तीन भेदों करके जैसेका तैसा मान संक्षेपसे कहता हूं ॥ ३८ ॥

आपार्ष्णिज्येष्ठान्तं तलमत्र चतुर्दशांगुलायामम् ।
विस्तारेण षडंगुलमंगुष्ठो द्व्यंगुलायामः ॥ ३९ ॥

अन्वयार्थौ–(आपार्ष्णितलं ज्येष्ठान्तम् अत्र चतुर्दशांगुलायामं स्यात्) पाँवके तलुवेकी लम्बाई १४ अंगुलकी अंततक होती है और (विस्तारेण षडंगुलं द्व्यंगुलायामः अंगुष्ठः स्यात्) चौडाई ६ अंगुलकी है, और दो अंगुलकी अंगूठे तक होती है ॥ ३९ ॥

पञ्चांगुलपरिणाहः पादान्तं तन्नखांगुलं दैर्घ्यात् ।
अंगुष्ठसमा ज्येष्ठा मध्या तत्षोडशांशोना ॥ ४० ॥

अन्वयार्थौ–(दैर्घ्यात् पादांतं तन्नखांगुलं पंचांगुलपरिणाहः अंगुष्ठ-समा ज्येष्ठा मध्या तत् षोडशांशोना स्यात्) लंबाईसे पावँके अंततक नखोंके अंगुल ५ प्रमाणका होता है और अंगूठेके प्रमाणसे बराबर बडी

अंगुली होती है और बीचकी अंगुलीसे जो प्रमाण कहा उससे १६ वें भाग होती है ॥ ४० ॥

अष्टांशोनानामा कनिष्ठिका षष्ठभागपरिहीना ।
सर्वासामप्यासां नखाः स्वस्वपर्वत्रिभागमिता ॥ ४१ ॥

अन्वयार्थौ-(अनामा अष्टांशोना कनिष्ठिका षष्ठभागपरिहीना सर्वासाम् अप्यासां नखाः स्वस्वपर्वात्रिभागमिताः स्युः) । अनामिका अंगुली ८ वें भागहीन और कनिष्ठिका अंगुली ६ वें भागहीन होय और सब इन अंगुलियोंके नख अपने अपने पोरुवोंसे तीन भाग प्रमाण होते हैं ॥ ४१ ॥

त्र्यंगुलपरिणाहा प्रथमांगुलविस्तृतांगुली भवति ।
अष्टाष्टभागहीनाः शेषाः क्रमशः परिज्ञेयाः ॥ ४२ ॥

अन्वयार्थौ-(प्रथमांगुली त्र्यंगुलपरिणाहा विस्तृतांगुली भवति-शेषाः अंगुलयः क्रमशः अष्टाष्टभागहीनाः परिज्ञेयाः) पहली अंगुलीकी तीन अंगुलके प्रमाण करके लम्बाई होती है और जो बाकी अंगुलोंके क्रमसे हैं वे आठ आठवें भाग हीन होती हैं ॥ ४२ ॥

जंघातः परिणाहो ध्रुवमष्टाधिकदशांगुलानि स्यात् ।
विंशतिरेकोपगतो जानुर्द्वात्रिंशदूरुरपि ॥ ४३ ॥

अन्वयार्थौ-(जंघातः ध्रुवं परिणाहः अष्टाधिकदशांगुलानि स्यात्-विंशतिः एकोपगतः जानुः स्यात् अपि द्वात्रिंशत् ऊरुः भवति) जंघाका प्रमाण १८ अंगुलका है और २१ अंगुलका प्रमाण जानुका होता है और ३२ अंगुलका प्रमाण ऊरुका होता है ॥ ४३ ॥

अष्टादशांगुलमिता विस्तारा जायते कटिः ।
पुंसां नाभेरन्तः परिधिः षट्चत्वारिंशदंगुलतः ॥ ४४ ॥

अन्वयार्थौ-(पुंसां कटिः अष्टादशांगुलमिता विस्तारा जायते तथा नाभेः अंतः परिधिः षट्चत्वारिंशदंगुलतः स्यात्) पुरुषोंकी कमर

प्रमाण १८ अंगुलकी लंबी होतीहै और नाभिसे अंततक प्रमाण ४० अंगुलकी लंबाई होतीहै ॥ ४४ ॥

पुंसां द्वादश कुचयोरभ्यन्तरमंगुलानि दैर्घ्येण ।
उरसि च युगोपनिष्ठात्षडंगुलो भवति कक्षांतः ॥ ४५ ॥

अन्वयार्थौ-(पुंसां दैर्घ्येण कुचयोः अभ्यतरं द्वादश अंगुलानि स्यात्-च पुनः उरसि युगोपनिष्ठात् षडंगुलः कक्षान्तो भवति) पुरुषोंके कुचोंकी लंबाई बीचमें १२ अंगुलके प्रमाणकी होतीहै और हृदयसे दोनों कुचोंकी जगहसे ६ अंगुल प्रमाण कक्षाका अंग होताहै ॥ ४५ ॥

विंशत्युरःस्थलं स्याद्विस्ताराद्अंगुलानि चतुरधिकः ।
पृष्ठया सह परिणाहे षडधिकं पंचाशदंगुलिकम् ॥ ४६ ॥

अन्वयार्थौ-(उरःस्थलं विस्तारात् अंगुलानि चतुरधिकः विंशतिः स्यात्-पृष्ठया सह परिणाहे षट् अधिकं पंचाशदंगुलिकं स्यात्) हृदयके जगहकी लंबाईका प्रमाण २४ अंगुलका होताहै और पीठकी लंबाईका प्रमाण ५६ अंगुलका होताहै ॥ ४६ ॥

पर्व प्रथमं बाह्वोरष्टादशांगुलानि दैर्घ्येण ।
षोडश पुनर्द्वितीयं सप्ततलं मध्यमांगुलिका ॥ ४७ ॥

अन्वयार्थौ-(बाह्वोः प्रथमं पर्व दैर्घ्येण अष्टादशांगुलानि स्यात्-पुनः द्वितीयं षोडश स्यात्-मध्यमांगुलिका सप्ततलं स्यात्) भुजाके पहले खंडकी लंबाई १८ अगुल प्रमाणकी होतीहै और दूसरे खंडकी लंबाई १६ अंगुलकी है बीचकी अंगुलीतक हथेलीकी लंबाई ७ अंगुलकी होतीहै ॥ ४७ ॥

इति समुदायेन भुजः षट्चत्वारिंशदंगुलानि स्यात् ।
पञ्चांगुलविस्तारं पाणितलं शस्तरेखान्तम् ॥ ४८ ॥

अन्वयार्थौ-(इति समुदायेन भुजः षट्चत्वारिंशदंगुलानि स्यात्) इस समुदाय करके भुजा ४६ अंगुलके प्रमाणकी होतीहै और (पाणितलं रेखान्तं पंचांगुलविस्तारं शस्तं स्यात्) हथेलीकी रेखाके अंततक लंबाई ५ अंगुलकी श्रेष्ठ होतीहै ॥ ४८ ॥

मध्यांगुलीविहीना प्रदेशनी भवति पर्वणार्द्धेन ।
तत्समनामानामा कनिष्ठिका पर्वपरिहीना ॥ ४९ ॥

अन्वयार्थौ-(अर्द्धेन पर्वणा मध्यांगुलीविहीना प्रदेशिनी भवति) आधे पोरुवाके प्रमाण बीचकी अंगुलीसे हीन तर्जनी होतीहै और (तत्समनामानामा कनिष्ठिका पर्वपरिहीना भवति) तिसके समान है नाम अनामिका जिसका कनिष्ठिका १ पोरुवा उससे कमती होती है ॥ ४९ ॥

अंगुष्ठस्यायामोंगुलानि चत्वारि जायते पुंसाम् ।
निजपर्वार्द्धपरिमिता भवन्ति सर्वेपि पाणिनखाः ॥ ५० ॥

अन्वयार्थौ-(पुंसाम् अंगुष्ठस्य आयामः चत्वारि चांगुलानि जायते) पुरुषके अँगूठेकी लंबाई ४ अंगुलकी होती है और (सर्वेपि पाणिनखाः निजपर्वार्द्धपरिमिताःभवन्ति) सब हाथके नख अपने पोरुवेके आधे प्रमाणके होते हैं ॥ ५० ॥

ग्रीवायाः परिणाहोऽङ्गुलानि चतुराधिकविंशतिः शस्तः ।
नासापुटद्वयान्तर्विस्तारो द्व्यंगुले मानम् ॥ ५१ ॥

अन्वयार्थौ-(ग्रीवायाः परिणाहः अंगुलानि चतुराधिकाविंशतिः शस्तः स्यात्) गर्दनकी लंबाई चारों ओरसे २४ अंगुलकी श्रेष्ठ होती है और (नासापुटद्वयान्तः द्व्यंगुलं मानं विस्तारो भवति) नाकके नथुने दोनों अंततक २ अंगुल प्रमाणके लंबे होतेहैं ॥ ५१ ॥

आचिबुकपश्चिमकचप्रान्तं द्वात्रिंशदंगुलो मूर्द्धा ।
कर्णद्वयस्य मध्ये पुनरष्टाधिकदशांगुलिकः ॥ ५२ ॥

अन्वयार्थौ- ठोढीसे लेकर पिछले बालोंतक ३२ अंगुल मूर्धा है और दोनो कानोंके बीचमें फिर अठारह अंगुल प्रमाणसे मूर्द्धा है॥५२॥

पुंसामंगे मानं स्पष्टं शिष्टैः पुरा विनिर्दिष्टम् ।
इह पुनरुपयोगाद्वै दिङ्मात्रमिदं मयाप्युक्तम् ॥ ५३ ॥

अन्वयार्थौ-(शिष्टैः पुंसाम् अंगे मानं पुरा स्पष्टं विनिर्दिष्टम् पुनः इह उपयोगात् वै दिङ्मात्रम् इदं मया उक्तम्) श्रेष्ठ पुरुषोंके अंगमान् तो सब

स्पष्ट पहिलेही कहदिया और फिर इस स्थानमें कार्यवशसे निश्चय करके दिशाके दिखाने मात्र यह मैंने वही कहाहै ॥ ५३ ॥

विंशतिवर्षा नारी स पंचविंशतिसमो नरो योग्यः ।
जीवति तुर्यांशो वा मानोन्मानप्रमाणानाम् ॥ ५४ ॥

अन्वयार्थौ-(विंशतिवर्षा नारी स पंचविंशतिसमः नरः योग्यः स्यात्-मानोन्मानप्रमाणानां तुर्यांशः वा जीवति) बीस वर्षकी स्त्रीको पचीस वर्षके समान पुरुष योग्य होताहै-और मान उन्मान प्रमाण इनका चौथा भाग तौभी जीवेगा ॥ ५४ ॥

अथ क्षेत्रकथनम् ।

वर्षाणां शतमायुस्तस्यैवं दश दशा विभागेन ।
क्षेत्राणि दश नराणां तदाश्रितं लक्षणं ज्ञेयम् ॥ ५५ ॥

अन्वयार्थौ-(वर्षाणां शतम् आयुः प्रमाणं तस्य एवं विभागेन दश दशाः नराणां दश क्षेत्राणि तदाश्रितं लक्षणं ज्ञेयम्) सौ वर्षकी आयुका प्रमाण है तिसमें दश भाग करके मनुष्योंकी दश दशा जानना तिसके दश क्षेत्र हैं तिसीके आसरेसे लक्षण जानने चाहिये ॥ ५५ ॥

आद्यं पादौ सगुल्फौ सजानु जंघाद्वयं द्वितीयं स्यात् ।
ऊरू गुह्यं मुष्कद्वितयं क्षेत्रं तृतीयमिदम् ॥ ५६ ॥

अन्वयार्थौ-(सगुल्फौ पादौ आद्यं सजानु जंघाद्वयं द्वितीयं स्यात्-ऊरू गुह्यं मुष्कद्वितयम् इदं तृतीयं क्षेत्रम्) टकने सहित पाँव पहला क्षेत्र है-और जानुसहित दोनों जंघा दूसरा क्षेत्र है और ऊरू गुह्य मुष्क यह तीसरा क्षेत्र है ॥ ५६ ॥

नाभिः कटिश्चतुर्थं पंचममपि जायते पुनर्जठरम् ।
षष्ठं स्तनान्वितमुरः सप्तममंसौ सजत्रुयुगौ ॥ ५७ ॥

अन्वयार्थौ-(नाभिः कटिश्चतुर्थं क्षेत्रम् पुनः जठरं क्षेत्रम् अपि पंचमं जायते स्तनान्वितम् उरः षष्ठं क्षेत्रम् सजत्रुयुगौ अंसौ सप्तमं क्षेत्रम्)

अन्वयार्थौ-(नाभिसे कटिका चौथा क्षेत्र है, फिर उदर पाँचवाँ क्षेत्र है, कुचोंसे छाती तक छठा क्षेत्र है, दोनों हँसली सहित कंधे सातवाँ क्षेत्र है ॥ ५७ ॥

ओष्ठौ ग्रीवाष्टममिह नवमं स्याद्भ्रूयुगं नयनयुगलम् ।
सललाटमुत्तमाङ्गं दशमं लक्षणविदः प्राहुः ॥ ५८ ॥

अन्वयार्थौ-(ओष्ठौ ग्रीवा अष्टमं क्षेत्रम्) होठ और गर्दनका आठवाँ क्षेत्र है (भ्रूयुगं नयनयुगलम् इह नवमं क्षेत्रं स्यात्) दोनों भौंह और दोनों नेत्र इनका नववां क्षेत्र है और (लक्षणविदः सललाटम् उत्तमाङ्गं दशमं क्षेत्रं प्राहुः) लक्षणके जाननेवाले ललाट सहित शिरको दशवां क्षेत्र कहते हैं ॥ ५८ ॥

क्षेत्रवशाज्जायन्ते मनुजानां जगति दश दशाः क्रमशः ।
क्षेत्रेष्वशुभेष्वशुभा दशाः शुभेषु च शुभाः प्रायः ॥ ५९ ॥

अन्वयार्थौ-(मनुजानां क्षेत्रवशात् जगति दश दशाः क्रमशः जायन्ते) मनुष्योंके क्षेत्रके वशसे जगत्में १० दशा क्रमसे होती हैं और (क्षेत्रेषु अशुभेषु अशुभाः दशा भवंति) जो क्षेत्र अशुभ हैं वह दशाभी अशुभ होती हैं और (क्षेत्रेषु च पुनः शुभाः प्रायः दशा भवंति) जो क्षेत्र शुभ हैं वह बहुधा दशाभी शुभ होती हैं ॥ ५९ ॥

बाल्यं वृद्धिरथ बलं धीत्वक्शुक्रविक्रमाः पुंसाम् ।
दशकेन निवर्त्तन्ते चेतः कर्मेन्द्रियाणि तथा ॥ ६० ॥

अन्वयार्थौ-(बाल्यं वृद्धिः अथ बलं धीत्वक्शुक्रविक्रमाः तथा चेतः कर्मेन्द्रियाणि पुंसां दशकेन निवर्तन्ते) बाल्यावस्था १ और वृद्धि बढ-वारी २ और बल ३ बुद्धि ४ त्वचा ५ वीर्य ६ पराक्रम ७ चित्त ८ कर्म ९ इंद्रिय १० पुरुषोंकी १० दशाही करके वरते हैं ॥ ६० ॥

अथ प्रकृतिकथनम् ।

क्षितिजलशिखिपवनांबरसुरनररक्षःपिशाचतिर्यग्भिः ।
तुल्या प्रकृतिः पुंसां क्रमेण तल्लक्षणं ब्रूमः ॥ ६१ ॥

अन्वयार्थौ-(पुंसां क्षितिजलशिखिपवनांबरसुरनररक्षःपिशाचतिर्यग्भिः तुल्या प्रकृतिः क्रमेण तल्लक्षणं वयं ब्रूमः) पुरुषोंके पृथ्वी १ जल २ अग्नि ३ पवन ४ आकाश ५ देवता ६ मनुष्य ७ राक्षस ८ प्रेत ९ चतुष्पद १० इनकेसे स्वभाव क्रम करके जो होय तिनके लक्षण हम कहतेहैं ॥ ६१ ॥

सुरभिः प्रसूनगन्धः सुखवान्भोगी स्थिरः क्षितिप्रकृतिः ।
प्रियवाग्घनाम्बुपायी नीरप्रकृतिनरो रसभुक् ॥ ६२ ॥

अन्वयार्था-(सुरभिः प्रसूनगंधः सुखवान् भोगी स्थिरः क्षितिप्रकृतिः भवति) चंदन और फूलोंकीसी गंधवाला-सुखवाला-भोगनेवाला-स्थिरता-वाला जिसमें ये लक्षण पायेजाँय जिसकी पृथ्वीकीसी प्रकृति होती है और (प्रियवाक् घनाम्बुपायी रसभुक् नीरप्रकृतिः नरो भवति) मीठी बोली बहुत जलका पीनेवाला-रसोंका खानेवाला ऐसे मनुष्यकी जलकीसी प्रकृति होती है ॥ ६२ ॥

चपलः खण्डस्तीक्ष्णः क्षुद्वान् घनभोजनः शिखिप्रकृतिः ।
चटुलः क्षामः क्षिप्रः सकोपनः स्यान्मरुत्प्रकृतिः॥ ६३॥

अन्वयार्था-(चपलः खण्डः तीक्ष्णः क्षुद्वान् घनभोजनः शिखिप्रकृतिर्भवति) चंचल-मीठा-तेज-बहुत भूँखा-बहुत भोजन करनेवाला इनकी अग्निकीसी प्रकृति होतीहै और (चटुलः क्षामः क्षिप्रः सकोपनः मरुत्प्रकृतिर्भवति) चलायमान दुर्बल-शीघ्र क्रोधरहित ये पवनप्रकृतिके होते हैं ॥ ६३ ॥

विद्वान्सुस्वरकुशलो विवृताक्षः शिक्षितोम्बरप्रकृतिः ।
त्यागरतिः सुस्नेहः सुस्वभावेन पृथुकोपः ॥ ६४ ॥

अन्वयार्थौ-(विद्वान् सुस्वरः कुशलः विवृताक्षः शिक्षितः अंबरप्रकृतिः भवति) पंडित होय-अच्छी वाणी-कुशल खुली आँखे-पढाहुवा जिसने

शिक्षा पाई, ये आकाशप्रकृतिवाले होते हैं और (सुरस्वभावेन त्यागरतिः सस्नेहः पृथुकोपः भवति) देवताकीसी प्रकृतिवाला दानके प्रति, प्रीति-सहित बहुत क्रोध करनेवाला होता है ॥ ६४ ॥

भूषणगीतप्रवणो नरः स्वभावेन संविभागी स्यात् ।
दुर्जनचेष्टः पापो रक्षःप्रकृतिः खरक्रोधः ॥ ६५ ॥

अन्वयार्थौ–(नरः स्वभावेन भूषणगीतप्रवणः संविभागी स्यात्) मनुष्यकीसी प्रकृतिवाला, भूषण पहरनेवाला, गानेमें कुशल, विभाग करनेवाला होता है और (रक्षःप्रकृतिः नरः दुर्जनचेष्टः पापः खरक्रोधः स्यात्) राक्षस प्रकृतिवाला मनुष्य, खोटी चेष्टावाला, पाप करनेवाला, बडा क्रोध करनेवाला होता है ॥ ६५ ॥

भवति पिशाचप्रकृतिः स्थूलो मलिनश्चलः प्रलापी च ।
क्षुद्रानुगतस्तिर्यक्प्रकृतिर्बहुभुग्भवेन्मनुजः ॥ ६६ ॥

अन्वयार्थौ–(पिशाचप्रकृतिः स्थूलः मलिनः चलः च पुनः प्रलापी भवति) प्रेतकी प्रकृतिवाला मोटा-मलीन-चलायमान-और बकवादी होता है और (तिर्यक्प्रकृतिः क्षुद्रानुगतः बहुभुक् मनुजः भवेत्) चौपायोंकीसी प्रकृतिवाला-नीचोंकी संगतिवाला-बहुत खानेवाला- पुरुष होता है॥ ६६॥

इति दशविधा नराणां निर्दिष्टाः प्रकृतयो यथा दृष्टाः ।
किञ्चिन्मिश्रकलक्षणमधुना वक्ष्याम्यतो लोके ॥ ६७ ॥

अन्वयार्थौ–(नराणाम् इति दशविधाः प्रकृतयः यथा दृष्टा निर्दिष्टाः) मनुष्योंकी यह १० प्रकारकी प्रकृति जैसी देखनेमें आई तैसी कही और (अतः परं लोके किंचित् मिश्रकलक्षणम् अधुना वक्ष्यामि) इससे आगे लोकमें कुछ मिश्रक लक्षण अब कहूँगा ॥ ६७ ॥

अथ मिश्रकलक्षणम् ।

विभवसमृद्धिपरत्वं व्यंजनलाभः प्रभुत्वमव्याजम् ।
वयसि भवन्ति प्रथमे प्रायः स्वल्पायुषां पुंसाम् ॥ ६८ ॥

अन्वयार्थौ--(स्वल्पायुषां पुंसां प्रथमे वयसि प्रायः एतानि भवन्ति) थोडी आयुवाले पुरुषोंकी पहिली अवस्थामें बहुधा इतने कार्य होते हैं(विभवसमृद्धिपरत्वं व्यंजनलाभः अव्याजं प्रभुत्वम्) ऐश्वर्यता-ठाटबाटमें तत्पर अनेक प्रकारके भोजनोंका लाभ-छलरहित-मालिकपन होता है ॥ ६८ ॥

अङ्गानि धीपटुत्वं शक्तिर्दशनाः शनैर्विशीर्यंते ।
निखिलेन्द्रियाणि येषां चिरायुषस्ते नरा ज्ञेयाः ॥ ६९ ॥

अन्वयार्थौ--(येषाम् अंगानि सुंदराणि धीपटुत्वं शक्तिः दशनाः शनैर्विशीर्यन्ते निखिलेन्द्रियाणि पूर्णानि ते मनुजाः चिरायुषो ज्ञेयाः) जिनके अंग तो सुंदर और बुद्धिकी चतुरता-पराक्रम-दाँत धीरे धीरे उखड जायँ संपूर्ण इंद्रिय पूरी होयँ वे मनुष्य बडी आयुवाले होते हैं ॥ ६९ ॥

शुभलक्षणमङ्गेभ्यः सौन्दर्येणाधिकं सुखं यस्य ।
स्वज्ञातिप्राधान्यं प्राप्नोति स धान्यधनवत्त्वम् ॥ ७० ॥

अन्वयार्थौ--(यस्य अंगेभ्यः शुभलक्षणं सौंदर्येण अधिकं सुखं स्वज्ञातिप्राधान्यं सः पुरुषः धान्यधनवत्त्वं प्राप्नोति) जिसके अंग शुभलक्षणयुक्त होंय-और सुंदरताके योग्य अधिक सुख होय अपनी जातिमें प्रधान होय सो पुरुष धनधान्यवान् होता है उसीको धन धान्य मिलता है ॥ ७० ॥

अतिकृष्णेष्वतिगौरेष्वतिपीनेष्वतिकृशेषु मनुजेषु ।
अतिदीर्घेष्वतिलघुषु प्रायेण न विद्यते सत्यम् ॥ ७१ ॥

अन्वयार्थौ--(अतिकृष्णेषु अतिगौरेषु अतिपीनेषु अतिकृशेषु अतिदीर्घेषु अतिलघुषु-मनुजेषु प्रायेण सत्यं न विद्यते) बहुत काले, बहुत गोरे, बहुत मोटे, बहुत दुबले, बहुत लंबे, बहुत छोटे ऐसे मनुष्य बहुधा सच्चे नहीं होते हैं ॥ ७१ ॥

चपलः स्थूलो रूक्षः पुरुषो घनमांसलः शिरोविचितः ।
स पुमान्वैतरणाख्यस्समुद्रमपि शोषयत्यखिलम् ॥ ७२ ॥

अन्वयार्थौ--(यः पुरुषः चपलः स्थूलः रूक्षः घनमांसलः शिरोविचितः सः पुमान् वैतरणाख्यः अखिलं समुद्रमपि शोषयति) जो पुरुष

चंचल, मोटा, रूखा बहुत मांसवाला, दृढशिरका है वह वैतरण कहाता है जो सब समुद्रको भी सोखनेवाला होता है ॥ ७२ ॥

यस्य शरीरं पुष्टिं गृह्णात्यन्नेन येनकेनापि ।
स नरो ढुंढुबकाख्यः कलयति कल्याणवैराग्यम् ॥ ७३ ॥

अन्वयार्थौ-(यस्य शरीरं पुष्टिम् अन्नेन येनकेनापि गृह्णाति स नरः ढुंढुबकाख्यः कल्याणवैराग्यं कलयति) जिसका शरीर मोटापन जिस किसी अन्न करके पकडे सो वह पुरुष ढुंढुबक नाम है कल्याण और वैराग्यको करता है ॥ ७३ ॥

सत्त्वं रजस्तमश्चेत्यमी नराणां त्रयो भवंति गुणाः ।
क्वचिदेकः कुत्र द्वौ त्रयः समं क्वापि दृश्यन्ते ॥ ७४ ॥

अन्वयार्थौ-(सत्त्वं रजः तमः इति अमी नराणां त्रयो गुणाः भवंति) सत्त्वगुण, रजोगुण, तमोगुण ये पुरुषोंके तीन गुण होते हैं और (क्वचित् एकः कुत्र द्वौ त्रयः समं क्वापि दृश्यन्ते) कहीं एक, कहीं दो और कहीं तीनों बराबर दीख पडते हैं ॥ ७४ ॥

यः सत्त्वगुणोपेतः स दयालुः सत्यवाक् स्थिरः सरलः ।
देवगुरुभक्तियुक्तो व्यसनेऽभ्युदये च कृतधैर्यः ॥ ७५ ॥

अन्वयार्थौ-(यः सत्त्वगुणोपेतः स दयालुः सत्यवाक् स्थिरः सरलः देवगुरुभक्तियुक्तः व्यसने अभ्युदये च कृतधैर्यो भवति) जो सत्त्वगुणवाला पुरुष है सो दयावान् और सत्य बोलनेवाला स्थिरतायुक्त सीधा देवता और गुरुकी भक्तिवाला, दुःख और आनंदमें धीरज धरनेवाला होता है ७५

काव्यकलासु प्रवणः कुलनारीकृतरतिस्सदा शूरः ।
प्रायेणैवं सततं रजोधिकः कथ्यते स पुमान् ॥ ७६ ॥

अन्वयार्थौ-(काव्यकलासु प्रवणः कुलनारीकृतरतिः सदा शूरः रजोधिकः स पुमान् सततं कथ्यते प्रायेण एवं भवति) काव्य बनानेमें चतुर

और कुलकी स्त्रीसे रति और प्रीति करनेवाला सदा शूरवीर रजोगुण जिसमें अधिक-सो पुरुष निरन्तर बहुधा ऐसा होता है ॥ ७६ ॥

मूर्खस्तमोऽन्वितः स्यान्निद्रां कुर्वंश्च सालसः क्रोधी ।
एतैर्मिश्रैर्बहुशो भेदाश्चान्यैर्नृणां मिश्राः ॥ ७७ ॥

अन्वयार्थौ-(तमोऽन्वितः पुरुषः मूर्खः निद्रां कुर्वन् सालसः क्रोधी स्यात्) तमोगुणयुक्त पुरुष मूर्ख और निद्रा करनेवाला और आलसी और क्रोधी होता है और (नृणाम् एतैर्मिश्रैः बहुशः अन्येऽपि मिश्राः भेदाः भवन्ति) पुरुषोंके यही मिले हुए बहुधा और अनेक भेद होते हैं ॥ ७७ ॥

प्रायो रजोगुणः स्यात्प्राप्तोत्कर्षस्तमोगुणः कोपः ।
पुंसां विशेषः पुराख्यास्यामो ह्यग्रतः सत्त्वम् ॥ ७८ ॥

अन्वयार्थौ-(तमोगुणः प्राप्तोत्कर्षः रजोगुणः प्रायः कोपः स्यात्) तमोगुणकी है अधिकता जिसमें ऐसा रजोगुण बहुधा कोपको प्राप्त होता है और (पुंसाम् अग्रतः विशेषः सत्त्वं पुराख्यास्यामः) पुरुषोंके आगे अधिक सत्त्वगुण पहिले कहेंगे ॥ ७८ ॥

देहस्थितेषु सततमशुभेषु शुभेषु लक्षणेषु नृणाम् ।
ज्ञात्वानवरतभावं तत्फलमपि निर्दिशेत्प्राज्ञः ॥ ७९ ॥

अन्वयार्थौ-(नृणां देहस्थितेषु अशुभेषु वा शुभेषु लक्षणेषु सततम् अनवरतभावं ज्ञात्वा प्राज्ञः तत्फलम् अपि निर्दिशेत्) मनुष्योंके देहमें स्थित जो है अशुभ वा शुभ लक्षण इनमेंसे निरंतर भाव जान करके पंडित उसका फल कहते हैं ॥ ७९ ॥

बुद्धियुतो यो दीर्घो ह्रस्वो यो जायते नरो मूर्खः ।
पिङ्गः शुचिः सुशीलः कालाक्षो यस्तदाश्चर्यम् ॥ ८० ॥

अन्वयार्थौ-(यः दीर्घः बुद्धियुतो भवति) जो लंबा है सो बुद्धियुक्त होता है और (यः ह्रस्वः नरः स मूर्खो जायते) जो छोटा पुरुष है सो मूर्ख होता है और (यः पिङ्गः कालाक्षः शुचिः सुशीलः तत् आश्चर्यम्) जो कुछ

पीली वा काली आँखोंवाला पवित्र और शीलवान् होता है यह बडे आश्चर्यकी बात है ॥ ८० ॥

यद्दन्तुरोऽपि मूर्खो रोमयुतो जायते यदल्पायुः ।
यन्निष्ठुरः स दीर्घस्तदद्भुतं जृम्भते भुवने ॥ ८१ ॥

अन्वयार्थौ-(यत् दन्तुरः अपि मूर्खः) जिसके बडे दाँत हैं वह मूर्ख होय और (रोमयुतः यत् अल्पायुः जायते) रोम युक्त है उसकी थोडी आयु होय और (यत् दीर्घः स निष्ठुरः) जो लंबा है सो निर्दय होय और (भुवने तत् अद्भुतं जृंभते) जगतमें यह बडे अचरजकी बात है-अर्थात् बडे दांतवाला तौ विद्यावान् होना चाहिये और रोमवाला बडी आयुवाला होना चाहिये और जो लंबा है उसे दयावान् होना चाहिये और इससे विपरीत होय तो आश्चर्य करना चाहिये ॥ ८१ ॥

न च दुर्भगः सुनेत्रः सुग्रीवो भारवाहको न स्यात् ।
रूक्षो नास्ति सुभोगी परुषत्वङ् नास्ति सुखसहितः॥८२॥

अन्वयार्थौ-(सुनेत्रः दुर्भगो न स्यात्) सुंदर नेत्रवाला कुरूप नहीं होता और (सुग्रीवः भारवाहकः न स्यात्) सुंदर गर्दनवाला बोझ ढोने-वाला नहीं होता और (रूक्षः सुभोगी नास्ति) जो रूखा है सो सुंदर भोगवाला नहीं होता और (परुषत्वक् सुखसहितो नास्ति) कठोर त्वचा-वाला सुख पानेवाला नहीं होता ॥ ८२ ॥

पृथुपाणिः पृथुपादः पृथुकर्णः पृथुशिराः पृथुस्कन्धः ।
पृथुवक्षाः पृथुजठरः पृथुभालः पूजितः पुरुषः ॥ ८३ ॥

अन्वयार्थौ-अस्मिन् श्लोके क्रमान्वयः-बडे हाथ, बडे पांव, बडे कान, बडा मस्तक, बडे कंधे बडी छाती, बडा पेट, बडे ललाटवाले ऐसे पुरुष पूजितं अर्थात् पूजनेयोग्य होते हैं ॥ ८३ ॥

रक्ताक्षं भजति श्रीः प्रलम्बबाहुं भजत्यधीशत्वम् ।
पीनाङ्गं भजति कृषिर्मांसोपचितं च भजति सौभाग्यम्॥८४॥

अन्वयार्थौ-(रक्ताक्षं श्रीः भजति) लाल नेत्रवालेको श्री सेवन करती है और (अधीशत्वं प्रलंबबाहुं भजति) मालिकपना लंबी बाहुवालेको भजता है और (कृषिः पीनाङ्गं भजति) खेती मोटे शरीरवालेको भजती है और (सौभाग्यं मांसोपचितं भजति) अच्छा भाग्य मांसल पुरुषको भजै है अर्थात् होता है ॥ ८४ ॥

सुश्लिष्टसंधिबन्धो यः कश्चिन्मांसलो मृदुः स्निग्धः ।
अतिसुन्दरः प्रकृत्या स सुखाढ्यो जायते प्रायः॥८५॥

अन्वयार्थौ-(यः कश्चित् सुश्लिष्टसंधिबंधः मांसलः मृदुः स्निग्धः प्रकृत्या अतिसुन्दरः प्रायः स सुखाढ्यो जायते) जिस किसी पुरुषके अच्छे मिलेहुए जोड मांससे भरे, कोमल, चिकने बहुत अच्छे स्वभाववाले हों वह बहुधा सुखी होता है ॥ ८५ ॥

स्निग्धतिलो मशकं वा चिह्नं वा भवति किमपि चान्यत् ।
पुंसां दक्षिणभागे तच्छुभमित्याह भोजनृपः ॥ ८६ ॥

अन्वयार्थौ-(स्निग्धः तिलः मशकं वा किमपि अन्यत् चिह्नं पुंसां दक्षिणभागे भवति) अच्छा तिल मस्सा वा कोई और चिह्न पुरुषके दाहिने भागमें होय तो (तत् शुभम् इति भोजनृपः आह) वह शुभ है यह राजा भोजने कहा है ॥ ८६ ॥

नखशङ्खकेशरोमजिह्वालोचनास्यरदनेषु ।
नास्ति स्नेहो येषामकारणं सत्त्वमिह तेषाम् ॥ ८७ ॥

अन्वयार्थौ-(येषां नखशंखकेशरोमजिह्वालोचनास्यरदनेषु स्नेहः नास्ति) जिसके नख शंख अर्थात् कनपटी बाल रोंगटे-जीभ-नेत्र-मुख-दांत इनमें सचिक्कणता नहीं होय तो (इह तेषाम् अकारणं सत्त्वम्) इस लोकमें तिनके विना कारणका पराक्रम होता है ॥ ८७ ॥

इह भवति सप्तरक्तः षडुन्नतः पञ्चसूक्ष्मदीर्घो यः ।
त्रिविपुललघुगंभीरो द्वात्रिंशल्लक्षणः स पुमान् ॥ ८८ ॥

अन्वयार्थौ–(इह सप्तरक्तः षडुन्नतः पंचसूक्ष्मः यः दीर्घः त्रिविपुललघुगंभीरः सः पुमान् द्वात्रिंशल्लक्षणो भवति) इस लोकमें ७ तौ लाल-६ ऊंचे-५ पतले-५ लंबे-३ चौडे-३ छोटे-३ गहरे सो पुरुष ३२ लक्षणोंका होता है ॥ ८८ ॥

नखचरणपाणिरसनादशनच्छदताल्लुलोचनान्तेषु ।
स्याद्यो रक्तः सततु सप्ताङ्गां स लभते लक्ष्मीम् ॥ ८९ ॥

अन्वयार्थौ–(यः नखचरणपाणिरसनादशनच्छदताल्लुलोचनान्तेषु सततु रक्तः स्यात्-स च सप्ताङ्गां लक्ष्मीं लभते) जो नख चरण-हाथ-जीभ-होठ-तालु-नेत्रोंके अंत इन सात अंगोंमें ललाई होय तौ लक्ष्मीको प्राप्त होता है ॥ ८९ ॥

षट्कं कक्षावक्षःकृकाटिका नासिकानखास्यमिति ।
यस्येदमुन्नतं स्यादुन्नतयस्तस्य जायन्ते ॥ ९० ॥

अन्वयार्थौ–(यस्य इदं षट्कम् कक्षा वक्षः ककाटिका नासिका नखाः आस्यम् इति उन्नतं भवति तस्य उन्नतयः जायन्ते) जिस पुरुषकी बगल, छाती, गर्दनकी घेंटी, नाक, नख, मुख येह अंग ऊंचे होंय तिसको उच्चपद अर्थात् बढवारी प्राप्त होती है ॥ ९० ॥

दन्तत्वक्केशाङ्गुलिपर्वनखं चेति पञ्च सूक्ष्माणि ।
धनलक्षणैरुपेता भवन्ति ते प्रायशः पुरुषाः ॥ ९१ ॥

अन्वयार्थौ–(येषां पुरुषाणां दंतत्वक्केशांगुलिपर्वनखाः एतानि पंच सूक्ष्माणि ते पुरुषाः प्रायशः धनलक्षणैः उपेताः भवन्ति) जिन पुरुषोंके दाँत-त्वचा-बाल-अंगुलियोंके पोरुवे और नख ये पाँच पतले होंय तौ वे पुरुष बहुधा धनलक्षणयुक्त होते हैं अर्थात् धनवान् होते हैं ॥ ९१ ॥

नयनकुचौ रसनाहनुभुजमिति यस्य पञ्चकं दीर्घम् ।
दीर्घायुर्वित्तकरः पराक्रमी जायते स नरः ॥ ९२ ॥

अन्वयार्थौ–(यस्य इति पंचकं दीर्घं नयने कुचौ रसना हनु भुजं स नरः पराक्रमी वित्तकरः दीर्घायुर्जायते) जिसके ये पाँच अंग बडे होंय नेत्र चूची जीभ कपोलोंके हाड और भुजा सो मनुष्य बलवान् धनवान् बडी आयुवाला होता है ॥ ९२ ॥

भालमुरोवदनमिति त्रितयं भूमीश्वरस्य विपुलं स्यात् ।
ग्रीवाजङ्घामेहनमिति त्रिकं लघु महीशस्य ॥ ९३ ॥

अन्वयार्थौ–(भूमीश्वरस्य एतत्त्रितयं भालम् उरः वदनम् इति विपुलं स्यात्) राजाके ये तीन-ललाट १ छाती २ मुख ३ चौडे होते हैं और (महीशस्य एतत् त्रयं ग्रीवा जंघा मेहनम् इति लघु स्यात्) राजाकी ये तीन गर्दन जाँघ इंद्री आदि छोटी होती हैं ॥ ९३ ॥

यस्य स्वरोऽथ नाभिः सत्त्वमिदं च त्रयं गभीरं स्यात् ।
सप्ताम्बुधिकांच्या हि भूमेः स करग्रहं कुरुते ॥ ९४ ॥

अन्वयार्थौ–(यस्य स्वरः अथ नाभिः सत्त्वम् इदं त्रयं गभीरं स्यात्) जिसका शब्द टूंटी पराक्रम ये तीन गहरे होंय तौ (स सप्ताम्बुधिकांच्याः भूमेः करग्रहं कुरुते) सो ७ समुद्र हैं कांची क्षुद्रघंटिका जिसके अर्थात् कटिबंधिनी पृथ्वीको व्याहता है अर्थात् पृथ्वीका मालिक होता है ॥ ९४ ॥

स्मरशास्त्रविनिर्दिष्टाः शशो वृषो हय इति त्रयो भेदाः ।
जायन्ते मनुजानां क्रमेण तल्लक्षणं वयं ब्रूमः ॥ ९५ ॥

अन्वयार्थौ–(स्मरशास्त्रविनिर्दिष्टाः मनुजानां शशः वृषः हयः इति त्रयो भेदाः जायन्ते) कामशास्त्रके कहे हुए मनुष्योंके खरगोश, बैल, घोडा ये तीन भेद होते हैं और (क्रमेण तल्लक्षणं वयं ब्रूमः) उनके क्रमसे लक्षण हम कहते हैं ॥ ९५ ॥

लिङ्गं षडङ्गुलानि स्यादष्टौ वा शशः स पुमान् ।
नव दश चैकादश वा तदपि पुनर्यस्य स वृषाख्यः ॥ ९६ ॥

अन्वयार्थौ–(यस्य लिंगं षट् वा अष्टौ अंगुलानि सः स्फुटं शशःपुमान् स्यात्) जिसका लिंग ६ वा ८ अंगुलका प्रकट होय वह खरगोशकी संज्ञाका पुरुष होता है और (यस्य नव दश वा एकादश अंगुलानि तदपि लिंगं स पुरुषः वृषाख्यः स्यात्) जिसका ९-१०-११ अंगुलका लिंग होय सो पुरुष बैलकी संज्ञाका होता है ॥ ९६ ॥

द्वादश वा लिङ्गं स्यात्त्रयोदशादीनि चाङ्गुलानि भवेत् ।
जातोद्भवस्य मानं हयाख्यया निगदितः सोऽपि ॥ ९७ ॥

अन्वयार्थौ–(यस्य जातोद्भवस्य लिंगं द्वादश वा त्रयोदशादीनि अंगुलानि मानं स्यात्) जिस पुरुषका आदि समयसेही लेकरके लिंग १२-१३ अंगुलके प्रमाणका होय सो (सः अपि हयाख्यया निगदितः कथितः) उसको घोडेकी संज्ञाका कहा है ॥ ९७ ॥

रतिषु शशवृषहयानां सह भृत्यादिभिरकृत्रिमा प्रीतिः ।
मेहनं वराङ्गनार्योः परस्परेण प्रमाणैक्यात् ॥ ९८ ॥

अन्वयार्थौ–(शशवृषहयानां रतिषु मेहनं वराङ्गनार्योः प्रमाणैक्यात्) खरगोश बैल घोडा पुरुषोंकी रतिमें इंद्री और योनिके एक समान प्रमाण होनेसे (भृत्यादिभिः सह परस्परेण अकृत्रिमा प्रीतिर्भवति) सेवक आदिके साथ करी हुई प्रीति जैसेकी तैसी रति अच्छी होती है ॥ ९८ ॥

अन्नं क्षुधि पानं तृषि पथि श्रमे वाहनं भवेद्रक्षा ।
इति भवति यस्य समये धन्यं प्रवदंति तं सन्तः ॥ ९९ ॥

अन्वयार्थौ–(यस्य समये क्षुधि अन्नं तृषि पानं पथि श्रमे वाहनं भवेत्) जिसको समयके विषे भूखमें तौ अन्न और प्यासमें जल और थकावटमें सवारी होय तौ (इति रक्षा भवेत्) ये बडी रक्षा होती है और (सन्तः तं पुरुषं धन्यं प्रवदंति) पंडित उस पुरुषका धन्य कहते हैं ॥ ९९ ॥

इति श्रीमहत्तमश्रीनृसिंहात्मजदुर्लभराजविरचिते सामुद्रतिलकाख्येऽपरनाम्नि नरलक्षणशास्त्रे शरीराधिकारो द्वितीयः ॥ २ ॥

अङ्गप्रत्यङ्गयुतं सकल शारीरमिदमिति प्रोक्तम् ।
आवर्तप्रभृतीनामनुक्रमाल्लक्षणं वयं ब्रूमः ॥ १ ॥

अन्वयार्थौ-(अंगप्रत्यंगयुतं सकलम् इदं शारीरम् इति प्रोक्तम्) छोटे सब अंगप्रत्यंग सहित यह यही शारीरलक्षण कहा है सो (अनुक्रमात् आवर्त्तप्रभृतीनां लक्षण वयं ब्रूमः) अब क्रमसे चक्र वा भौंरी आदिके लक्षण हम कहते हैं ॥ १ ॥

रोमत्वग्बालभवः स्यादावर्तः शुभस्त्रेधा ।
शस्तो दक्षिणवलितः स्निग्धो व्यक्तः परो न शुभः ॥ २ ॥

अन्वयार्थौ-(रोमत्वग्बालभवः आवर्त्तः त्रेधा स्यात्) रोंगटे-त्वचा बाल इनसे उत्पन्न हुई जो भौंरी तीन प्रकारकी होतीहै और (दक्षिणवलितः स्निग्धः व्यक्तः शुभः शस्तः परो न शुभः) जो दाहिनी ओरकी अच्छी प्रकट होय तो शुभ है और जो बांई ओर होय तो अशुभ है ॥ २ ॥

करतलपदश्रुतियुग्मे नाभौ वा त्वग्भवो नृणाम् ।
स स्यादपरौ द्वावपि लक्षणविद्भिर्ज्ञेयौ यथास्थानम् ॥ ३ ॥

अन्वयार्थौ-(नृणां करतलपदश्रुतियुग्मे वा नाभौ त्वग्भवः सः आवर्तः स्यात्) मनुष्योंके दोनों हाथ, दोनों पाँव, दोनों कान और टूँडी-त्वचामें उत्पन्न भौंरी होतीहै और (अपरौ द्वौ अपि लक्षणविद्भिः यथास्थानं ज्ञेयौ) जो दो हैं उनके भी लक्षण जाननेवालोंको यथास्थान जैसी जगह हो वैसे जानने चाहिये ॥ ३ ॥

सव्यापसव्यभागे शिरसि स्याद्यस्य दक्षिणावर्तः ।
श्वेतातपत्रलक्ष्मा लक्ष्मीः करवर्तिनी तस्य ॥ ४ ॥

अन्वयार्थौ-(यस्य शिरसि सव्यापसव्यभागे (दक्षिणावर्तः स्यात्) जिसके मस्तकमें बामे दाहिने विभागमें जो दक्षिणावर्त चक्र वा भौंरी होय (तस्य श्वेतातपत्रलक्ष्मा लक्ष्मीः करवर्तिनी भवति) तिसके उज्ज्वल छत्रकी शोभायुक्त लक्ष्मी हाथमें आती है ॥ ४ ॥

रोमावर्तः स्निग्धो भ्रूयुगमध्ये प्रदक्षिणो व्यक्तः ।
यस्योर्णाख्यः पूर्णः सोम्बुधिकाञ्चेर्भुवो भर्ता ॥ ५ ॥

अन्वयार्थौ-(यस्य भ्रूयुगमध्ये व्यक्तः प्रदक्षिणः स्निग्धः रोमावर्तः पूर्णः ऊर्णाख्यः स्यात्) जिस पुरुषका दोनों भौंहके बीचमें प्रगट दाहिनी ओर झुकी हुई अच्छी भौंरी वा चक्र पूरा ऊर्णाख्य नामका होय (सः अम्बुधि-काञ्चेर्भुवः भर्ता भवति) सो पुरुष समुद्र है कांची (कटिबन्धिनी) जिसकी ऐसी पृथ्वीका स्वामी अर्थात् संपूर्ण पृथ्वीका पालनेवाला होता है ॥ ५॥

भुजयुग्मे यस्य स्यादावर्तं द्वितीयमङ्गदप्रतिमम् ।
नियतं सोऽखिलभूमिं पुरुषो निजवाहनां वहति ॥ ६ ॥

अन्वयार्थौ-(यस्य भुजयुग्मे द्वितीयम् अंगदप्रतिमम् आवर्तं स्यात्) जिसकी दोनों भुजाओंके बीचमें दूसरे बाजूकासा चक्र चिह्न वा भौंरी होय तो (सः पुरुषः नियतम् अखिलभूमिं निजवाहनां वहति) सो पुरुष निश्चय करिके संपूर्ण पृथ्वीको अपनी भुजाओंसे धारण करे ॥ ६ ॥

यस्य कराम्भोजतले दक्षिणवलितो भवेदतिव्यक्तः ।
परिचितशौचाचारो धर्मपरः स्यात्स वित्ताढ्यः ॥ ७ ॥

अन्वयार्थौ-(यस्य कराम्भोजतले दक्षिणवलितः अतिव्यक्तः भवेत्) जिसके करकमल अर्थात् हथेलीमें दाहिनी ओर चिह्न वा साथिया बहुत प्रकट होय तो (सः परिचितशौचाचारः धर्मपरः वित्ताढ्यः स्यात्) सो पुरुष जानाहै पवित्रताका आचार जिसने ऐसा धर्ममें तत्पर और धनवान् होय।७॥

भाग्यवतां पंचाङ्गुलिशिरस्सु सौख्याय दक्षिणावर्तः ।
प्रायः पुंसां वामावर्तो दुःखाय पुनरेषः ॥ ८ ॥

अन्वयार्थौ-(भाग्यवतां पुंसां पंचांगुलिशिरस्सु दक्षिणावर्तः सौख्याय भवति (धनवान् पुरुषोंके शिरमें ५ अंगुल प्रमाण दाहिनी ओरको झुका-हुवा चक्र वा चिह्न अर्थात् भौंरी सुखदायक होती है और (पुनः एषः

वामावर्तः प्रायः दुःखाय भवति) जो वही बाँई ओरको झुकी हुई भौंरी होय तो बहुधा दुःखदाई होती है ॥ ८ ॥

श्रुतियुगनाभ्यावर्ताः प्रदक्षिणाः श्रेयसे भवंति नृणाम् ।
चूडावर्तोप्येकः श्रेष्ठतरो दक्षिणः शिरसि ॥ ९ ॥

अन्वयार्थौ–(नृणां प्रदक्षिणाः श्रुतियुगनाभ्यावर्ताः श्रेयसे भवन्ति) मनुष्योंके दाहिनी ओर झुके हुए दोनों कान और नाभिके चक्र शुभकारक होते हैं और (नृणां शिरसि एकः अपि चूडावर्तः दक्षिणः श्रेष्ठतरो भवति) मनुष्योंके शिरमें एकही चूडावर्त्त नाम चक्र दाहिनी ओरका बहुत श्रेष्ठ होता है ॥ ९ ॥

शीर्षे वामे भागे वामावर्तो भवेत्स्फुटो यस्य ।
स क्षुत्क्षामो भिक्षां रूक्षां निर्लक्षणो लभते ॥ १० ॥

अन्वयार्थौ–(यस्य शीर्षे वामे भागे वामावर्तः स्फुटः भवेत्) जिसके शिरमें बाँई ओरको चक्र अर्थात् भौंरी प्रकट होय॰ तो (क्षुत्क्षामः सः निर्लक्षणः रूक्षां भिक्षां लभते) भूँखका मारा अभागा रूखी भीखको प्राप्त होताहै ॥ १० ॥

वामो दक्षिणपार्श्वे प्रदक्षिणो वामपार्श्वके यस्य ।
न तु तस्य चरमकाले भोगो नास्त्यत्र सन्देहः ॥ ११ ॥

अन्वयार्थौ–(यस्य दक्षिणपार्श्वे वामः वामपार्श्वके प्रदक्षिणः भवति-तस्य चरमकाले भोगो नास्ति अत्र सन्देहो न तु) जिसकी दाहिनी ओर तौ बाँई होय-और बाँई ओर दाहिनी होय-तिसको पिछली अवस्थामें भोग नहीं होय इसमें सन्देह नहीं ॥ ११ ॥

अन्तर्ललाटपट्टं व्यक्तावर्तो ललामवद्यस्य ।
वामोऽथ दक्षिणो वा स्वल्पायुर्दुःखितश्च स्यात् ॥ १२ ॥

अन्वयार्थौ–(यस्य ललाटपट्टम् अन्तःललामवत् व्यक्तावर्तःवामःअथवा दक्षिणः भवति) जिसके लिलारके ऊपर प्रकट है भौंरी-जिसमें ऐसा रत्नके

समान बाँयाँ अथवा दाहिने चक्र होय तो (सः स्वल्पायुः दुःखितश्च स्यात्) वह थोडी आयुवाला और दुःखी होय ॥ १२ ॥

यस्यावर्तद्वितयं सुव्यक्तं भवति पादतलमध्ये ।
नक्तंदिनमतिदीनो भूमिं स भ्रमति मतिहीनः ॥ १३ ॥

अन्वयार्थौ-(यस्य पादतलमध्ये आवर्तद्वितयं सुव्यक्तं भवति) जिसके पांवके तलुवेमें दो आवर्त नाम चक्र प्रकट होंय तो (अतिदीनः मतिहीनः सः नक्तंदिनं भूमिं भ्रमति) सो अतिदीन अर्थात् बहुत गरीब-मतिहीन-मूर्खसा रातदिन पृथ्वीमें घूमता रहे ॥ १३ ॥

अथ गतिकथनम् ।

सुखसंचरितपादा मयूरमार्जारसिंहगतितुल्या ।
दीर्घक्रमा सुलीला भाग्यवतां स्याद्गतिः सुभगा ॥ १४ ॥

अन्वयार्थौ-(भाग्यवतां सुखसंचरितपादा मयूरमार्जारसिंहतुल्या दीर्घक्रमा सुलीला सुभगा गतिः भवति) भाग्यवानोंका सुखसे है पैरोंका चलना जिसमें मोर-बिल्ली-सिंह इनकीसी चालके समान लम्बा है डँगका रखना जिसमें अच्छी लीलायुक्त सुन्दर चाल होती है ॥ १४ ॥

गतिभिर्भवन्ति तुल्या ये च समा द्विरदनकुलहंसानाम् ।
वृषभस्यापि नरास्ते सततं धर्मार्थकामपराः ॥ १५ ॥

अन्वयार्थौ-(ये गतिभिः द्विरदनकुलहंसानां वृषभस्यापि समाः भवन्ति) जो मनुष्य चालसे हाथी-नौला-हंस-बैलकीसी समान होते हैं. (ते नराः सततं धर्मार्थकामपरा भवन्ति) वे मनुष्य निरन्तर धर्म, अर्थ, काममें तत्पर होते हैं ॥ १५ ॥

गोमायुकरभरासभकुक्कुलासशशकभेकमृगैः ।
येषां गतिः समाना ते गतसुखराजसन्मानाः ॥ १६ ॥

अन्वयार्थौ-(येषां गतिः गोमायुकरभरासभकृकलासशशकभेकमृगैः समाना ते गतसुखराजसन्मानाः भवन्ति) जिनकी चाल गीदड-ऊंट-गधा-

गिरगिट-खरगोश-मैंढक-हिरण इनकी समान होय तो वे गया सुख और राजसन्मान जिनका ऐसे होते हैं ॥ १६ ॥

विषमा विकटा मंदा लघुक्रमा चञ्चला द्रुता स्तब्धा ।
आभ्यन्तराऽथ बाह्या लग्नपदा वा गतिर्न शुभा ॥ १७॥

अन्वयार्थौ-(यस्य विषमा विकटा मंदा लघुक्रमा चंचला द्रुता स्तब्धा आभ्यन्तरा अथ बाह्या वा लग्नपदा ईदृशी गतिः शुभा न) जिसकी ऊंची नीची, भयकारी, धीरजकी छोटी डग-फुरतीकि-शीघ्र-रुक-रुकके भीतर बाहर जिसमें पांव भिडते जायँ ऐसी चाल अशुभ अर्थात् बुरी होती है १७॥

धनिनां गमनं स्तिमितं समाहितं शब्दहीनमस्तब्धम् ।
ह्रस्वप्लुतानुविद्धं विलम्बितं स्याद्दरिद्राणाम् ॥ १८ ॥

अन्वयार्थौ-(धनिनां गमनं स्तिमितं समाहितं शब्दहीनम् अस्तब्धं स्यात्) धनवानोंकी चाल अच्छी एकसी-शब्द करिके हीन-रुकावटकी नहीं ऐसी होतीहै और (ह्रस्वप्लुतानुविद्धं विलंबितं दरिद्राणां स्यात्) छोटी छोटी डगयुक्त; धीरे धीरे ऐसी चाल दरिद्रियोंकी होती है ॥ १८ ॥

अथ छायाकथनम् ।

छादयति नरस्याङ्गे लक्षणमत्यन्ततो नरच्छाया ।
सा पार्थिवी तथाऽथ ज्वलनभवा वायवी व्योम्नी ॥ १९ ॥

अन्वयार्थौ-(छाया नरस्य अंगे लक्षणं छादयति सा छाया पार्थिवी अत्यन्ततः नरः भवति) छाया अर्थात् तेज मनुष्यके अंगमें लक्षणको ढक दय सो छायाका नाम पार्थिवी अर्थात् पृथ्वी सम्बन्धिनी है सो मनुष्य बहुत अच्छा होताहै और (तथा ज्वलनभवा अथ व्योम्नी वायवी भवति) जैसे अग्निसे आकाशसे और पवनसे उत्पन्न हुई होतीहै ॥ १९ ॥

भवति शुभाशुभफलदा निजतेजस्तन्वती बहिर्देहात्।
विमलस्फटिकघटान्तर्विलसति सा दीपकलिकेव ॥ २० ॥

अन्वयार्थौ–(छाया शुभाशुभफलदा भवति) छाया शुभ और अशुभ फलकी देनेवाली होतीहै और (देहात् बहिर्निजतेजस्तन्वती भवति) देहसे बाहिर वही छाया अपने तेजको फैलाती है और (सा विमलस्फटिकघटान्तः दीपकलिका इव विलसति) कैसे कि निर्मल स्फटिकके घडेमें दीपककी ज्योति जैसे प्रकाशवान् अर्थात् शोभित होती है ॥ २० ॥

स्निग्धद्विजनखलोमत्वक्केशा पार्थिवी स्थिरा रेखा।
नयनहृदयाभिरामा दत्ते धनधर्मसुखभोगान् ॥ २१ ॥

अन्वयार्थौ–(स्निग्धद्विजनखलोमत्वक्केशा रेखा स्थिरा नयनहृदयाभिरामा एतादृशी पार्थिवी छाया धनधर्मसुखभोगान् दत्ते) अच्छे दांत नख-रोम-त्वचा बाल और स्थिर रेखा जिसमें होतेहैं और नेत्र-चित्तको सुंदर लगे ऐसी पार्थिवी छाया धन धर्म और सुख भोग इनको देनेवाली होती है ॥ २१ ॥

आप्याऽभिनवाम्भोदप्रच्छन्नजलसन्निभा छाया।
सर्वार्थसिद्धिजननी जनयति सौभाग्यमिह पुंसाम् ॥ २२ ॥

अन्वयार्थौ–(अभिनवाम्भोदप्रच्छन्नजलनिभा छाया आप्या) नवीन जो मेघ जिससे गिरा जो जल-उसकी तुल्य जो छाया है तिसका नाम आप्या है (सा छाया सर्वार्थसिद्धिजननी) सो छाया सर्व अर्थके सिद्धिके उत्पन्न करनेवाली है २२ ॥

ज्वलनप्रभा च बालार्कप्रवालकनकाग्निपद्मरागनिभा।
पौरुषपराक्रमैर्वा जयमर्थं तनुभृतां तनुते ॥ २३ ॥

अन्वयार्थौ–(या बालार्कप्रवालकनकाग्निपद्मरागनिभा भवति) जो उदय हुआ सूर्य-मूँगा-सोना-अग्नि-रत्न इनकी तुल्य होय (सा छाया ज्वलनप्रभा भवति) सो छाया ज्वलनप्रभा नाम है (सा ज्वलनप्रभा तनुभृतां

पौरुषपराक्रमैर्जयम् अर्थं तनुते (वही ज्वलनप्रभा छाया मनुष्योंके पुरुष और पराक्रम करके जय और अर्थको फैलाती है ॥ २३ ॥

रूक्षा मलिना दीना चला खला मारुती भवेच्छाया ।
वधबन्धबन्धनपरा वित्तविनाशं नृणां कुरुते ॥ २४ ॥

अन्वयार्थौ-(या छाया रूक्षा मलिना दीना चला खला सा छाया मारुती भवति (जो छाया-मैली हीन-चलायमान-बुरी इनकी तुल्य जो होय सो छाया मारुती नाम है (सा छाया वधबन्धबंधनपरा नृणां वित्तविनाशं कुरुते) सो छाया मारण और बंधनकी करनेवाली और मनुष्योंके धनका नाश करनेवाली है ॥ २४ ॥

स्वच्छा स्फटिकमणिनिभा प्रोद्दामा देहिनामिह व्योम्नी ।
प्रायः श्रेयोनिधिसुखधनसुतसौभाग्यदा पुंसाम् ॥ २५ ॥

अन्वयार्थौ-(पुंसां या छाया स्वच्छा स्फटिकमणिनिभा प्रोद्दामा सा छाया व्योम्नी) पुरुषोंकी जो छाया निर्मल स्फटिकमणिकी तुल्य अत्यन्त सुंदर ऐसी होय सो व्योम्नी नाम छाया है (सा छाया इह देहिनां प्रायः श्रेयोनिधिसुखधनसुतसौभाग्यदा भवति) सो छाया मनुष्योंको बहुधा कल्याण, लक्ष्मी, सुख, धन, पुत्र, सौभाग्य इनके देनेवाली है ॥ २५ ॥

अर्काच्युतेन्द्रयमशशिप्रतीकाशा लक्षणैस्तु फलैः ।
अन्याः पञ्च पुनस्ताः प्रवदंत्यपरे समसंपदो नैतत् ॥ २६ ॥

अन्वयार्थौ-(अर्काच्युतेन्द्रयमशशिप्रतीकाशा अन्याः ताः पंच छायाः लक्षणैस्तु फलैः पुनः अपरे समसंपदः इति प्रवदान्ति एतत् न) सूर्य, विष्णु, इंद्र, यम, चंद्रमा इनकी तुल्य ये और पांच छाया हैं वे लक्षणों और फलों करिके दूसरे मतवाले इनको समान संपत्तिवाले कहते हैं परंतु यह बात नहीं किन्तु इनके पृथक् पृथक् फल हैं ॥ २६ ॥

अथ स्वरः ।

स्निग्धः स्वरोऽनुमोदी निर्हादी खण्डितः कलो मन्द्रः ।
तारः स्वरश्च विपुलः पुंसां संपत्करः सततम् ॥ २७ ॥

अन्वयार्थौ-(पुंसां स्निग्धः स्वरः अनुमोदी निर्हादी खंडितः कलः मन्द्रः तारः स्वरः विपुलः सततं संपत्करो भवति) पुरुषोंकी अच्छी जो बोली है सोई प्रसन्न करती है सारसकीसी कुछ कही कुछ न कही मीठी धमकदार मृदंगकीसी बहुत ऊंची बडी ये सब निरंतर संपत्तिकी करने वाली हैं ॥ २७ ॥

दुन्दुभिवृषभाम्बुदमृदंगशिखिशंबररथाङ्गैः स्यात् ।
यस्य स्वरः समानः स भूपतिर्भवति भोगाढ्यः ॥ २८ ॥

अन्वयार्थौ-(यस्य स्वरः दुंदुभिवृषभाम्बुदमृदंगशिखिशंबररथाङ्गैः समानः स्याद् सः भूपतिः भोगाढ्यो भवति) जिसकी बोली नगारा, बैल, मेघ, मृदंग, मोर, हिरण, चकवा इनकी तुल्य होय सो राजा और भोगी होता है ॥ २८ ॥

भिन्नः क्षीणः क्षामो विकुष्टो गद्गदस्वरो दीनः ।
रूक्षो जर्जरितोऽपि च निःस्वानां निस्वनः प्रायः ॥ २९ ॥

अन्वयार्थौ-(निःस्वानां स्वरः भिन्नः क्षीणः क्षामः विक्रुष्टः गद्गदः दीनः रूक्षः जर्जरितः प्रायः निस्वनः भवति) दरिद्रियोंकी बोली फूटी टूटी, कुछ कही कुछ न कही बहुत धीरेकी दुवले मनुष्यकीसी खैंची हुई बडे जोरसे, रुकरुकके, गरीबीसे रूखीसी, बूढोंकीसी ऐसी बोली बहुधा दरिद्रियोंकी होती है ॥ २९ ॥

वृककाकोलूकप्लवगोष्ट्रक्रोष्टुरासभवराहैः ।
तुल्यः स्वरो न शस्तो विशेषतो हि स्वरो दुष्टः ॥ ३० ॥

अन्वयार्थौ-(यस्य स्वरः वृककाकोलूकप्लवगोष्ट्रक्रोष्टुरासभवराहैः तुल्यो भवति स न शस्तः विशेषतः स्वरः दुष्टो भवति) जिसका स्वर,

भेडिया, कौवा, उलूक, बंदर, ऊंट, गीदड, गधा, सूअर इनकीसी तुल्य जो होय तो अच्छा नहीं है और इनसे अधिक स्वरवाला दुष्ट होताहै ॥ ३० ॥

अथ गन्धः ।

गन्धो भुवि नराणां प्रजायते नासिकेन्द्रियग्राह्यः ।
श्वासः स्वेदादिभवो ज्ञेयः स शुभाशुभो द्विविधः ॥ ३१ ॥

अन्वयार्थौ–(भुवि नराणां नासिकेन्द्रियग्राह्यः गन्धः प्रजायते स्वेदादिभवः गंधः श्वासः स शुभाशुभो द्विविधो ज्ञेयः) पृथ्वीमें मनुष्योंकी गन्ध नासिका इंद्रियकरिके लीनी जाय ऐसी जो गंध होय सो पसीना आदिसे और श्वाससे जो उत्पन्न गन्ध सोई गंध शुभ और अशुभ दो प्रकारकी जानिये ॥ ३१ ॥

कर्पूरागुरुमलयजमृगमदजातीतमालदलगन्धाः ।
द्विपमदगन्धा भूमौ पुरुषाः स्युर्भोगिनः प्रायः ॥ ३२ ॥

अन्वयार्थौ–(कर्पूरागुरुमलयजमृगमदजातीतमालदलगंधाः वा द्विपमदगन्धाः भूमौ प्रायः भोगिनः स्युः) कर्पूर, अगर, चंदन, कस्तरी चमेली, तमाल अर्थात् आबनूसके पत्तेकीसी, वा हाथीके मदकीसी गंध जिन मनुष्योंकी पृथ्वीमें होय वे मनुष्य बहुधा भोगी होते हैं ॥ ३२ ॥

मत्स्याण्डपूतिशोणितनिम्बवसाकाकनीडबकगन्धाः ।
दुर्गन्धाश्च नरास्ते दुर्भगतानिःस्वताभाजः ॥ ३३ ॥

अन्वयार्थौ–(मत्स्याण्डपूतिशोणितनिम्बवसाकाकनीडबकगंधाः ते नराः दुर्गन्धाः प्रायः दुर्भगतानिःस्वताभाजो भवन्ति) जिनकी गंध मच्छीके अंडे-सडे-रुधिर-नीम-चरबी-कौवेके अंडे-बगुले इनके तुल्य होय वे मनुष्य बुरे गंधवाले हैं बहुधा कुरूप और दरिद्रताके भोगनेवाले होतेहैं ॥ ३३ ॥

अथ वर्णः ।

गौरः श्यामः कृष्णो वर्णः संभवति देहिनां त्रेधा ।
आद्यौ द्वावपि शस्तौ शुभो न कृष्णो न सङ्कीर्णः ॥ ३४ ॥

अन्वयार्थौ-(देहिनां वर्णः त्रेधा संभवति) मनुष्योंके शरीरका रंग तीन प्रकारका होता है जैसे-(गौरः श्यामः कृष्णः द्वौ अपि आद्यौ शस्तौ) गोरा, सांवरा काला जो आदिके दोनों हैं सो अच्छे हैं और (कृष्णः न शुभः वा संकीर्णः शुभो न) काला अच्छा नहीं है और कुछ काला कुछ गोरा यह भी शुभ नहीं है ॥ ३४ ॥

पङ्कजकिञ्जल्कनिभो गौरश्यामः प्रियङ्गुकुसुमसमः ।
कृष्णस्तु कज्जलाभः स्निग्धः शुद्धोऽपि नो शस्तः ॥ ३५ ॥

अन्वयार्थौ-(पङ्कजकिंजल्कनिभः गौरः) कमलके फूलके जीरेके तुल्य तो गोरा और (प्रियंगुकुसुमसमः श्यामः) धायके फूलके तुल्य सांवरा और (कज्जलाभः समः कृष्णः) काजलके तुल्य है सो काला है और (स्निग्धः शुद्धः अपि कृष्णः नो शस्तः) चिकना चमकना जो काला है सो अच्छा नहीं है ॥ ३५ ॥

अथ सत्त्वम् ।

व्यसने वाभ्युदये वा गतशङ्काशोकमुकुलितोत्साहम् ।
उन्मीलनधीरत्वं गंभीरमिह कीर्त्यते सत्त्वम् ॥ ३६ ॥

अन्वयार्थौ-(व्यसने वाअभ्युदये वा गतशंकाशोकमुकुलितोत्साहम् उन्मीलनधरित्वम् इह सत्त्वं गंभीरं कीर्त्यते) दुःखमें वा सुखमें वा गई है शंका-शोक रहित उत्सवमें प्रसन्नता और धीरज होय सो इस लोकमें ऐसे सत्त्वको गंभीर कहते हैं ॥ ३६ ॥

एकमपि सत्त्वमेतैः सर्वाणि सन्ति लक्षणैस्तुल्यम् ।
यस्मिन्क्वापिमनुजानां न कदाचन दुर्लभा लक्ष्मीः ॥ ३७ ॥

अन्वयार्थौ-(एकमपि सत्त्वमेतैः लक्षणैः तुल्यमस्ति, किंपुनर्यस्मिन् सर्वाणि कपिमनुजानां मध्ये सत्त्वादीनि सन्ति) एकही सत्त्व इन सब लक्षणोंके तुल्य है फिर जिस पुरुष या वन्दरके सब सत्त्व और वे लक्षण भी स्थित हैं; (तस्य कदाचन लक्ष्मीः दुर्लभा न) उसे तो कभी लक्ष्मी दुर्लभ नहीं है ॥ ३७ ॥

त्वचि भोगा मांसे सुखमस्थिषु धनमीक्षणेषु सौभाग्यम् ।
यानं गतौ स्वरे स्यादाज्ञा सत्त्वे पुनः सर्वम् ॥ ३८ ॥

अन्वयार्थौ-(त्वचि भोगाः मांसे सुखम् अस्थिषु धनम् ईक्षणेषु सौभाग्यम् गतौ यानम् स्वरे आज्ञा पुनः सत्त्वं सर्वं स्यात्) त्वचामें जो सत्त्व है सो भोगोंको-मांसमें सुखोंको—हाडोंमें धनको-नेत्रोंमें सौभाग्यको-चलनेमें सवारीको-शब्दमें आज्ञाको-फिरभी जो कुछ है सो सब सत्त्वमें ही है॥ ३७॥

सौभाग्यमिव स्त्रीणां पुरुषाणां भूषणं भवति सत्त्वम् ।
तेन विहीना भुवने भजन्ति परिभवपदं प्रायः ॥ ३९ ॥

अन्वयार्थौ-(स्त्रीणां सौभाग्यमिव पुरुषाणां सत्त्वं भूषणं भवति भुवने तेन विहीनाः प्रायः परिभवपदं भजन्ति) स्त्रियोंका सौभाग्य जैसे भूषण है ऐसेही पुरुषोंका सत्त्व भूषण है. जगत्में जो सत्त्व करिके हीन हैं वे बहुधा निरादर पदको पाते हैं ॥ ३९ ॥

वर्णः शुभो गतेः स्याद्वर्णादपि शुभतरः स्वरः पुंसाम् ।
अतिशुभतमं स्वरादपि सत्त्वं सत्त्वाधिका धन्याः ॥ ४० ॥

अन्वयार्थौ-(पुंसां गतेः वर्णः शुभः वर्णादपि स्वरः शुभतरः स्यात् स्वरात् अपि अतिशुभतमं सत्त्वम् तथा—सत्त्वाधिकाः पुरुषाः धन्याः) पुरुषोंकी गतिसे तो वर्ण शुभ है, वर्णोंसे स्वर अत्यंत उत्तम (अच्छा) है स्वरसेभी उत्तम सत्त्व है और जिनमें सत्त्व अधिक है वेही पुरुष धन्य हैं ॥ ४० ॥

वक्त्रानुगतं रूपं रूपानुगतं नृणां भवति वित्तम् ।
वित्तानुगतं सत्त्वं सत्त्वानुगता गुणाः प्रायः ॥ ४१ ॥

अन्वयार्थौ-(नृणां वक्त्रानुगतं रूपम्-रूपानुगतं वित्तम्-वित्तानुगतं सत्त्वं-प्रायः सत्त्वानुगताः गुणाः भवंति)। मनुष्योंके मुखके तुल्य तो रूप है और रूपके तुल्य वित्त है और वित्तके तुल्य सत्त्व है और बहुधा सत्त्वके ही तुल्य गुणभी होते हैं ॥ ४१ ॥

इह सत्त्वमेव मुख्यं निखिलेष्वपि लक्षणेषु मनुजानाम् ।
सद्भावो भवति पुनश्चिंता शाम्यं समुपयाति ॥ ४२ ॥

अन्वयार्थौ-(इह मनुजानां निखिलेषु लक्षणेषु अपि सत्त्वमेव मुख्यम्) इस लोकमें मनुष्योंके इन सब लक्षणोंमें सत्त्वही लक्षण मुख्य है और (पुनः सद्भावो भवति) इसमें सद्भाव अर्थात् अच्छा विचार होता है और(चिंता शाम्यं समुपयाति) चिंता शांत होजाती है ॥ ४२ ॥

नापि तु येषां नमनं मनो विकारं कथंच नाभ्येति ।
आपद्यपि संपद्यपि ते सत्त्वविभूषिताः पुरुषाः ॥ ४३ ॥

अन्वयार्थौ-(येषां नमनं न तु-आपद्यपि संपद्यपि मनो विकारं कथं च न अभ्येति) जिनका झुकना नहीं है और आपत्तिमें और संपत्तिमें जिनके मनको कभी विकार नहीं होता है (ते पुरुषाः सत्त्वविभूषिताः भवंति) वे पुरुष सत्त्वविभूषित होते हैं अर्थात् सत्त्वही जिनके भूषण हैं ॥ ४३ ॥

शुभलक्षणमप्येवं बाह्यं न विलोक्यते स्फुटं यस्य ।
अपि दृश्यते पुनः श्रीस्तस्य तदाऽध्रुवेतिसत्यम् ॥ ४४ ॥

अन्वयार्थौ-(यस्य एवं शुभलक्षणं बाह्यमपि स्फुटं न विलोक्यते) जिसके ये शुभलक्षण बाहिरी प्रकट नहीं दीखे (तस्य पुनः श्रीरध्रुवापि दृश्यते इति सत्यम्) तिसके फिर लक्ष्मी चलायमान दीखती है अर्थात् उसके स्थिर नहीं रहे यह बात सत्य है ॥ ४४ ॥

स्थूलैस्तनुभिः परुषैर्मृदुभिः स्वल्पैरथायतैरङ्गैः ।
यः सत्त्ववान्स पूज्यस्तत्सकलं गुणाधिकं सत्त्वम् ॥ ४५ ॥

अन्वयार्थौ–(स्थूलैः तनुभिः परुषैः मृदुभिः स्वल्पैः अथ आयतैरङ्गैः) मोटा, पतला, खरदरा, नरम, छोटा, लंबा शरीर होय तो इन करके कुछ नहीं (यः सत्त्ववान् स पूज्यः) जो सत्त्ववान् है सोई पूज्य है (तत्सकलं गुणाधिकं सत्त्वं भवति) तिससे सब गुणोंमें अधिक सत्त्वही है ॥ ४५ ॥

शुभलक्षणमङ्गं यदि सुपूजितः स्यान्नरस्य सत्त्ववतः ।
तदुभयसंपर्कादिह सौभाग्ये मञ्जरीभेदः ॥ ४६ ॥

अन्वयार्थौ–(सत्त्ववतः नरस्य यदि अङ्गं शुभलक्षणं सुपूजितं स्यात्) सत्त्ववाले मनुष्यका यदि अंग शुभलक्षणयुक्त है सोई पूजित है और (तदुभयसंपर्कात् इह सौभाग्ये मंजरीभेदः) उन दोनोंके मिलापसे अर्थात् सत्त्वअंगके इस लोकमें और भाग्यमें कुछ मंजरीका अर्थात् बालिकासा भेद है ॥ ४६ ॥

इति श्रीमहत्तमश्रीनृसिंहात्मजदुर्लभराजविरचिते सामुद्रतिलका-
परनाम्नि आवर्ताद्यधिकारस्तृतीयः ॥ ३ ॥

संस्थानवर्णगन्धावर्ताः सत्त्वं स्वरो गतिश्छाया ।
तन्नरवन्नारीणामिति लक्षणमष्टधा भवति ॥ १ ॥

अन्वयार्थौ–(संस्थानवर्णगन्धाआवर्ताः सत्त्वं स्वरः गतिः छाया नारीणामिति नरवत् तत् लक्षणमष्टधा भवति) । आकार, रंग, सुगंध चक्र, सत्त्व, बोली चाल, कांति जैसे मनुष्योंके लक्षण हैं तैसेही स्त्रियोंके भी लक्षण यह आठ प्रकारके होते हैं ॥ १ ॥

इह देहसंनिवेशः संस्थानं तस्य लक्षणमिदानीम् ।
आपादतलशिरोन्तं जातस्य शुभाशुभं फलं वक्ष्ये ॥ २ ॥

अन्वयार्थौ–(इह देहसंनिवेशः संस्थानम् इदानीं जातस्य आपादतलशिरोन्तं शुभाशुभं फलं वक्ष्ये तस्य लक्षणं ज्ञेयम्) इस लोकमें शरीरका

जो आकार है उसका नाम संस्थान है–अब पुरुषकेसे पाँवसे लेकर शिरतक स्त्रियोंके शुभ वा अशुभ फल कहता हूं–तिसके लक्षण जानने चाहिये ॥ २ ॥

प्रथमं पादस्य तले रेखाश्चक्रादयस्ततोऽङ्गुष्ठः ।
अङ्गुल्यस्तदनु नखाः पृष्ठं गुल्फद्वयं पार्ष्णिः ॥ ३ ॥

अन्वयार्थौ–(प्रथमं पादस्य तले रेखाः ततः चक्रादयः अङ्गुष्ठः तदनु नखा अंगुल्यः पादपृष्ठं गुल्फद्वयं पार्ष्णिः) पहिले तो पांवके तलुवेकी रेखा तिसके पीछे चक्र आदि अंगूठा तिसके पाछ नख फिर अंगुली तिस पीछे पांवकी पीठ और दो टकना और पार्ष्णि नाम पांवका फावा अर्थात् पंजा ॥ ३ ॥

जङ्घाद्वयं रोमाणि जानुरू चूचकगण्डयुगलमथो ।
कटिरथ नितंबबिम्बः स्फिचौ भगं जघनमथ बस्तिः ॥४॥

अन्वयार्थौ–(जंघाद्वयम्) पिंडली दोनों (रोमाणि) बाल (जानु) घुटनेके ऊपर (ऊरू) जंघा (चुचक) चंचीकी नोकें (गंडयुगलम्) कपोलकी दोनों हड्डियाँ (अथो कटिः) और कमर (अथ नितंबबिम्बः) कूलेके मोटेपन (स्फिचौ) कमरके पिंड (भगम्) भग (जघनम्) कूलेका आगा (अथ बस्तिः) ये पेडू आदि अंग हैं ॥ ४ ॥

नाभिः कुक्षिद्वितयं ततश्च पार्श्वद्वयं तथा जठरम् ।
मध्यं त्रिवलीरोमावलिसहितं हृदयमथ वक्षः ॥ ५ ॥

अन्वयार्थौ–(नाभिः) टूंडो, (कुक्षिद्वितयम्) बगलें दोनों, (ततः पार्श्वद्वयम्) तिसकी पांसू दोनों, (तथा जठरम्) और पेट, (मध्यम् त्रिवली) बीचकी सलवटें (रोमावलीसहितम्) बालोंकी पंगतिसहित (हृदयम्) नाभिके ऊपर (अथ वक्षः) बगल आदि अंग हैं ॥ ५ ॥

उरसिजजत्रुयुगलं तदनु स्कन्धयोर्युग्मम् ।
अंसद्वयमथ कक्षाद्वितयं भुजयोस्तथा द्वन्द्वम् ॥ ६ ॥

अन्वयार्थौ-(उरसिजम्) चूँची (जत्रुयुगलम्) कंधोंकी हँसली (तदनु स्कंधयोर्युग्मम्) तिस पीछे दोनों कंधे (अंसद्वयम्) कंधोंके दोनों भाग (अथ कक्षाद्वितयम्) ये दोनों कांखें (तथा भुजयोर्द्वन्द्वम्) और दोनों भुजा जानिये ॥ ६ ॥

मणिबन्धपाणियुगलं तस्य च पृष्ठं तलं ततो रेखा ।
अङ्गुष्ठोङ्गुल्यो नखलक्षणमथ चानुपूर्विकया वक्ष्ये ॥ ७ ॥

अन्वयार्थौ-(मणिबन्धः) पहुँचा (पाणियुगलम्) दोनों हाथ (तस्य पृष्ठम्) तिस हथेलीकी पीठ (तलम्) हथेली (ततो रेखा) तिसके पीछे रेखा (अंगुष्ठः) अंगूठा (अगुलयः) अंगुली नख आदि अंगके लक्षण क्रमपूर्वक कहेंगे ॥ ७ ॥

कृकाटिकाऽथ कण्ठश्चिबुकं कपोलयुगलं च ।
वक्त्रमधरोत्तरोष्ठा दन्ता जिह्वा ततश्च तालु ॥ ८ ॥

अन्वयार्थौ-(ककाटिका) गलेकी घंटी (कंठः) गला (चिबुकम्) ठोढी (कपोलयुगलम्) दोनों गाल (वक्त्रम्) मुख (अधरोत्तरोष्ठौ) ऊपर नीचेके होंठ (दन्ताः) दाँत (जिह्वा) जीभ (ततश्च तालु) तिसके बाद तालु आदि अंग जानिये ॥ ८ ॥

घण्टी हसितं नासा क्षुतमक्षिद्वितयमथ च पक्ष्माणि ।
भ्रूकर्णयुगललाटं सीमन्तः शीर्षमथ केशाः ॥ ९ ॥

अन्वयार्थौ-(घंटी) ललवेके ऊपरका भाग (हसितम्) हंसना (नासा) नाक (क्षुतम्) छींक (अक्षिद्वितयम्) आँखें दोनों, (पक्ष्माणि) नेत्रोंकी बरौनि तथा बाफणी (भ्रूः) भौंह, (कर्णयुगम्) दोनों कान (ललाटम्) लिलार, (सीमंतः) बालोंकी मांग, (शीर्षम्) शीस, (अथ केशाः) बाल आदि अंग हैं ॥ ९ ॥

अथ पादतलम् ।

पादतलमुष्णमरुणं समांसलं मृदु समं स्निग्धम् ।
सुप्रतिष्ठितं यासां स्त्रीणां भोगप्रतिष्ठायै ॥ १० ॥

अन्वयार्थौ-(यासां स्त्रीणाम् पादतलम् उष्णमरुणं समांसलं मृदु समं स्निग्धं सुप्रतिष्ठितं भवति तासां भोगप्रतिष्ठायै भवति) जिन स्त्रियोंका पैरका तलुवा गरम, लाल, मांससे भरा, नरम, बराबर, चिकना, एकसा बैठा जाय ऐसा होवे तो उन स्त्रियोंके भोग और प्रतिष्ठा अर्थात् बडाइक लिये होता है ॥ १० ॥

रूक्षं खरं विवर्णं चरणतलं भवति भोगनाशाय ।
असितं दौर्भाग्याय श्वेतं दुःखाय योषाणाम् ॥ ११ ॥

अन्वयार्थौ-(रूक्षं खरं विवर्णं चरणतलं भोगनाशाय भवति,) रूखा, खरदरा, बुरे रंगका ऐसा पाँवका तलुवा भोगोंके नाश करनेके लिये होताहै और (योषाणां पादतलमसितं दौर्भाग्याय भवति) स्त्रियोंके पांवका तलुवा जो काला होय तो अभाग्यके लिये होताहै और (श्वेतं दुःखाय भवति) जो सफेद होय तो दुःखके लिये होताहै ॥ ११ ॥

शूर्पाकृतिभिः श्वेतैः कुटिलैः स्युर्दुर्भगाश्चरणतलैः ।
शुष्कैर्निःस्वा विषमैः शोकजुषो दुःखिताऽमृदुभिः ॥ १२ ॥

अन्वयार्थौ-(शूर्पाकृतिभिः श्वेतैः कुटिलैः चरणतलैः नार्यो दुर्भगा स्युः) जो सूपके आकार और सफेद टेढा ऐसा पाँवका तलुवा होय तो स्त्री कुरूपा और अभागिनी होतीहै और (शुष्कैः निस्स्वाः भवंति) जो सूखा होय तो दरिद्रिणी होय और (विषमैः शोकजुषो भवन्ति) जो टेढा और ऊंचा नीचा होय तो शोकका सेवन करनेवाली होय और (अमृदुभिः दुःखिताः भवंति) जो कडा होय तो दुःखी होतीहैं ॥ १२ ॥

चक्रस्वस्तिकशङ्खध्वजाङ्कुशच्छत्रमीनमकराद्याः ।
जायन्ते पादतले यस्याः सा राजपत्नी स्यात् ॥ १३ ॥

अन्वयार्थौ-(यस्याः पादतले चक्र-स्वस्तिक-शख-ध्वज-अंकुश-छत्र-मीन-मकराद्याः जायन्ते सा राजपत्नी स्यात्) । जिस स्त्रीके पाँवके तलुवेमें चक्र, सांथियां, शंख, ध्वजा, अंकुश, छत्र, मछली, मगरको आदि ले करिके ये शुभ रेखा होंय सो शुभ स्त्री राजाकी रानी होतीहै ॥ १३ ॥

चक्रादिचिह्नमध्ये स्यादेकं द्वे बहूनि वा यासाम् ।
ऐश्वर्यसौख्यमपि वा तासां तदनुमानेन ॥ १४ ॥

अन्वयार्थौ-(यासां चक्रादिचिह्नमध्ये एकं स्यात् द्वे वा बहूनि संति तदनुमानेन तासामैश्वर्यसौख्यमपि स्यात्) जिन स्त्रियोंके चक्रादि चिह्नों-मेंसे एक होय वा दो वा बहुत होंय-तिनके अनुमान करिके तिन्हीं स्त्रियोंको ऐश्वर्य और सौख्य होताहै ॥ १४ ॥

ऊर्ध्वा रेखांघ्रितले यावन्मध्याङ्गुलिगता यस्याः ।
सा लभते पतिमाढ्यं प्रिया पुनर्भवति तस्यापि ॥ १५ ॥

अन्वयार्थौ-(यस्याः अंघ्रितले ऊर्ध्वा रेखा यावत् मध्यांगुलिगता भवति सा आढ्यं पतिं लभते पुनः तस्यापि प्रिया भवति) जिस स्त्रीके पाँवके तलुवेमें जो ऊर्ध्व रेखा जितनी बीचकी अंगुलीतक गई होय सो स्त्री धन-वान् पतिको पातीहै और सोई तिसकी प्यारी होतीहै ॥ १५ ॥

श्वशृगालमहिषमूषककाकोलूकाहिकोकक्रमाद्याः ।
चरणतले जायन्ते यस्याः सा दुःखमाप्नोति ॥ १६ ॥

अन्वयार्थौ-(यस्याः चरणतले श्वशृगालमहिषमूषककाकोलूकाहि-कोककरभाद्या जायन्ते सा दुःखमाप्नोति) जिस स्त्रीके पावके तलुवेमें कुत्ता, गीदडी, भैंसा, चूहा, कौवा, उल्लू, सर्प, भेडिया, ऊँट आदिके चिह्न होंय सो स्त्री दुःख पाती है ॥ १६ ॥

अथाङ्गुष्ठः ।

मांसोपचिताङ्गुष्ठः समुन्नतो वर्तुलः शुभो यः स्यात् ।
ह्रस्वश्चिपिटो वक्रः कुलक्षयाय ध्रुवं स्त्रीणाम् ॥ १७ ॥

अन्वयार्थौ-(यस्याः यः पादांगुष्ठः मांसोपचितः समुन्नतः वर्तुलः स शुभः तथा-ह्रस्वः चिपिटः वक्रः स्त्रीणां ध्रुवं कुलक्षयाय भवति) जिस स्त्रीका जो पाँवका अंगूठा मांससे भरा ऊंचा गोल ऐसा होय सो शुभ है और छोटा चिपटा टेढा होय तो स्त्रियोंका ऐसा अंगूठा कुलका नाश करनेवाला होता है ॥ १७ ॥

वैधव्यं विपुलेन द्वेष्यत्वं स्वल्पवर्तुले स्त्रीणाम् ।
रमणाद्दतायमाना पुनरङ्गुष्ठेनातिदीर्घेण ॥ १८ ॥

अन्वयार्थौ-(स्त्रीणां विपुलेन अंगुष्ठेन वैधव्यं स्यात्) स्त्रियोंके चौडे अँगूठेसे विधवापन होताहै और (स्वल्पवर्तुलेन अंगुष्ठेन द्वेष्यत्वं स्यात्) थोडे गोल अँगूठेसे वैरभाव होताहै और (अतिदीर्घेण अंगुष्ठेन रमणाद्दतायमाना भवति) बहुत लंबे अंगूठेसे स्त्री पतिसे आदर पानेवाली होती है ॥ १८ ॥

अथाङ्गुल्यः ।

मृदवोऽङ्गुल्यः शोणाः पादाम्बुजस्य च कोमलदलानि ।
सरला घनाः सुवृत्ताः समुन्नता भोगलाभाय ॥ १९ ॥

अन्वयार्थौ-(पादांबुजस्य अंगुलयः मृदवः शोणाः अम्बुजस्य कोमलदलानि इव सरलाः घनाः सुवृत्ताः समुन्नताः भोगलाभाय भवंति) पांवकी अंगुलियें नरम, लाल कमलकी पत्तियोंकीसी नरम और सूधी, सघन आस पास गोल, उँचाई लिये ऐसी भोगके लाभके अथ होती हैं ॥ १९ ॥

वितरंति प्रौढभुग्ना दौर्भाग्यत्वं हि किङ्करीत्वं च ।
पृथवः स्थूला दुःखं विरला रूक्षाः पुनर्नैःस्व्यम् ॥ २० ॥

अन्वयार्थौ-(प्रौढभुग्नाः अंगुल्यः दौर्भाग्यत्वं वितरंति) बहुत टेढी अंगुली कुरूपको देती हैं और (पृथवः अंगुल्यः किंकरीत्वं वितरंति) फैली

हुई चौडी अंगुली दासीपनको देती हैं और (स्थूलाः अंगुल्यः दुःखं वितरंति) मोटी अंगुली दुःखको देतीहैं और (विरलाः रूक्षाः अंगुल्यः पुनः नैःस्वं वितरंति) छितरी और रूखी अंगुली फिर दरिद्रपनको देती है२० ॥

पूर्वं वृत्ता यस्यास्तनवोऽङ्गुल्यः परस्परारूढाः ।
हत्वा बहूनपि पतीन् सा दासी जायते नियतम् ॥ २१ ॥

अन्वयार्थौ–(यस्याः अंगुल्यः पूर्वं वृत्ताः तनवः परस्परारूढाः भवंति) जिस स्त्रीकी अंगुली पहले गोल फिर पतली एकके ऊपर एक चढी हुई होय (सा बहून् अपि पतीन् हत्वा नियतं दासी जायते) सो स्त्री बहुत पतिनको मारिके निश्चय करके दासी होती है ॥ २१ ॥

यस्याः पथि प्रयांत्या रेणुकणाः क्षितितलात्समुच्छलन्ति ।
सा च कदापि न शस्ता कुरुते कुटिला विनाशं च ॥ २२ ॥

अन्वयार्थौ–(पथि प्रयांत्या यस्याः क्षितितलात् रेणुकणाः समुच्छलंति) जिसके मार्ग चलनेसे धरतीसे धूलके कण उछलें (सा कदापि न शस्ता) सो स्त्री कभी अच्छी नहीं और (च पुनः सा कुटिला विनाशं कुरुते) सो खोटी स्त्री नाश करती है ॥ २२ ॥

यांत्या नियतं यस्या न स्पृशति कनिष्ठिकाङ्गुली भूमिम् ।
सा हत्वा पतिमाद्यं रहो रमते द्वितीयेन ॥ २३ ॥

अन्वयार्थौ–(यांत्याः यस्याः कनिष्ठिकांगुली नियतं भूमिं न स्पृशति) जिस स्त्रीकी चलती हुई अंगुली निश्चय पृथ्वीको नहीं छुवे (सा आद्यं पतिं हत्वा रहः द्वितीयेन रमते) सो स्त्री पहले पतिको मारिके एकांतमें दूसरे पतिके साथ भोगविलास करती है ॥ २३ ॥

यस्या न स्पृशति भूतलमनामिका सा पतिद्वयं हन्ति ।
अतिहीनायां तस्यां नित्यं कलहप्रिया सा च ॥ २४ ॥

अन्वयार्थौ–(यस्याः अनामिका भूतलं न स्पृशति) जिस स्त्रीकी अनामिका अंगुली चलतेमें धरतीसे न लगे (सा पतिद्वयं हन्ति) सो दो

पतिको मारतीहै (तस्यामतिहीनायां सत्यां सा नित्यं कलहप्रिया भवति) तिसके अत्यंत छोटे होनेसे सो स्त्री नित्यही कलहकी प्यारी होतीहै॥ २४॥

हीना मध्या यस्याः सा योषित्पौरुषं करोति सततम् ।
अस्पृष्टायां भुवि तस्यां मारयति पुनः पतित्रितयम्॥२५॥

अन्वयार्थौ-(यस्याः मध्या हीना भवति सा योषित् सततं पौरुषं करोति) जिस स्त्रीके पांवकी बीचकी अंगुली छोटी होय सो स्त्री निरंतर पराक्रमको करतीहै (पुनः भुवि तस्यामस्पृष्टायां सा योषित् पतित्रितयं मारयति) और जो धरतीको बीचकी अंगुलि न छुए सो स्त्री तीन पतिको मारती है ॥ २५ ॥

अङ्गुष्ठादधिका स्याद्यस्याः पादप्रदेशिनी नियतम् ।
सा भवति दुश्चारित्रा कन्यैव च कोऽत्र सन्देहः ॥ २६ ॥

अन्वयार्थौ-(यस्याः पादप्रदेशिनी नियतमंगुष्ठात् अधिका स्यात्) जिस स्त्रीके पांवके अँगूठेके पासकी अंगुली अंगूठेसे निश्चय बडी होंय (सा कन्या एव दुश्चरित्रा भवति अत्र कः संदेहः) सो कन्याहीपनमें व्यभिचारिणी होतीहै इसमें क्या संदेह है ॥ २६ ॥

अथ नखलक्षणम् ।

आताम्ररुचयः स्निग्धाः समुन्नताः शुभा नखराः ।
वृत्ता मसृणाः स्त्रीणां न पुनः शस्ता विपर्यस्ताः ॥ २७ ॥

अन्वयार्थौ-(आताम्ररुचयः स्निग्धाः समुन्नताः वृत्ताः मसृणाः स्त्रीणां नखराः शुभाः) कुछ लाल है रंग जिनके अच्छे चमकदार उंच गोल चिकने ऐसे स्त्रियोंके नख अच्छे हैं और (पुनः विपर्यस्ताः न शस्ताः) इससे विपरीत जो होयँ तो अच्छे नहीं हैं ॥ २७ ॥

अथ पृष्ठलक्षणम् ।

कमठोन्नतेन मृदुना चेच्छिराराहितेन पीनेन ।
राज्ञीत्वं पृष्ठेन न स्त्रीणां स्यात्पादपीठेन ॥ २८ ॥

अन्वयार्थौ–(कमठोन्नतेन मृदुना चेत् शिरारहितेन पीनेन एतादृशेन पृष्ठेन स्त्रीणां मध्ये राज्ञीत्वं स्यात् पादपीठेन पृष्ठेन न) कछुवेकीसी ऊँची मुलायम और नसें नहीं निकली होयँ और मोटी ऐसी पीठसे स्त्रियोंके बीचमें स्त्री रानी होतीहै और चौकीकीसी भाँतिसे पीठ होय तो रानीपन नहीं होय ॥ २८ ॥

रोमान्वितेन दासी निर्मांसेनाधमा भवति नारी ।
मध्यनतेन दरिद्रा दौर्भाग्यवती शिरालेन ॥ २९ ॥

अन्वयार्थौ–(रोमान्वितेन पृष्ठेन दासी भवति) जिसकी पीठपर रोम बहुत होंय वह दासी होय और (निर्मांसेन पृष्ठेन नारी अधमा भवति) जो मांसरहित पीठ होय तो वह स्त्री नीच होती है और (मध्यनतेन पृष्ठेन दरिद्रा भवति) जो बीचमें नीची पीठ होय तो दरिद्रिणी होय और (शिरालेन पृष्ठेन नारी दौर्भाग्यवती भवति) जिसमें नसें निकली हुई चमकती होयँ ऐसी पीठवाली स्त्री अभागिनी होती है ॥ २९ ॥

अथ गुल्फलक्षणम् ।

गूढौ सुखाय गुल्फौ वर्तुलौ शिरारहितावशिथिलौ ।
विषमौ विकटौ ख्यातौ गुल्फौ दौर्भाग्याय नियतम् ॥ ३० ॥

अन्वयार्थौ–(गूढौ वर्तुलौ शिरारहितौ अशिथिलौ एतादृशौ गुल्फौ सुखाय भवतः) मांससे दबेहुए गोलाई लिये नसें न प्रगट होयँ जिसमें और ढीले नहीं कडे होंय तो ऐसी टंघनेवाली स्त्री सुखी रहतीहै आर (विषमौ विकटौ ख्यातौ एतादृशौ गुल्फौ नियतं दौर्भाग्याय भवतः) जो ऊंचे नीचे कडे प्रकट होंय तो ऐसी टंघनेवाली स्त्री निश्चय अभागिनी रहतीहै ॥ ३० ॥

अथ पार्ष्णिलक्षणम् ।

सौख्यवती समपार्ष्णिः पृथुपार्ष्णिर्दुर्भगा नारी ।
उन्नतपार्ष्णिः कुलटा दुःखवती दीर्घपार्ष्णिः स्यात् ॥ ३१ ॥

अन्वयार्थौ–(समपार्ष्णिः नारी सौख्यवती स्यात्) बराबर पाँवक फावेवाली स्त्री सुखी रहे और (पृथुपार्ष्णिः नारी दुर्भगा स्यात्) जो चौडे छितरे पाँवके फावेवाली स्त्री होय वह कुरूपिणी होतीहै और (उन्नतपार्ष्णिः नारी कुलटा स्यात्) ऊंचे पाँवके फावेवाली स्त्री व्यभिचारिणी अर्थात् घरघर फिरनेवाली होतीहै और (दीर्घपार्ष्णिः नारी दुःखवती स्यात्) लंबे पाँवके फावेवाली स्त्री दुःखी रहतीहै ॥ ३१ ॥ प्रथमदशी पूर्णा ।

अथ जंघालक्षणम् ।

स्निग्ध रोमविहीने यस्याः क्रमवर्तुले समे विशिरे ।
पादाम्बुजमाले इव जङ्घे सा भवति नृपपत्नी ॥ ३२ ॥

अन्वयार्थौ–(यस्याः जंघे स्निग्धे रोमविहीने क्रमवर्तुले समे विशिरे पादांबुजमाले इव सा नृपपत्नी भवति) जिस स्त्रीकी पिंडली अच्छी चिकनी रोमरहित, क्रमसे गोल बराबर नसें न चमकती हों और चरणकमलकीसी माला होय सो राजाकी रानी होती है ॥ ३२ ॥

शुष्के पृथू विशाले शिरान्विते स्थूलपिण्डके यस्याः ।
जङ्घे मांसोपचिते श्लथजानू पांसुला सा स्यात् ॥ ३३ ॥

अन्वयार्थौ–(यस्याः जंघे पृथू विशाले शिरान्विते शुष्के मांसोपचिते श्लथजानू स्थूलपिण्डके भवतः सा पांसुला स्यात्) जिस स्त्रीकी पिंडली चौडी, बडा, नसें चमकती हुई सूखी थोडे मांसकी ढीले हैं घुटनेके ऊपरक भाग जिनमें और मोटे पिण्ड होंय सो स्त्री व्यभिचारिणी होती है ॥ ३३ ॥

जङ्घे खररोमे वै वायसजंघोपमेऽथवा यस्याः ।
मारयति पतिं यदि वा प्रायः सा स्वैरिणी भवति ॥ ३४ ॥

अन्वयार्थौ–(यस्याः जंघे खररोमे वा वायसजंघोपमे वै भवतः सा पतिं मारयति) जिस स्त्रीकी पिंडली खरदरे रोमवाली अथवा कौवेकी पिंड-

स्त्रीके तुल्य जो निश्चय करके होयँ सो स्त्री पतिको मारतीहै और (यदि वा प्रायः स्वैरिणी भवति) जो बहुधा करके व्यभिचारिणी होती है ॥ ३४ ॥

एकैकमेव भूपतिपत्नीनां रोमकूपेषु रोम स्यात् ।
सामान्यानामथवा द्वित्र्यादीनि तथैव विधवानाम् ॥ ३५ ॥

अन्वयार्थौ-(भूपतिपत्नीनां रोमकूपेषु एकैकमेव रोम स्यात्) राजाओंकी रानीके बालोंके छेदोंमें एकही एक रोम होताहै और (सामान्यानाम् अथवा विधवानां रोमकूपेषु तथैव द्वित्र्यादीनि रोमाणि भवन्ति) जो सामान्य और स्त्रियोंके अथवा विधवाओंके उन्हीं बालोंके छेदोंमें दो तीन आदि करके रोम होतेहैं ॥ ३५ ॥

अथ जानुकथनम् ।

यस्या जानुयुगं स्यादनुल्बणं पिशितमग्नमतिवृत्तम् ।
सा लक्ष्मीरिव नियतं सौभाग्यसमन्विता वनिता ॥ ३६ ॥

अन्वयार्थौ-(यस्याः जानुयुगम् अनुल्बणं पिशितमग्नमतिवृत्तं स्यात्) जिस स्त्रीके दोनों घुटनोंके ऊपरके भाग बडे और बुरे न होयँ और मांसमें गढे और बहुत गोल होयँ (सा वनिता नियतं सौभाग्यसमन्विता लक्ष्मीरिव भवति) सो निश्चय करिके सौभाग्य युक्त लक्ष्मीकी भांति होतीहै ॥ ३६ ॥

निर्मांसैः स्वैरिण्यो विविधाभैः सदाध्वगा नार्यः ।
विश्लिष्टैर्धनहीना जायन्ते जानुभिः प्रायः ॥ ३७ ॥

अन्वयार्थौ-(निर्मांसैः जानुभिः नार्यः स्वैरिण्यो भवन्ति) थोडे मांसवाली जानु करके स्त्री व्यभिचारिणी होतीहैं और (विविधाभैः नार्यः सदाऽध्वगा भवन्ति) अनेक सूरतकी जानु करके स्त्री सदा मार्ग चलनेवाली होती है और (विश्लिष्टैः जानुभिः नार्यः प्रायः धनहीनाः जायन्ते) जो छितरीसी जानुवाली होयँ वे स्त्री बहुधा धनहीन होतीहैं ॥ ३७ ॥

अथोरुकथनम् ।

मदनगृहस्तंभौ यौ कदलीकाण्डोपमावूरू ।
यस्याः करिकरवृत्तावरोमशौ भूपपत्नी स्यात् ॥ ३८ ॥

अन्वयार्थौ-(यस्याः यौ ऊरू मदनगृहस्तंभौ कदलीकाण्डोपमौ करिकरवृत्तौ अरोमशौ सा भूपपत्नी स्यात्) जिस स्त्रीकी जो दोनों जाँघें कामदेवके घरके खंभे केलेके वृक्षके तुल्य और हाथीकी सूंडकी बराबर गोल और रोमरहित होयँ सो राजाकी स्त्री अर्थात् रानी होती है ॥ ३८ ॥

मांसोपचितैर्विशिरैः कलभकरोपमैररोमभिर्मृदुभिः ।
आसादयन्ति सततं मदनक्रीडासुखं नार्याः ॥ ३९ ॥

अन्वयार्थौ-(नार्याः मांसोपचितैः विशिरैः अरोमभिः घनैः मृदुभिः कलभकरोपमैः ऊरुभिः सततं मदनक्रीडासुखम् आसादयन्ति) जिन स्त्रियोंकी दोनों जाँघें मांससे भरीहुई नसें चमकती न होयँ रोमरहित होंय मोटी कोमल हाथीकी सूंडके तुल्य होयँ तो ऐसी जाँघोंसे स्त्री निरंतर कामदेवके सुखको भोगती है ॥ ३९ ॥

चलमांसैर्दौर्भाग्यं वैधव्यं लोमशैः खरैर्नैःस्व्यम् ।
मध्यक्षुद्रैर्दुःखं तनुभिर्वधमूरुभिर्याति ॥ ४० ॥

अन्वयार्थौ-(चलमांसैः ऊरुभिः नारी दौर्भाग्यं याति) मांससे ढीली दोनों जाँघें जो स्त्रीकी होयँ तो अभागिनी होती है और (लोमशैः खरैरूरुभिः नारी नैःस्व्यं वा वैधव्यं याति) रोमों सहित खरदरी जाँघोंसे स्त्री दरिद्रिणी और विधवा होतीहै और(मध्यक्षुद्रैः तनुभिरूरुभिः नारी दुःखं तथा वधं याति) बीचमें छोटी और पतली जाँघों करके स्त्री दुःख और मरणको पाती है ॥ ४० ॥ इति द्वितीयदशी पूर्णा ।

अथ कटिलक्षणकथनम् ।

दक्षा चतुरन्वितविंशत्यङ्गुलविनता कटिः समा कठिना ।
उन्नतनितम्बबिम्बा चतुरस्रा शोभना स्त्रीणाम् ॥ ४१ ॥

अन्वयार्थौ—(स्त्रीणां कटिः चतुरन्वितविंशत्यंगुलविनता समा कठिना उन्नतनितम्बबिम्बा चतुरस्रा शोभना दक्षा भवति) स्त्रियोंकी कमर जो २४ अंगुलकी झुकीहुई बराबर कड़ी और ऊंचे हैं कूले जिसके और चौकोर ऐसी कमर शोभायमान अच्छी होती है ॥ ४१ ॥

विनता दीर्घा चिपिटा निर्मांसा सङ्कटा कटिर्विकटा ।
ह्रस्वा रोमयुता या सा वनिता दौर्भाग्यदुःखकरी ॥ ४२ ॥

अन्वयार्थौ—(स्त्रीणां या कटिः विनता दीर्घा चिपिटा निर्मांसा संकटा विकटा ह्रस्वा रोमयुक्ता स्यात्, सा वनिता दौर्भाग्यदुःखकरी भवति) स्त्रियोंकी कमर जो बहुत झुकीहुई और लंबी चपटी मांसरहित सूखी भयंकर बुरी छोटी रोमयुक्त होय सो कमर स्त्रियोंकी अभाग्य और दुःखकी करनेवाली होती है ॥ ४२ ॥

अथ नितम्बबिम्बलक्षणम् ।

सुदृशां नितम्बबिम्बः समुन्नतो मांसलः पृथुः पीनः ।
स्मरभूपस्य सुवर्णक्रीडाचुलुक इव रतिनिमित्तम् ॥ ४३ ॥

अन्वयार्थौ—(सुदृशां नितम्बबिंबः समुन्नतः मांसलः पृथुः पीनः स्यात् रतिनिमित्तं स्मरभूपस्य सुवर्णक्रीडाचुलुक इव) स्त्रियोंके कूले बराबर ऊंचे मांससे भरे चौडे मोटे होंय तो रति करनेके निमित्त कामदेव राजाके खेलनेका मानों सुवर्णका बाजा है ॥ ४३ ॥

विकटश्चिपिटो नतिमान्निर्मांसो रोमशः खरः शुष्कः ।
कुरुते नितम्बफलको दरिद्रतां दुःखदौर्भाग्यम् ॥ ४४ ॥

अन्वयार्थौ—(विकटः चिपिटः नतिमान् निर्मांसः रोमशः खरः शुष्कः नितम्बफलकः दरिद्रतां वा दुःखदौर्भाग्यं कुरुते) भयानक चिपटे

झुकेहुए नीचे थोडे मांसके रोमवाले खरदरे सूखे ऐसे जो कूले होंय तो दरिद्री वा दुःख वा अभाग्यको करते हैं ॥ ४४ ॥

अथ स्फिक्कथनम् ।

वलिभिर्मुक्तौ पीनौ कपित्थफलवर्तुलौ स्फिचौ नार्याः ।
मृदुलौ घनमांसयुतौ रतिसौख्यं वितरतः सततम् ॥ ४५ ॥

अन्वयार्थौ-(वलिभिर्मुक्तौ पीनौ कपित्थफलवर्तुलौ मृदुलौ घनमांसयुतौ नार्याः स्फिचौ सततं रतिसौख्यं वितरतः) विना सलवटके कडे मांसके कैथके फलके तुल्य गोल कोमल बहुत मांसयुक्त जो स्त्रीकी कमरके दोनों ओरके मासके पिण्ड होंय तो निरंतर रतिकी सुखको देते हैं ॥ ४५॥

परुषं रूक्षं चिपिटं स्फिग्युग्मं मांसरहितं न शुभम् ।
तदपि च विलम्बमानं धत्ते वैधव्यमाचिरेण ॥ ४६ ॥

अन्वयार्थौ-(परुषं रूक्षं चिपिटं मांसरहितं स्फिग्युग्मं शुभं न) खरदरे रूखे चिपटे मांसरहित जो कमरके दोनों ओरके पिंड होंय तो शुभ नहीं है और (तदपि स्फिग्युग्मं विलम्बमानं भवति तर्हि अचिरेण वैधव्यं धत्ते) जो वही दोनों ओरके मांसके पिंड लम्बे और लटकते ढीले होंय तो शीघ्रही विधवापनको करते हैं ॥ ४६ ॥

प्राक् सव्येन निषीदति पदेन सा सुखं सदा लभते ।
या पुनरपसव्येन स्फुटं सा कष्टमेणाक्षी ॥ ४७ ॥

अन्वयार्थौ-(या एणाक्षी प्राक् सव्येन पदेन निषीदति सा सदा सुखं लभते) जो स्त्री पहले बायें पगकरके बैठे सो सदा सुखको पाती है और (या अपसव्येन निषीदति सा स्फुटं कष्टं लभते) जो पहले दाहिनी पगसे बैठे सो प्रकट दुःखको पाती है ॥ ४७ ॥

अथ भगलक्षणम् ।

अश्वत्थदलाकारः कुंभिस्कंधोपमो भगः पृथुलः ।
पूर्णेन्दुबिम्बतुल्यः कच्छपपृष्ठः शुभः सुदृशाम् ॥ ४८ ॥

अन्वयार्थौ–(अश्वत्थदलाकारः कुंभिस्कंधोपमः पृथुलः पूर्णेन्दुबिम्ब-तुल्यः कच्छपपृष्ठः एतादृशः सुदृशां भगः शुभः) पीपलके पत्तेके आकार और हाथीके कंधेके तुल्य चौडी मांसल चंद्रमाके बिम्बके तुल्य कछुवेकी पीठकीसी ऐसी स्त्रियोंकी योनि होय तो शुभ है अच्छी है ॥ ४८ ॥

स्निग्धो मृदुकृशरोमा मांसोपचितो भगो भवेद्यस्याः ।
सा पुत्रवती नियतं लभते रतिसौख्यसौभाग्यम् ॥ ४९ ॥

अन्वयार्थौ–(यस्याः भगः स्निग्धः मृदुकृशरोमा मांसोपचितः भवेत्) जिस स्त्रीकी योनि अच्छी चिकनी नरम और थोडे हैं रोम जिसपर-मांससे भरी हुई होय (सा पुत्रवती नियतं वा रतिसौख्यसौभाग्यं लभते) सो पुत्रवती निश्चय होय और रतिके सुख और सौभाग्यको पाती है ॥ ४९ ॥

नियतं भगोऽङ्गनायाः प्रसूयते दक्षिणोन्नतः पुत्रान् ।
वामोन्नतस्तु कन्या जगति समुद्रस्य वचनमिदम् ॥ ५० ॥

अन्वयार्थौ–(यस्याः अङ्गनायाः भगः नियतं दक्षिणोन्नतः स्यात् सा पुत्रान् प्रसूयते) जिस स्त्रीकी योनि निश्चय दाहिनी ओरको ऊंची होय सो पुत्रोंको उत्पन्न करै है और (वामोन्नतः भगः कन्याः प्रसूयते) जो बाँई ओरकी योनि ऊँची होतो कन्याओंको उत्पन्न करे (जगति इदं समुद्रस्य वचनम्) लोकमें यह समुद्रका वचन है ॥ ५० ॥

यस्याः स्याच्चतुरस्रा कच्छपपृष्ठा स्थिरा श्रोणी ।
सा वै प्रबलान्पुरुषान्रोहिणी भूरिव रमणी सूते ॥ ५१ ॥

अन्वयार्थौ–(यस्याः श्रोणी चतुरस्रा कच्छपपृष्ठा स्थिरा स्यात्)जिस स्त्रीकी योनि चौकोन और कछुवेकी पीठके तुल्य उठी हुई कडी होय(सा रमणी रोहिणी भूरिव वै प्रबलान् पुरुषान् सूते) सो स्त्री रोहिणी और पृथ्वीकी भाँति प्रबल पुरुषोंको उत्पन्न करै है ॥ ५१ ॥

बहुलोर्ध्वकृष्णरोमा सुश्लिष्टः संहितो भगः शस्तः ।
गूढमणिश्चिंतामणिरिव भुवि विततं धनं तनुते ॥ ५२ ॥

अन्वयार्थौ–(बहुलोर्ध्वकृष्णरोमा सुश्लिष्टः संहितः गूढमणिः भगः शस्तः) बहुत हैं ऊंचे काले रोम जिसपै और मिलीहुई अच्छी बनावटकी और छीपी है मणि कहिये टोटनी जिसकी ऐसी योनि अच्छी होती है (सः भगः भुवि चिंतामणिरिव विततं धनं तनुते) वही योनि पृथ्वीमें चिंतामणिकी भाँति बहुत धनको पैदा करती है ॥ ५२ ॥

विस्तीर्णोऽम्बुजवर्णो मृदुतनुरोमाल्पनासिकस्तुङ्गः ।
द्विरदस्कन्धसमः स्यात्स्त्रीणां षडमी भगाः सुभगाः ॥ ५३ ॥

अन्वयार्थौ–(विस्तीर्णः अम्बुजवर्णः मृदुतनुरोमा अल्पनासिकः तुङ्गः द्विरदस्कन्धसमः स्त्रीणाममी षट् भगाः सुभगाः) चौडी और कमलके रंग, नरम, थोडे रोमवाली और छोटीहै नाशिका जिसकी, ऊंची हाथीके कंधेकी समान, स्त्रियोंकी ऐसी यह छः योनि अच्छी होतीहैं ॥ ५३ ॥

रुचिरोऽत्युष्णः सुघनो गोजिह्वाकर्कशोऽथवा मृदुलः ।
अत्यन्तसुसंवृत्तः सुगंधिश्च सप्त भगा वर्द्धयंति रतिम् ॥ ५४ ॥

अन्वयार्थौ–(रुचिरः अत्युष्णः सुघनः गोजिह्वाकर्कशः मृदुलः अत्यंतसुसंवृत्तः सुगंधिः एते सप्त भगाः रतिं वर्द्धयंति) अच्छी, बहुत गरम, कडी, गायकी जीभकीसी खरदरी, नरम, बहुत गोल, अच्छी गंधवाली-ये सात प्रकारकी योनि सुखभोगको बढातीहै ॥ ५४ ॥

विस्पष्टः स्थूलमणिः सङ्कीर्णः खर्पराकृतिः स्त्रीणाम् ।
खरकुटिलः खररोमा मांसविहीनो भगो न शुभः ॥ ५५ ॥

अन्वयार्थौ–(विस्पष्टः स्थूलमणिः संकीर्णः खर्पराकृतिः खरकुटिलः खररोमा मांसविहीनः स्त्रीणामीदृशो भगः न शुभः) दीखे है मोटी मणि जिसमें, सँकडी, खपरेके आकार, खरदरी, टेढी, खरदरे मोटे बाल, मांसरहित सूखीसी-ऐसी स्त्रियोंकी योनि शुभ नहीं है ॥ ५५ ॥

---

१ विपुलम् इति पाठान्तरम् ।

चुल्लीकोटरतुल्यस्तिलपुष्पनिभः कुरङ्गखुररूपः ।
विश्वप्रेष्यां निःस्वां प्रकुर्वते त्रयो भगाः स्त्रियं नूनम् ॥५६॥

अन्वयार्थौ-(चुल्लीकोटरतुल्यः तिलपुष्पनिभः कुरंगखुररूपः एते त्रयो भगाः स्त्रियं नूनं विश्वप्रेष्यां निःस्वां प्रकुर्वते) चुल्हेसी, वृक्षकी खोडरके तुल्य और तिलके फूलके तुल्य और हिरणकी खुरीके आकार ऐसी तीन प्रकारकी योनि स्त्रीको निश्चय पूरी टहलनी चलनेवाली और दरिद्रिणी करती हैं ॥ ५६ ॥

विवृतमुखो नारीणामुलूखलाभो भगः सुदुर्गन्धः ।
कुञ्जररोमा सततं कुरुते दुःशैल्यदौर्भाग्यम् ॥ ५७ ॥

अन्वयार्थौ-(विवृतमुखः उलूखलाभः सुदुर्गन्धः कुञ्जररोमा एतादृशः नारीणां भगः सततं दुःशैल्यदौर्भाग्यं कुरुते) खुले हुए मुखकी ओखलीसी बुरी गंधवाली हाथीकेसे रोम होंय तो ऐसी स्त्रियोंकी योनि निरंतर दुःख और अभाग्यको करे है ॥ ५७ ॥

श्रोणीबिम्बेनालं सत्कीचकनवदलसमश्रिया नारी ।
सुखिता प्रायः प्रथमे पश्चात्सा दुःखिता भवति ॥ ५८ ॥

अन्वयार्थौ-(सत्कीचकनवदलसमश्रिया श्रोणीबिम्बेन नारी प्रायः प्रथममलं सुखिता भवेत् सा पश्चाद्दुःखिता भवति) बाँसके नवीन पत्तेकीसी है शोभा जिसकी ऐसी योनि करके स्त्री बहुधा पहले तो सुख पाती है और पीछे दुःखको प्राप्त होती है ॥ ५८ ॥

शंखावर्त्तसमाना श्रोणी प्रायः प्रजायते यस्याः ।
धारयति सा न गर्भं निषेव्यमाणा च दुःखकरा ॥५९॥

अन्वयार्थौ-(यस्याः श्रोणी शंखावर्त्तसमाना प्रायः प्रजायते सा गर्भं न धारयति) जिस स्त्रीकी योनि शंखके आकार होय सो गर्भको नहीं धारण करै है और (सा निषेव्यमाणा सती दुःखकरा भवेत्) वह सेवन करी हुई भी दुःखकी करनेवाली होती है ॥ ५९ ॥

वेतसपर्णसमानः सङ्कीर्णः श्रोणिबिम्ब इव यस्याः ।
असती सा न कदाचन कल्याणपरंपरा नियतम् ॥ ६० ॥

अन्वयार्थौ–(यस्याः संकीर्णः श्रोणिबिम्बः वेतसपर्णसमान इव भवेत्) जिस स्त्रीकी सँकडी योनि वेंतके पत्तेकी समान होय (सा असती) सो स्त्री अच्छी नहीं होगी और (कदाचन नियतं कल्याणपरंपरा न) कभीभी निश्चय करके भलाईकी करनेवाली नहीं है ॥ ६० ॥

तनुरेताः खररोमा संक्षिप्तो दीर्घनासिको विकटः ।
विवृतास्यो नारीणां जगति भगा दुर्भगाः षडमी ॥ ६१ ॥

अन्वयार्थौ–(नारीणां जगति अमी षड् भगाः दुर्भगाः भवन्ति) स्त्रियोंकी लोकमें ये छः प्रकारकी योनि बुरी होती हैं (तनुरेताः खररोमा संक्षिप्तः दीर्घनासिकः विकटः विवृतास्यः न शस्तः) थोडे वीर्यवाली खरदरे रोमवाली बहुत छोटी बडी नाकवाली और भयंकर खुले मुखवाली ये अच्छी नहीं हैं ॥ ६१ ॥

वलिसहितोद्भवसहितो प्रलम्बमानोऽथ शीतलः शिथिलः ।
नीचमुखोप्यथ पृथुला सप्तामी रतिषु दुःखकृताः ॥ ६२ ॥

अन्वयार्थौ–(वलिसहितः उद्भवसहितः प्रलम्बमानः शीतलः शिथिलः नीचमुखः पृथुलः रतिषु अमी सप्त भगाः दुःखकृता भवंति) सलवटेंवाली कुछ दिनोंके गर्भवाली लंबी ठंढी पिलपिली लटकीहुइ ढीली चौडी मोटी भोगमें ये ७ प्रकारकी योनि दुःखके करनेवाली हैं ॥ ६२ ॥

जघने भगस्य भालं विस्तीर्णं मांसलं समुत्तुङ्गम् ।
तनुकृष्णमृदुलरोम प्रदक्षिणावर्त्तमिह शस्तम् ॥ ६३ ॥

अन्वयार्थौ–(इह जघने भगस्य भालमेतादशं शस्तम् । विस्तीर्णम् मांसलम् समुत्तुंगम् तनुकृष्णमृदुलरोम प्रदक्षिणावर्त्तम्) इस लोकमें पेडूके ऊपरी भागकी जो भग है उसका जो भाल ऐसा होय तो अच्छा है लंबा, चौडा,

मांसका भरा गुदगुदा, ऊंचा थोडे काले नरम रोमोंसहित दाहिनी ओरको झुकाहुवा-ऐसा भगका भाल अच्छा है ॥ ६३ ॥

विषमं वामावर्त्तं निर्मांसं सङ्कटं खरं विनतम् ।
भवति तदेव स्त्रीणां वैधव्यविधायकं प्रायः ॥ ६४ ॥

अन्वयार्थौ-(स्त्रीणां तदेव भगस्य भालं विषमं वामावर्त्तं निर्मांसं संकटं खरं विनतं भवेत् प्रायः तत् वैधव्यविधायकं भवति) स्त्रियोंका सोई भगका भाल ऊंचा, नीचा बाईं ओरको झुका हुआ, मांसरहित सुकडाहुवा खरदरा झुकाहुवा होय तौ बहुधा करके विधवापनको करने वाला होताहै ॥ ६४ ॥

अथ बस्तिकथनम् ।

विपुला बस्तिः शस्ता युवतीनामीषदुन्नता मृद्वी ।
अभ्युन्नता शराभा लेखा किन्तु रोमशा न शुभा ॥ ६५ ॥

अन्वयार्थौ-(युवतीनां बस्तिः विपुला इषत् उन्नता मृद्वी शस्ता) स्त्रियोंका पेड बडा चौडा थोडा ऊंचा नरम होय तौ अच्छा हैऔर (किन्तु अभ्युन्नता शराभा रोमशा लेखा न शुभा) जो बहुत ऊँचा, तरिके तुल्य बहुत रोमोंकी धारी होय तौ शुभ नहीं हैं ॥ ६५ ॥

इति तृतीयदर्शी पूणा ।

अथ नाभिशुभाशुभलक्षणम् ।

नाभिः शुभा गभीरा सुदृशा वृत्ता प्रदक्षिणावर्ता ।
स्मरनृपमुद्रेवोपरि रतिमणिकोशस्य रमणस्य ॥ ६६ ॥

अन्वयार्थौ-(सुदृशां वृत्ता नाभिः गभीरा प्रदक्षिणावर्ता शुभाः स्त्रियोंकी गोल टूंडी गहरी दाहिनी ओर झुकीहुई शुभ है और (रतिमणिकोशस्य मरणस्य उपरि स्मरनृपमुद्रा इव) रतिके मणिके खजानेके ऊपर पतिकी काम देव राजाने कीहुई मानो मुहर अर्थात् छाप है ॥ ६६ ॥

यस्या विस्तीर्णा स्यान्नवपङ्कजकर्णिकाकृतिर्नाभिः ।
सा स्फुटसौभाग्यधनं लभते सुखसंपदां सपदि ॥ ६७ ॥

अन्वयार्थौ-(यस्याः नाभिः विस्तीर्णा स्फुटनवपङ्कजकर्णिकाकृतिः स्यात्) जिस स्त्रीकी नाभि बहुत लम्बी चौडी है मुख जिसका प्रकट नये-कमलकासा है भीतरी अंकडेदार ऐसा आकार जिसका होय) सा स्त्री सपदि सुखसंपदां सौभाग्यधनं लभते) सो स्त्री शीघ्रही संपूर्ण सुसंपत्तियोंको धन सौभाग्यको पावे ॥ ६७ ॥

नाभिर्गभीरविवरा तरुणजनमनोहरा भवति यस्याः ।
सा जायते मृगाक्षी नियतं पुरुषप्रिया प्रायः ॥ ६८ ॥

अन्वयार्थौ-(यस्याः नाभिः गभीरविवरा तरुणजनमनोहरा भवति) जिस स्त्रीका टूंडी गहरी अच्छी और तरुणजनोंके मनको हरनेवाली होय (सा मृगाक्षी प्रायः नियतं पुरुषप्रिया जायते) सो स्त्री बहुधा निश्चय करके पतिकी प्यारी होती है ॥ ६८ ॥

वामावर्ता यस्या व्यक्ता ग्रंथिः समुत्ताना ।
सा दुर्भगा पुरंध्री विगर्हिता स्यात्परप्रेष्या ॥ ६९ ॥

अन्वयार्थौ-(यस्याः वामावर्त्ता व्यक्ता ग्रंथिः समुत्ताना स्यात्) जिस स्त्रीकी टूंडीकी गांठि अर्थात् टूंड बांई ओरको झुकीहुई प्रकट ऊँची गाँठि होय तौ (सा पुरंध्री विगर्हिता परप्रेष्या तथा दुर्भगा भवति) सो स्त्री निंदा करने योग्य बुरी और दूसरोंकी टहलनी बुरी सूरतवाली होतीहै ॥६९॥

इति नाभिकटिचतुर्दशी पूर्णा ।

अथ कुक्षिः ।

घनतनया जायन्ते सुकुमारैः कुक्षिभिः पृथुभिः ।
मण्डूककुक्षिरबला धन्या नृपतिं सुतं सूते ॥ ७० ॥

अन्वयार्थौ-(सुकुमारैः पृथुभिः कुक्षिभिः घनतनया जायन्ते) अच्छी

गुलगुली नरम लंबी चौडी कोखों करके बहुत पुत्र होतेहैं और (मंडूककुक्षिः अबला धन्या तथा नृपतिं सुतं सूते) मेंढककीसी कोखसे स्त्री धन्य है और राजपुत्रको उत्पन्न करती है ॥ ७० ॥

वन्ध्या भवन्ति वनिताः कुक्षिभिरत्युन्नतैर्वलिभिः ।
रोमावर्तयुतैस्ताः प्रव्रजिताः पांसुलास्तदा दास्यः ॥ ७१ ॥

अन्वयार्थौ-(वलिभिर्युतैः अत्युन्नतैः कुक्षिभिः वनिताः वध्या भवन्ति) सलवटोंकरके युक्त और बहुत ऊँचीकोखोंकरके स्त्रियां बांझ होतीहैं और (रोमावर्त्तयुतैः कुक्षिभिः तदा ताः वनिताः प्रव्रजिताः पांसुलाः दास्यो भवंति) रोमोंकी भौंरी अर्थात् चक्रकरिके युक्त कोखें होंय तो वेही स्त्रियां वैरागिणी व्यभिचारिणी और दासी होती हैं ॥ ७१ ॥

अथ पार्श्वलक्षणम् ।

मग्नास्थिभिः समांसैः पार्श्वैर्मृदुभिः समैर्मृजावद्भिः ।
या स्यात्तैभिः सहिता प्रीतिसुभगा जगति जायते नियतम् ७२

अन्वयार्थौ-(मग्नास्थिभिः समांसैः मृदुभिः समैः मृजावद्भिः) गडेहुए हैं हाड मांसमें जिसके मुलायम और बराबर, उजले (या स्त्री एतादृशैः पार्श्वैः सहिता स्यात् सा जगति नियतं प्रीतिसुभगा जायते) जो स्त्री ऐसे पाँसुओं सहित होय सो लोकमें निश्चय करके प्रीतियुक्त सौभाग्यवती होतीहै ॥ ७२ ॥

यस्याः सशिरे पार्श्वे समुन्नते रोमसंयुते परुषे ।
सा निरपत्या रमणी भवति प्रायेण दुःशीला ॥ ७३ ॥

अन्वयार्थौ-(यस्याः पार्श्व सशिरे समुन्नते रोमसंयुते परुषे भवतः) जिस स्त्रीकी पांसू नसोंसहित और ऊँची; रोमसहित खरदरी होंय (सा रमणी निरपत्या प्रायेण दुःशिला भवति) सो स्त्री संतानरहित बहुधा खोटे स्वभाववाली होतीहै ॥ ७३ ॥

अथोदरलक्षणम् ।

उदरेण मार्दववता तनुत्वचा पीननाभिसहितेन ।
रोमरहितेन नारी नराधिपतिवल्लभा भवति ॥ ७४ ॥

अन्वयार्थौ–(मार्दववता तनुत्वचा पीननाभिसहितेन रोमरहितेन उदरेण नारी नराधिपतिवल्लभा भवति) जिसके पेटमें मुलायमी और पतली खाल अच्छी टूँडीसहित, विना रोमोंके ऐसे उदरकरके स्त्री राजाकी वल्लभा अर्थात् प्यारी होती है ॥ ७४ ॥

तुच्छं दुर्जनमानसमिव जठरं भवति भूपपत्नीनाम् ।
जनहर्षोत्कर्षकरं सज्जनचेष्टितमिव मनोज्ञम् ॥ ७५ ॥

अन्वयार्थौ–(भूपपत्नीनां जठरं दुर्जनमानसमिव तुच्छं भवति) राजाकी रानीका पेट खोटे मनुष्योंके चित्तकी भाँति हलका होता है और (जनहर्षोत्कर्षकरं सज्जनचेष्टितमिव मनोज्ञं भवति) मनुष्योंको हर्ष करनेवाला और अच्छे पुरुषोंकी चेष्टाकी भाँति सुंदर होताहै ॥ ७५ ॥

कुम्भाकारं जठरं निर्मांसं वा शिरायुतं यस्याः ।
अतिदुःखिता क्षुधार्ता सा नारी जायते प्रायः ॥ ७६ ॥

अन्वयार्थौ–(यस्याः जठरं कुंभाकारं निर्मांसं वा शिरायुतं भवति) जिस स्त्रीका उदर घडेके आकार विना मांस वा नसोंकरके युक्त होय (सा नारी प्रायः क्षुधार्ता अतिदुःखिता भवति) सो स्त्री बहुधा भूँखी और अति दुःखी होती है ॥ ७६ ॥

कूष्माण्डफलाकारैरुदरैः पणवोपमैर्मृदङ्गाभैः ।
यवतुल्यैर्दुःशीलाः क्लेशायासं स्त्रियो यान्ति ॥ ७७ ॥

अन्वयार्थौ–(स्त्रियः कूष्माण्डफलाकारैः पणवोपमैः मृदंगाभैः यवतुल्यैः उदरैः दुःशीलाः भवंति तथा क्लेशायासं यान्ति) । स्त्री जे हैं ते कुम्हडाके फलके आकार, तबला और मृदंगके तुल्य और जौके समान उदर करके खोटे आचरणकी होती हैं और क्लेश वा परिश्रमको पाती हैं ॥ ७७ ॥

भवति प्रलम्बमुदरं यस्याः सा श्वशुरमाहन्ति ।
यस्याः पुनर्विशालं चिरापत्या दुर्भगा सापि ॥ ७८ ॥

अन्वयार्थौ-(यस्याः उदरं प्रलम्बं भवति सा श्वशुरम् आहंति) जिस स्त्रीका उदर लम्बा होय तो सो श्वशुरको मारती है और (यस्या उदरं विशालं भवति सा चिरापत्या भवति) जिस स्त्रीका उदर लंबा चौडा होय सो बहुत देरमें संतानवाली होती है और (सा दुर्भगा अपि भवति) सोई खोटी बुरी होती है ॥ ७८ ॥

अथ वलिरोमराजिकथनम् ।

असमपयोधरभाराक्रान्तेव सुबन्धुरं मध्यम् ।
मुष्टिग्राह्यं यस्याः सा सौभाग्यश्रियं श्रयते ॥ ७९ ॥

अन्वयार्थौ-(यस्याः मध्यं मुष्टिग्राह्यं सुबंधुरं भवति, असमपयोधरभाराक्रांता इव सा सौभाग्यश्रियं श्रयते) जिस स्त्रीका मध्यस्थल मुट्ठीमें आजाय ऐसा छोटा सुंदर होय सो स्त्री भारी कुचाक बोझसे मानो दबी हुई सौभाग्यकी शोभा लक्ष्मीको पाती है ॥ ७९ ॥

सुभगानां वै वलयं वलित्रयेणान्वितं समग्रेण ।
नाभीलावण्याब्धेरुत्कलिका भूमिकां वहते ॥ ८० ॥

अन्वयार्थौ-(वै-इति निश्चयेन-सुभगानां वलयं समग्रेण वलित्रयेण अन्वितं भवति) निश्चय कर केसौभाग्यवती स्त्रियोंका मध्यस्थल संपूर्ण तीन सलवटोंकरके युक्त होय तो (नाभीलावण्याब्धेः उत्कलिकां भूमिकां वहते) नाभीकी शोभाके समुद्रकीसी है लहरी जिसमें ऐसी पृथ्वीको धारणकरताहै८०

रोमलता तनुऋज्वी हृदयांतादुत्थिता शुभा श्यामा ।
विशतीव नाभिकुहरे मुखेन्दुभीता यथा तिमिररेखा ॥८१॥

अन्वयार्थौ-(हृदयांतात् उत्थिता तनुऋज्वी रोमलता श्यामा शुभा) छातीके अंतसे उत्पन्नहुई जो पतली सीधी रोमोंकी बेली काली शुभ है

(का इव मुखेन्दुभीता यथा तिमिररेखा नाभिकुहरे विशति इव)मुखचन्द्र-
मासे डरी जैसे अँधेरेकी मानों टूंडीके बुलेमें घुसी जाती है ॥ ८१ ॥

कुटिला स्थूला कपिला व्युच्छिन्ना रोमवल्लरी यस्याः ।
विधवात्वं दौर्भाग्यं लभते प्रायेण सा रमणी ॥ ८२ ॥

अन्वयार्थौ-(यस्याः रोमवल्लरी कुटिला कपिला विच्छिन्ना भवति)
जिस स्त्रीकी रोमोंकी बेली टेढी कुछ कबरी कई रंगकी, बीचमें टूटी होय
तो (सा रमणी प्रायेण विधवात्वं च दौर्भाग्यं लभते) सो स्त्री बहुधाकरके
विधवापन और अभाग्यको पातीहै ॥ ८२ ॥

अथ हृदयम् ।

निर्लोम व्रणरहितं हृदयं यस्याः समं मनोहारि ।
ऐश्वर्यमवैधव्यं पतिप्रियत्वं भवति तस्याः ॥ ८३ ॥

अन्वयार्थौ-(यस्याः हृदयं निर्लोम व्रणरहितं समं मनोहारि स्यात्)
जिस स्त्रीका हृदय विना रोमोंके हो और किसी प्रकारका दाग अर्थात् फोडा,
फुन्सी नहीं होय और बराबर मनको हरनेवाला होय (तस्याः ऐश्वर्यम्
अवैधव्यं पतिप्रियत्वं भवति) तिस स्त्रीका सब प्रकारके आनंदका ठाठ और
सौभाग्यपन तथा-पतिकी प्यारी होतीहै ॥ ८३ ॥

उद्भिन्नरोमकीर्णं विस्तीर्णं हृदयमिह भवेद्यस्याः ।
सा प्रथमं भर्तारं हत्वा वेश्यात्वमुपयाति ॥ ८४ ॥

अन्वयार्थौ-(इह यस्याः हृदयम् उद्भिन्नरोमकीर्णं विस्तीर्णं भवेत्) इस
लोकमें जिस स्त्रीका हृदय फटा टूटा बहुत रोमयुक्त और बहुत लंबा चौडा
होय (सा प्रथमं भर्तारं हत्वा वेश्यात्वं उपयाति) सो स्त्री पहले पतिको
मारिके फिर वेश्यापनकी पाती है अर्थात् वेश्या होकर चली जातीहै ॥ ८४ ॥

पिशितविवर्जितमुन्नतविनतं हृदयं व्रणान्वितं विषमम् ।
कर्मकरात्वं तनुते वनितानां तत्क्षणादेव ॥ ८५ ॥

अन्वयार्थौ-(यस्याः हृदयं पिशितविवर्जितम् उन्नतं विनतं व्रणान्वितं

विषमं भवेत्) जिस स्त्रीका हृदय मांसरहित ऊँचा झुका हुवा और फोडा फुन्सी आदि चिह्न युक्त ऊँचा नीचा होय तौ (वनितानां मध्ये तत् हृदयं कर्मकरात्वं तत्क्षणादेव तनुते) स्त्रियोंके बीचमें वह हृदय दासीपनको शीघ्रही करैहै ॥ ८५ ॥

अथोरःस्थलम् ।

पीवरमुन्नतमायतमुरःस्थलं न मृदुलं न कठिनं विशिरम् ।
अष्टादशाङ्गुलमितं रोमविहीनं शुभं स्त्रीणाम् ॥ ८६ ॥

अन्वयार्थौ-(स्त्रीणाम् उरःस्थलं पीवरम् उन्नतम् आयतं न मृदुलम् न कठिनं विशिरम् अष्टादशांगुलमितं रोमविहीनं शुभं भवति) स्त्रियोंकी छातीकी जगह मांससे भरी हुई, ऊँची, लम्बी, चौडी न नरम न कडी और नसें न दीखती हाेंय अठारह अंगुलके प्रमाण बिना रोमोंके शुभ होतीहै॥ ८६॥

विषमेण भवति हिंस्रा निर्मांसेनोरसा भवति विधवा ।
अतिपृथुना प्रियकलहा दुःशीला रोमशेनापि ॥ ८७ ॥

अन्वयार्थौ-(विषमेण उरसा नारी हिंस्रा भवति) ऊंची नीची छाती करिके स्त्री हिंसा करनेवाली होतीहै और (निर्मांसेन उरसा नारी विधवा भवति) विना मांसकी छातीसे स्त्री विधवा होती है और (अतिपृथुना उरसा नारी प्रियकलहा भवति) बहुत चौडी छातीसे स्त्री कलहकी प्यारी होती है और (रोमशेन उरसा नारी अपि दुःशीला भवति) रोमोंवाली छातीसे स्त्री खोटे स्वभाववाली होती है ॥ ८७ ॥

अथ स्तनौ ।

शस्तौ वृत्तौ सुदृढौ पीनौ कठिनौ घनौ स्तनौ सुदृशाम् ।
स्नानाय स्मरनृपतेः काञ्चनकलशाविव प्रगुणौ ॥ ८८ ॥

अन्वयार्थौ-(सुदृशां स्तनौ वृत्तौ सुदृढौ पीनौ कठिनौ घनौ शस्तौ भवतः) स्त्रियोंके कुच गोल अच्छे कडे मांसके भरे बहुत अच्छे होते हैं

(कौ इव ? स्मरनृपतेः स्नानाय प्रगुणौ काञ्चनकलशौ इव) कैसे कि मानो कामदेव राजाके स्नानके अर्थ सुन्दर सोनेके वे कलशे हैं ॥८८ ॥

सुखसौभाग्यनिधानं समुन्नतं समं कान्तम् ।
धत्ते सुवर्णवनिता कुम्भं रुचिरं स्मरेभस्य ॥ ८९ ॥

अन्वयार्थौ-(या सुवर्णवनिता समुन्नतं स्तनयुगं समं कान्तं सुखसौभाग्यनिधानम् रुचिरं स्मरेभस्य कुंभं धत्ते) जिस स्त्रीके ऊंचे दोनों कुच बराबर, सुन्दर सुखसौभाग्यके निधान कहिये स्थान और सुन्दर रंगकी स्त्री मानो कामदेव हाथीके कुम्भ (गण्डस्थल) को धारण करती है ॥८९

पुत्रः प्रथमे गर्भे पयोधरे दक्षिणोन्नते स्त्रीणाम् ।
वामोन्नतेन पुत्री निरपत्यं चैव विषमेण ॥ ९० ॥

अन्वयार्थौ-(स्त्रीणां दक्षिणोन्नते पयोधरे प्रथमे गर्भे पुत्रो भवति) स्त्रियोंके दाहिनी ओरको झुकेहुए कुचोंसे पहिले गर्भसे पुत्र होताहै और (वामोन्नतेन पयोधरेण प्रथमं पुत्री भवति) बांई ओरको झुके हुए कुचोंसे पहिले गर्भसे पुत्री होती है और (विषमेण पयोधरेण एव निरपत्यं भवति) ऊंचे नीचे कुचोंसे वह विना संतानकी होतीहै ॥ ९० ॥

शुष्के विहीनमध्ये स्थूलाग्रे स्तनयुगेऽङ्गना नैःस्व्यम् ।
लभते विरले तस्मिन्वैधव्यं पुत्रनाशं च ॥ ९१ ॥

अन्वयार्थौ-(अंगना शुष्के विहीनमध्ये स्थूलाग्रे स्तनयुगे सति नैःस्व्यं लभते) स्त्रीके सूखे, बीचमें ऊंचे नीचे मोटे हैं आगेके भाग जिसके ऐसे दोनों कुचोंके होनेसे दरिद्रताको पावै हैं और (तस्मिन् स्तनयुगे विरले सति वैधव्यं च पुनः पुत्रनाशं लभते) वेही दोनों कुचोंके बहुत दूर होनेसे विधवापन और पुत्रक नाशको पावै है ॥ ९१ ॥

कुरुते वक्षोजद्वयमरघटघटीनिभं पुरंध्रीणाम् ।
सततं पूर्वसुखं तत्पश्चादत्यर्थदुःखकरम् ॥ ९२ ॥

अन्वयार्थौ-(पुरंध्रीणां वक्षोजद्वयम् अरघटघटीनिभं चेद् भवति) स्त्रियोंके जो दोनों कुच रहैटके घडियेकी तुल्य होंय तो (सततं पूर्वसुखं

कुरुते) निरंतर पहले सुखको करते हैं और पश्चात् (अतिदुःखकरं भवति) पीछे बहुत दुःखके करनेवाले होते हैं ॥ ९२ ॥

अतिनिबिडं कुचयुगलं यत्स्त्रियाः पथि च यांत्या हि ।
सौख्यं सारसवदनासौभाग्यं हन्ति शस्तकरम् ॥ ९३ ॥

अन्वयार्थौ-(पथि यान्त्याः स्त्रियाः यत् कुचयुगलम् अतिनिबिडं स्यात् तत् सारसवदनासौख्यं शस्तकरं च पुनः सौभाग्यं हंति) मार्गमें चलती हुई स्त्रीके दोनों कुच जो मिल जायँ तो कमलवदना जो स्त्री है उसका जो कल्याणकारी सुख और सौभाग्य है तिसको फिर नाश करे है ॥ ९३ ॥

सुदृशां चूचुकयुग्मं शस्तं श्यामं सुवृत्तमतिपीनम् ।
स्मरनृपतेर्मुद्रेयं रतिसुखनिधिकोशभवनस्य ॥ ९४ ॥

अन्वयार्थौ-(सुदृशां चूचुकयुग्मं श्यामं सुवृत्तम् अतिपीनं शस्तं स्मरनृपतेः रतिसुखनिधिकोशभवनस्य इयं मुद्रा) स्त्रियोंके दोनों कुचोंकी टोटनी साँवरी, गोल और बहुत मोटी मांससे भरीहुई अच्छी होती हैं और कामदेव राजाके क्या हैं मानो रतिसुखनिधिकोषके घरकी यह मुहर अर्थात् छाप है ॥ ९४ ॥

दीर्घं चूचुकयुग्मं यस्याः सा प्रियरतिर्भवति ।
धूर्ता चान्तमनसा पुनरस्तेनैव द्वेष्टि सा मनुजम् ॥ ९५ ॥

अन्वयार्थौ-(यस्याः चूचुकयुग्मं दीर्घं भवति सा प्रियरतिर्भवति) जिस स्त्रीके कुचोंकी दोनों नोकें बहुत लंबा होंय, सो स्त्री रतिमें सुख वा प्यार करनेवाली होती है और (पुनः अन्तर्मनसा धूर्त्ता सा तेनैव मनुजं द्वेष्टि) फिर वही भीतरे मनसे धूर्त्त और छलसे उसी मनुष्यसे वैर करतीहै ९५

बहिरवनतेन चूचुकयुगलेनातीव सूक्ष्मविषमेण ।
संप्राप्य च महद्दुःखं दुःशीला जायते योषित् ॥ ९६ ॥

अन्वयार्थौ-(बहिरवनतेन अतीव सूक्ष्मविषमेण चूचुकयुगलेन योषित् महादुःखं संप्राप्य च पुनः दुःशीला जायते) बाहरकी ओर

झुके हुए और बहुत छोटे पतले ऊंचे नीचे कुचोंकी दोनों नोकोंसे स्त्री बडे दुःखको पाकर फिर व्यभिचारिणी होती है ॥ ९६ ॥

इति स्तनपष्ठदर्शी संपूर्णा ।

अथ जत्रुकथनम् ।

जत्रुभ्यां पीनाभ्यां धनधान्यसुतान्विता भवेद्वनिता ।
उन्नतिसंहतिमद्भ्यां पुनरेषा भूरिभोगाढ्या ॥ ९७ ॥

अन्वयार्थौ-(एषा वनिता पीनाभ्यां जत्रुभ्याम् उन्नतिसंहतिमद्भ्यां धनधान्यसुतान्विता पुनः भूरिभोगाढ्या भवति) जो स्त्री ऊंचे मांसके भरे अच्छे बनावटके कंधोंके जोडोंसे युक्त हो वह धन धान्यवती और बहुत भोग करिके युक्त अर्थात् भोगवती होती है ॥ ९७ ॥

श्लथकीकससंधिमता निम्नेन द्रविणलेशपरिहीना ।
जत्रुयुगलेन योषिद्विषमेण पुनर्भवति विषमा ॥ ९८ ॥

अन्वयार्थौ-(श्लथकीकससंधिमता निम्नेन जत्रुयुगलेन योषित् द्रविणलेशपरिहीना भवति) ढीले हाडोंकी संधिवाले नीचे ऐसे कंधोंके जोडोंसे स्त्री थोडेसे धन करिकेभी हीन होती है और (पुनः विषमेण जत्रुयुगलेन योषित् विषमा भवति) फिर ऊंचे नीचे कंधोंके जोडों करके स्त्री नटखट खोटी विषके तुल्य होती है ॥ ९८ ॥

यस्या वंध्या वनिता स्कंधयुगं किंचिदुन्नतं मूले ।
नातिकृशपीनदीर्घं सुखसौभाग्यप्रदं सुदृशाम् ॥ ९९ ॥

अन्वयार्थौ-(यस्याः स्कंधयुगं मूले किंचित् उन्नतं सा वनिता वंध्या भवति) जिस स्त्रीके दोनों कंधे जडमें कुछ ऊंचे होंय सो स्त्री बाँझ होती है और (सुदृशां नातिकृशपीनदीर्घं स्कंधयुगं सुखसौभाग्यप्रदं भवति) स्त्रियोंके न तो बहुत पतले, न मोटे, न लंबे, दोनों कंधे हों तो सुख सौभाग्यके देनेवाले होते हैं ॥ ९९ ॥

ऊर्द्ध्वस्कंधा कुलटा स्थूलस्कंधापि भारवाहनपरा ।
चक्रस्कंधा वंध्या दुःखवती रोमशस्कंधा ॥ १०० ॥

अन्वयार्थौ-(ऊर्द्ध्वस्कंधा वनिता कुलटा भवेत्) ऊंचे कन्धोंवाली स्त्री खोटी होती है और (स्थूलस्कन्धा वनिता भारवाहनपरा अपि भवेत्) मोटे कंधोंवाली स्त्री बोझ ढोनेवाली होती है और (चक्रस्कंधा वनिता वंध्या भवेत्) चक्रवाले कंधोंसे स्त्री बाँझ होती है (रोमशस्कंधा वनिता दुःखवती भवेत्) बहुत रोमवाले कंधोंसे स्त्री दुःख पानेवाली होती है ॥ १०० ॥

अथांसकथनम् ।

निर्गूढसंधिबन्धौ सुसंहतौ पिशितसंयुतौ शस्तौ ।
अंसौ स्यातां यस्याः सा नारी भूरिसौभाग्या ॥ १०१ ॥

अन्वयार्थौ-(यस्याः अंसौ निर्गूढसंधिबंधौ सुसंहतौ पिशितसंयुतौ शस्तौ भवतः) जिस स्त्रीके कंधे छिपे हैं जोडोंके बंध जिसके और खूब जोडोंसे बँधेहुए मांससे भरे हुए हों (सा नारी भूरिसौभाग्या भवति) सोई स्त्री बडी सौभाग्यवती अर्थात् पतिकी प्यारी होती है ॥ १०१ ॥

सुदृशां नीचौ स्कंधौ दौर्भाग्यसमन्वितौ च भवतो वै ।
अत्युच्चैर्वैधव्यं निर्मांसैर्दुःखदारिद्र्यम् ॥ १०२ ॥

अन्वयार्थौ-(सुदृशां नीचौ स्कन्धौ वै इति निश्चयेन दौर्भाग्यसमान्वितौ भवतः) स्त्रियोंके नीचे कंधे होंय तो निश्चय करके दौर्भाग्ययुक्त होते हैं और (अत्युच्चैः स्कंधैः वैधव्यं स्यात्) बहुत ऊंचे होंय तो विधवापन होय और (निर्मांसैः स्कंधैः दुःखदारिद्र्यं भवति) मांस रहित कंधोंसे स्त्री दुःखी और दरिद्रिणी होती है ॥ १०२ ॥

अथ कक्षाकथनम् ।

कक्षायुगं सुगन्धि स्निग्धं च समुन्नतं पिशितपूर्णम् ।
तनुमृदुलरोमसहितं प्रशस्यते प्रायशः सुदृशाम् ॥ १०३ ॥

अन्वयार्थौ-(सुदृशां कक्षायुगं सुगन्धि स्निग्धं समुन्नतं पिशितपूर्णं तनुमृदुलरोमसहितं प्रायशः प्रशस्यते) स्त्रियोंकी काँखें दोनों सुगंधित और अच्छी चिकनी, ऊंची मांससे भरीहुई पतले और मुलायम रोमों करिके युक्त बहुधा बडाईके योग्य होती हैं ॥ १०३ ॥

अतिनिम्ने निर्मांसे प्रस्वेदमलान्विते शिराकीर्णे ।
सोलूखलबहुरोमे कक्षे दौर्भाग्यमावहतः ॥ १०४ ॥

अन्वयार्थौ-(अतिनिम्ने निर्मांसे प्रस्वेदमलान्विते शिराकीर्णे सोलूखलबहुरोमे कक्षे दौर्भाग्यम् आवहतः) बहुत नीचे, विना मांसके पसीने और मलकरके युक्त नसें जिसमें चमकती हों सो ओखलीकी भाँति बहुत रोमवाली ऐसी कांखें अभाग्यको करती हैं ॥ १०४ ॥ इति सप्तदशी पूर्णा ।

अथ बाहुलक्षणम् ।

शस्तौ बाहू सुदृशां शिरीषतरुपुष्पकोमलौ दीर्घौ ।
मानुषकुरङ्गहेतोः पाशाविव पुष्पचापस्य ॥ १०५ ॥

अन्वयार्थौ-(सुदृशां बाहू शिरीषतरुपुष्पकोमलौ दीर्घौ शस्तौ भवतः) स्त्रियोंकी दोनों भुजा शिरसके फूलकी समान कोमल और बडी लंबी होंय तो श्रेष्ठ होती है (कौ इव ? मानुषकुरङ्गहेतोः पुष्पचापस्य पाशौ इव) मानों क्या हैं कि मनुष्य हरिणके हेतु कामदेवकी यह फाँसी है ॥ १०५ ॥

निर्लोमं बाहुयुगलं गूढास्थिग्रन्थि करिकराकारम् ।
विश्लिष्टशिरासन्धि स्त्रीणां सौभाग्यमधिशेते ॥ १०६ ॥

अन्वयार्थौ-(स्त्रीणां बाहुयुगलं निर्लोमं गूढास्थिग्रंथि करिकराकारं विश्लिष्टशिरासंधि सौभाग्यम् अधिशेते) स्त्रियोंकी दोनों भुजा विना रोमोंके और छिपी है हाडकी गाँठि जिनकी, हाथीकी सूंडके आकार नसोंके जोड जिनमें न दीखें ऐसी भुजाओंसे सौभाग्य होता है ॥ १०६ ॥

वैधव्यं वनितानां बाहुभ्यां स्थूलरोमशाभ्यां स्यात् ।
दौर्भाग्यं ह्रस्वाभ्यां शिरायुताभ्यां परिक्लेशः ॥ १०७ ॥

अन्वयार्थौ–(स्थूलरोमशाभ्यां बाहुभ्यां वनितानां वैधव्यं स्यात्) मोटे रोमों करके युक्त भुजा स्त्रियोंकी होंय तो विधवा होय और (ह्रस्वाभ्यां बाहुभ्यां वनितानां दौर्भाग्यं स्यात्) छोटीभुजाओंसे स्त्रियां खोटे भाग्यकी होती हैं और (शिरायुताभ्यां बाहुभ्यां परिक्लेशः स्यात्) नसों करके युक्त भुजाओंसे स्त्रियोंको दुःख होता है ॥ १०७ ॥

अम्भोजगर्भसुभगं मृदु नवसहकारकिसलयाकारम् ।
तनु विप्रकृष्टसर्वाङ्गुलिकं पाणिद्वयं शस्तम् ॥ १०८ ॥

अन्वयार्थौ–(अंभोजगर्भसुभगं मृदु नवसहकारकिसलयाकारं तनु विप्रकृष्टसर्वाङ्गुलिकम् एतादृशं पाणिद्वयं शस्तम्) कमलके पुष्पके गर्भके समान सुंदर मुलायम, नये आमकी कौंपलोंके तुल्य पतली जुदी जुदी सब अंगुली जिसमें ऐसे दोनों हाथ श्रेष्ठ अर्थात् अच्छे होते हैं ॥ १०८ ॥

रोमशिरापरिहीनं घनमांसं पाणितलयुगं स्निग्धम् ।
बहुशुभमनुन्नतमनिम्नं रूक्षं खरं विवर्णं क्लेशदं भवति॥ १०९॥

अन्वयार्थौ–(रोमशिरापरिहीनं घनमांसं स्निग्धं पाणितलयुगं बहुशुभं भवति) रोम और नसों करिके हीन बहुत मांसवाली चिकनी ऐसी दोनों हथेली बहुत शुभ होती हैं और (अनुन्नतम् अनिम्नं रूक्षं खरं विवर्णं पाणितलयुगं क्लेशदं भवति) ऊंची न हों, नीची गहरी न हों, रूखी खरदरी, बुरेरंगकी होय तो ऐसी दोनों दुःखके देनेवाली होती हैं ॥ १०९ ॥

यस्याः पाणितलं स्याद्बहुरेखं सा निहन्ति भर्तारम् ।
दौर्भाग्यं भाग्यहीनां रेखारहितं पुनस्तनुते ॥ ११० ॥

अन्वयार्थौ–यस्याः पाणितलं बहुरेखं स्यात् सा भर्तारं निहन्ति) जिस स्त्रीकी हथेलीपै बहुत रेखा होंय सो स्त्री पतिको मारती है और (पुनः

रेखारहितं पाणितलं दौर्भाग्यं भाग्यहीनां तनुते) फिर विना रेखाकी हथेली खोटाभाग्य और भाग्यहीन करे है ॥ ११० ॥

नरलक्षणाधिकारे नारीणामप्यशेषमेवोक्तम् ।
कररेखालक्ष्म पुनः किंचित्प्रस्तावतो वक्ष्ये ॥ १११ ॥

अन्वयार्थौ-(नरलक्षणाधिकारे नारीणाम् अपि अशेषं लक्षणम् उक्तं पुन) कररेखालक्ष्म किंचित् प्रस्तावतः वक्ष्ये) । जैसे पुरुषके अधिकारमें लक्षण कहे तैसेही स्त्रियोंके संपूर्ण लक्षण उक्तसे कहे फिर हाथकी रेखाओंके चिह्न कुछ प्रसंगसे कहताहूं ॥ १११ ॥

रक्ताः व्यक्ता स्निग्धा गंभीरा वर्तुलाः समाः पूर्णाः ।
रेखास्तिस्रः स्त्रीणां पाणितले सौख्यलाभाय ॥ ११२ ॥

अन्वयार्थौ-(रक्ताः व्यक्ताः स्निग्धाः गंभीराः वर्तुलाः समाः पूर्णाः स्त्रीणां पाणितले तिस्रो रेखाः सौख्यलाभाय भवंति) लाल, अच्छी प्रकट, चिकनी, गहरी, गोल बराबर, पूरी स्त्रियोंकी हथेलीमें तीन रेखा जो दीखती हों, तो-सुखलाभके हेतु होती हैं ॥ ११२ ॥

मत्स्येन भवति सुभगा हस्तस्थस्वस्तिकेन वित्ताढ्या ।
श्रीवत्सेन पुनः स्त्री नृपपत्नी नृपतिमाता वा ॥ ११३ ॥

अन्वयार्थौ-(स्त्री हस्ततलस्थेन मत्स्येन सुभगा भवति) स्त्रीकी हाथकी हथेलीमें जो मच्छीकी रेखा होय तौ सौभाग्यवती होती है और (हस्ततलस्थस्वस्तिकेन वित्ताढ्या भवति) जो हथेलीमें साथियेका चिह्न होय तौ धनवती होतीहै और (हस्ततलस्थेन श्रीवत्सेन नृपपत्नी वा नृपतिमाता भवति) जो हथेलीमें श्रीवत्स चिह्न होय तौ राजाकी रानी अथवा राजाकी माता होतीहै ॥ ११३ ॥

पाणितले यस्याः स्यान्नन्द्यावर्तः प्रदक्षिणो व्यक्तः ।
भुवि चक्रवर्तिनस्तत्स्त्रीरत्नं भवति भोगार्हम् ॥ ११४ ॥

अन्वयार्थौ-(यस्याः पाणितले प्रदक्षिणः व्यक्तः नंद्यावर्तः स्यात् तत् स्त्रीरत्नं भुवि चक्रवर्तिनः भोगार्हं भवति) जिस स्त्रीकी हथेलीमें दाहिनी-

और प्रकट नंद्यावर्त साथियेका चिह्न होय तो वह स्त्रीरत्न-(स्त्रियोंमें श्रेष्ठ) पृथ्वीमें चक्रवर्ती राजाके भोगनेके योग्य होती है ॥ ११४ ॥

या करतले कनिष्ठां निर्गत्याङ्गुष्ठमूलतो याति ।
सा रेखा भर्तृघ्नी तद्युक्तां नोद्वहेत्कन्याम् ॥ ११५ ॥

अन्वयार्थौ-(करतले या रेखा अंगुष्ठमूलतः निर्गत्य कनिष्ठां याति) हथेलीमें जो रेखा अँगूठेके मूलसे निकल कनिष्ठातक जाय तो (सा रेखा भर्तृघ्नी भवेत्) सो रेखा पतिकी मारनेवाली होती है और (तद्युक्तां कन्यां न उद्वहेत्) ऐसी रेखायुक्त कन्याको न विवाहै ॥ ११५ ॥

रेखाभिर्मानतुल्याभिर्जायते सा वणिग्जाया ।
भवति कृषीवलपत्नी युगसीरोलूखलाकृतिभिः ॥ ११६ ॥

अन्वयार्थौ-(मानतुल्याभिः रेखाभिः सा वणिग्जाया जायते) तौलनेकी वस्तुके प्रमाणके तुल्य रेखाओंकरिके युक्त हो सो वैश्यकी स्त्री होतीहै और (युगसीरोलूखलाकृतिभिः रेखाभिः कृषीवलपत्नी भवति) जुवा, हल, ओखलीके आकारकी रेखाओंसे किसानकी स्त्री होतीहै ॥ ११६ ॥

गजवाजिवृषभपद्माः प्रासादधनुर्भागैर्दुवेर्ज्याः ।
यस्याः पाणितले स्युः सा तीर्थकरस्य भुवि जननी ॥ ११७॥

अन्वयार्थौ-(यस्याः पाणितले गजवाजिवृषभपद्माः प्रासादधनुर्भागैर्दुर्वर्ज्याः याः रेखाः स्युः) जिस स्त्रीकी हथेलीमें हाथी, घोडा, बैल, कमल, महल, धनुष इन करके रहित जो चिह्न होंय तो (भुवि सा तीर्थकरस्य जननी भवति) पृथ्वीमें सो स्त्री तीर्थकर अर्थात् धर्मके करनेवालेकी माता होती है ॥ ११७ ॥

शङ्खस्वस्तिकसागरनंद्यावर्तातपत्रतिमिकूर्मैः ।
वामकरतलनिविष्टैः प्रजायते चक्रिणो माता ॥ ११८॥

अन्वयार्थौ-(वामकरतलनिविष्टैः शंखस्वस्तिकसागरनंद्यावर्तातपत्रतिमिकूर्मैः चक्रिणः माता प्रजायते)। बायें हाथकी हथेलीमें जो स्थित

शंख, चक्र, समुद्र, नंद्यावर्त चिह्न, आतपत्र कहिये छत्र मछली कछुवा ऐसे चिह्नों करके चक्रवर्ती राजाकी माता होती है ॥ ११८ ॥

ध्वजतोरणभद्रासनचामरभृङ्गारशीर्षरेखाद्याः ।
यस्या भवन्ति पाणौ सा जननी वासुदेवस्य ॥ ११९ ॥

अन्वयार्थौ-(यस्याः पाणौ ध्वजतोरणभद्रासनचामरभृंगारशीर्षरेखाद्याः भवंति सा स्त्री वासुदेवस्य जननी भवति) जिस स्त्रीके हाथमें ध्वजा, तोरण, राजाका आसन, चमर, जलकी झारी, मस्तकपरके आकार रेखा आदि होंय तो सो स्त्री वासुदेव अर्थात् कृष्णबलदेवकी माता होती हैं ॥ ११९ ॥

श्रीवत्सवर्धमानाङ्कुशगदादित्रिशूलतुल्याभिः ।
रेखाभिर्जयशब्दो वनितानां जायते सपदि ॥ १२० ॥

अन्वयार्थौ-(श्रीवत्सवर्धमानाङ्कुशगदादित्रिशूलतुल्याभिः रेखाभिः वनितानां जयशब्दः सपदि जायते) श्रीवत्स, वर्धमान, अंकुश, गदा आदि, त्रिशूल इनकेसे आकार रेखा होंय तो स्त्रियोंका जयजय बोलना शीघ्रही होता है ॥ १२० ॥

मण्डूककङ्कजंबुकवृषकाकोलूकवृश्चिकाः सुदृशाम् ।
रासभसैरिभकरभाः करास्थिता दुःखमाददते ॥ १२१ ॥

अन्वयार्थौ-(सुदृशां करस्थिताः मंडूककंकजंबुकवृषकाकोलूकवृश्चिकाः रासभसैरिभकरभाः दुःखम् आददते) स्त्रियोंके हाथमें स्थित मेंढक, कंक-पक्षी, गीदड, बैल, कौवा, उल्लू, बिच्छू, गधा, भैंसा, ऊंट आदि जो ये चिह्न होयँ तो दुःखको देते हैं ॥ १२१ ॥

अथाङ्गुष्ठः ।

स्त्रीणां सरलोऽङ्गुष्ठः स्निग्धो वृत्तः शुभस्तथाङ्गुलयः ।
मृदुलत्वचः सुदीर्घाः क्रमशो वर्तुलाः सुपर्वाणः ॥ १२२ ॥

अन्वयार्थौ-(स्त्रीणाम् अंगुष्ठः सरलः स्निग्धः वृत्तः शुभो भवति)

स्त्रियोंका अंगूठा सीधा, सुन्दर, चिकना, गोल होय तो शुभ है और (अङ्गुलयः मृदुलत्वचः सुदीर्घाः क्रमशः वर्तुलाः सुपर्वाणः शुभाः भवंति) अंगुलियाँ मुलायम, पतली त्वचावाली, अच्छी, लम्बी, क्रमशः गोल अच्छे पोरुवोंकी शुभ होती हैं ॥ १२२ ॥

चिपिटाः स्फुटाश्च रूक्षाः पृष्ठे रोमान्विताः खरा वक्राः ।
अतिह्रस्वकृशा विरला विदधाति दारिद्र्यमङ्गुलयः ॥ १२३ ॥

अन्वयार्थौ–(चिपिटाः स्फुटाः रूक्षाः पृष्ठे रोमान्विताः खराः वक्राः अतिह्रस्वाः कृशाः विरलाः स्त्रीणाम् एतादृशाः अंगुलयः दारिद्र्यं विदधति) चपटी, प्रकट, रूखी, अंगुलियोंकी पीठपर रोमयुक्त खरदरी टेढी बहुत छोटी, पतली, जुदी जुदी स्त्रियोंकी अंगुली होय तो दारिद्र्यकी करनेवाली हैं ॥ १२३ ॥

अथ नखाः ।

स्निग्धा बन्धूकरुचः सशिखास्तुङ्गाः शुभा नखराः ।
सुदृशां बिभर्त्यङ्कुशलीलामनंगगन्धद्विपेन्द्रस्य ॥ १२४ ॥

अन्वयार्थौ–(सुदृशां नखराः स्निग्धाः बंधूकरुचः सशिखाः तुङ्गाः शुभाः भवंति) स्त्रियोंके नख चिकने, दुपहरियाके पुष्पकी तरह उजले, चोटीके जो ऊंचे होंय तो शुभ होते हैं और (अनंगगन्धद्विपेन्द्रस्य अंकुशलीलां बिभर्ति) वे ही नख कामदेवसे मतवाले हाथीके अंकुशकी शोभाको धारण करते हैं ॥ १२४ ॥

रूक्षैर्वक्रैः पीनैः सितैर्विवर्णैः शिखाविरहितैः ।
शुक्त्याकारैर्वनिता भवंति सौभाग्यधनहीनाः ॥ १२५ ॥

अन्वयार्थौ–(रूक्षैः वक्रैः पीनैः सितैः विवर्णैः शिखाविरहितैः शुक्त्याकारैः नखैः वनिताः सौभाग्यधनहीनाः भवंति) रूखे, टेढे, मोटे सफेद बेरंगके, उजली चोटीके रहित, सीपीके आकारवाले नख होयँ तो स्त्री सौभाग्य और धनसे हीन होती हैं ॥ १२५ ॥

पाणिचरणयोर्यस्या जायन्ते बिन्दवो नखेषु सिताः।
सा जगति सुसितनखा दुःखाय स्वैरिणी रमणी ॥ १२६ ॥

अन्वयार्थौ–(यस्याः पाणिचरणयोः नखेषु सिताः बिन्दवो जायंते जगति सुसितनखा सा रमणी स्वैरिणी तथा दुःखाय भवति) जिस स्त्रीके हाथ पाँवके नखोंमें सफेद छींटे होंय तो संसारमें ऐसे नखवाली स्त्री व्यभिचारिणी और दुःखके अर्थ होती है ॥ १२६ ॥

अथ पृष्ठिः।

सरला शुभसंस्थाना निर्लोमा मध्यमाग्रवंशास्थिः।
पृष्ठिः पिशितोपचिता सुखसौभाग्यप्रदा स्त्रीणाम् ॥ १२७ ॥

अन्वयार्थौ–(स्त्रीणां पृष्ठिः सरला शुभसंस्थाना निर्लोमा मध्यमाग्रवंशास्थिः शुभा भवति) स्त्रियोंकी पीठ सूधी, अच्छे आकारकी विना रोमोंकी बीचमेंसे आगेतककी हड्डीकी शुभ होती है और (पिशितोपचिता पृष्ठिः सुखसौभाग्यप्रदा भवति) मांसले खूब भरी पीठसे सुख और सौभाग्यकी देनेवाली होती है ॥ १२७ ॥

भुग्नवलितेन दासी भर्तृघ्नी भामिनी विशालेन।
सशिरेण सदुःखा स्याद्विधवा पृष्ठेन रोमभृता ॥ १२८ ॥

अन्वयार्थौ–(भामिनी भुग्नवलितेन पृष्ठेन दासी स्यात्) स्त्री टेढी सल बटोंवाली पीठसे दासी होती है और (विशालेन पृष्ठेन भर्तृघ्नी स्यात्) बडी और लंबी पीठसे पतिके मारनेवाली होती है और (सशिरेण पृष्ठेन सदुःखा स्यात्) जिसमें नसें चमकती हों ऐसी पीठसे दुःख सहित होती है और (रोमभृता पृष्ठेन विधवा स्यात्) रोमोंवाली पीठसे विधवा होती है ॥ १२८ ॥

अथ कृकाटिकालक्षणम् ।

ऋज्वी कृकाटिका स्यात्समांसपीना समुन्नता यस्याः ।
दीर्घायुर्विधवात्वं लभते सा सौख्यसौभाग्यम् ॥ १२९ ॥

अन्वयार्थौ–(यस्याः कृकाटिका ऋज्वी स्यात् सा दीर्घायुर्लभते) जिस स्त्रीका गलेका गट्टा अर्थात् गलेकी घेंटी सूधी होय सो स्त्री बडी आयु पावै और (समांसपीना कृकाटिका विधवात्वं लभते) जिसकी मांससे भरी मोटी गलेकी घेंटी होय सो विधवापनको पावै और (यस्याः कृकाटिका समुन्नता स्यात् सा स्त्री सौख्यसौभाग्यं लभते) जिस स्त्रीकी गलेकी घेंटी ऊँचाई लिये होय सो स्त्री सुख सौभाग्यको पाती है॥ १२९॥

बहुपिशिता निष्पिशिता शिराचिता रोमशा विशाला च ।
कुटिला विकटा कुरुते दौर्भाग्यं प्रायशः सुदृशाम् ॥ १३० ॥

अन्वयार्थौ–(सुदृशां बहु पिशिता निष्पिशिता शिराचिता रोमशा कुटिला विकटा कृकाटिका स्यात् सा प्रायशः दौर्भाग्यं कुरुते) स्त्रियोंकी बहुत मांसवाली वा विनामांसकी नसें चमकती हो रोमावली, बडी लंबी बुरी भयंकर जो गलेकी घेंटी होय सो बहुधा अभाग्यको करतीहै॥ १३०॥

मांसोपचितः कण्ठो वृत्तश्चतुरंगुलः शुभो विशदः ।
उच्चविलासं कथयति वदनांभोजस्य वनितानाम् ॥ १३१ ॥

अन्वयार्थौ–(वनितानां वदनाम्भोजस्य कण्ठः मांसोपचितः वृत्तः चतुरंगुलः विशदः शुभः) स्त्रियोंका कंठ मांससे भरा, गोल चार अंगुलका, उज्ज्वल शुभ है और (उच्चविलासं कथयति) बडे आनंद भोगको कहाता है ॥ १३१ ॥

यस्याः सुसंहिता स्फुटरेखात्रितयाङ्किता भवेद्ग्रीवा ।
सालङ्कारे कनकं मुक्तारत्नान्यंगना दधते ॥ १३२ ॥

अन्वयार्थौ–(यस्याः ग्रीवा सुसंहिता स्फुटरेखात्रितयांकिता भवेत् सा अंगना कनकालंकारमुक्तारत्नानि दधते) जिस स्त्रीकी नाड

मिलीहुई प्रकट तीन रेखा चिह्नोंसे अंकित होय सो स्त्री सुवर्णका गहना मोती और रत्नोंको पहरती है ॥ १३२ ॥

व्यक्तास्थिर्निर्मांसा चिपिटा स्फुटा कुरूपसंस्थाना ।
सोपदिशति ग्रीवा योषाणां दुःखदौर्भाग्यम् ॥ १३३ ॥

अन्वयार्थौ-(योषाणां ग्रीवा व्यक्तास्थिः निर्मांसा चिपिटा स्फुटा कुरूपसंस्थाना स्यात्, सा ग्रीवा दुःखदौर्भाग्यम् उपदिशति) स्त्रियोंकी नाड प्रकट हाडोंकी, विना मांसकी, चपटी, फटी, बुरे स्वरूपकी होय सो नाड दुःख और अभाग्यका उपदेश करती है ॥ १३३ ॥

ग्रीवा स्थूला विधवां चक्रावर्ता स्त्रियं वंध्याम् ।
सशिरा ह्रस्वा निःस्वां कुरुते दीर्घा पुनः कुटिलाम् ॥ १३४ ॥

अन्वयार्थौ-(स्थूला ग्रीवा स्त्रियं विधवां कुरुते) मोटी नाड स्त्रीको विधवा करती है और (चक्रावर्ता ग्रीवा स्त्रियं वंध्यां कुरुते) चक्राचिह्न-वाली नाड स्त्रीको वाँझ करती है और (ह्रस्वा सशिरा ग्रीवा स्त्रियं निःस्वा कुरुते) छोटी और नसोंवाली नाड स्त्रीको दरिद्रिणी करती है और (दीर्घा ग्रीवा स्त्रियं कुटिला कुरुते) बडी और लंबी नाड स्त्रीको खोटी करती है ॥ १३४ ॥ इति ग्रीवाष्टदशी संपूर्णा ॥

अथ चिबुकम् ।

व्यङ्गुलमानं चिबुकं वृत्तं पीनं सुकोमलं शस्तम् ।
स्थूलं द्विधा विभक्तं रोमशमत्यायतं शुभं न स्यात् ॥ १३५ ॥

अन्वयार्थौ-(द्वयंगुलमानं वृत्तं पीनं सुकोमलं चिबुकं शस्तम्) दो अंगुल प्रमाण, गोल, मांसल मुलायम ऐसी ठोढी अच्छी है और (स्थूलं द्विधा विभक्तं रोमशम् अत्यायतं चिबुकं न शुभं स्यात्) मोटी, दुहरीसी, रोमवाली, बहुत लंबी, ठोढी अच्छी नहीं होती है ॥ १३५ ॥

अथ हनुकथनम् ।

निर्लोम शुभं सुघनं हनुयुगलं चिबुकपार्श्वसंलग्नम् ।
अतिवक्रकृशं स्थूलं पुनरशुभं रोमशं द्वयम् ॥ १३६ ॥

अन्वयार्थौ–(निर्लोम सुघनं चिबुकं पार्श्वसंलग्नं हनुयुगलं शुभम्) विना रोमोंके, अच्छे, कडे, ठोडीके पास ही लगेहुए ऐसे दोनों हनु शुभ है और (पुनः अतिवक्रकृशं स्थलं रोमशं द्वयम् अशुभं भवति) फिर बहुत टेढे, सूखेसे मोटे, रोमवाले दीखें तो अशुभ होतेहैं ॥ १३६ ॥

अथ कपोललक्षणम् ।

शस्ते कपोलफलके पीने वृत्ते समुन्नते विमले ।
पुलिन इव निस्रोतसः कुसुमायुधयादसां स्त्रीणाम् ॥ १३७॥

अन्वयार्थौ–(पीने वृत्ते समुन्नते विमले स्त्रीणां कपोलफलके शस्ते) मांससे भरे, गोल, बराबर ऊंचे, उजले स्त्रियोंके कपोलफलक अच्छे होतेहैं (के इव) क्या हैं माना (कुसुमायुधयादसां निस्रोतसः पुलिने इव) कामदेव जलजीवोंके गंगाके पुलिन अर्थात् रेतके गुदगुदे टीले हैं ॥ १३७ ॥

यस्याः कपोलयुगलं विच्छायं रोमसंयुतं परुषम् ।
रूक्षं स्वभावनिम्नमसितं सा दुःखिनी च स्यात् ॥१३८॥

अन्वयार्थौ–(यस्याः कपोलयुगलं विच्छायं रोमसंयुतं परुषं रूक्षं स्वभावनिम्नम् असितं स्यात्, सा च स्त्री दुःखिनी भवेत्) जिस स्त्रीके दोनों कपोल विना रंग, रोमयुक्त, टेढे, रूखे स्वभावकरिके नीचे काले होंय तो सो स्त्री दुखिया होतीहै ॥ १३८ ॥

अथ वदनम् ।

वर्तुलममलं स्निग्धं सुपूर्णशीतांशुमंडलविडम्बि ।
सौम्यं समं समांसं सुपरिमलं प्रशस्यते वदनम् ॥ १३९ ॥

अन्वयार्थौ–(वर्तुलम् अमलं स्निग्धं सुपूर्णशीतांशुमंडलविडंबि सौम्यं समं समांसं सुपरिमलं वदनं प्रशस्यते) गोल, निर्मल, सचिक्कण

पूरे चंद्रमाके बिम्बकी तुल्य सुन्दर बराबर, मांससे भरा, सुगन्धित जो ऐसा मुख होय तो प्रशंसाके योग्य है ॥ १३९ ॥

जनकवदनानुरूपं यस्या मुखपंकजं सदाह्लादि ।
सा कल्याणी प्रायेणेति समुद्रः पुरा वदति ॥ १४० ॥

अन्वयार्थौ-(यस्याः मुखपंकजं जनकवदनानुरूपं सदाह्लादि) जिस स्त्रीका मुखकमल पिताके मुखके तुल्य होय तो सदा प्रसन्न करनेवाला है (प्रायेण सा कल्याणी भवति इति समुद्रः पुरा वदति) बहुधा सो स्त्री कल्याणकी करनेवाली होती है समुद्रने यह बात पहलेसे कही है ॥ १४० ॥

तुरगोष्ट्रखरबिडालव्याघ्रच्छागाननाकारम् ।
पृथुलं निम्नं स्फुटितं दुर्गन्धं शस्यते न मुखम् ॥ १४१ ॥

अन्वयार्थौ-(तुरगोष्ट्रखरबिडालव्याघ्रच्छागाननाकारं पृथुलं निम्नं स्फुटितं दुर्गन्धं मुखं न शस्यते) घोडा, ऊंट, गधा, बिलाव, सिंह, बकरा इनके तुल्य होय और चौडा, नीचा, फटासा दुर्गंधवाला मुख निन्दित है ॥ १४१ ॥

अथौष्ठबिम्बम् ।

रेखाखंडितमध्यो मसृणः परिपक्वबिम्बफलतुल्यः ।
अधरोष्ठः स्निग्धोऽसौ मनोहरो हरिणशावदृशाम् ॥ १४२ ॥

अन्वयार्थौ-(रेखाखंडितमध्यः मसृणः परिपक्वबिम्बफलतुल्यः स्निग्धः हरिणशावदृशाम् अधरोष्ठः मनोहरः भवति) रेखा करके खंडित है बीच जिसका चिकना, पकेहुए कुँदरूके फलके तुल्य अच्छे, चिकने, हिरणके बच्चोंकेसे नेत्र जिनके ऐसी अंगनाओंके होठ मनके हरनेवाले होते हैं अर्थात् अच्छे हैं ॥ १४२ ॥

शस्तः सुधानिधानं सततमधरोष्ठपल्लवो व्यक्तः ।
हृदयोत्थसदनुरागच्छटाभिरिव रंजितः स्त्रीणाम् ॥ १४३ ॥

अन्वयार्थौ-(सुधानिधानं व्यक्तः हृदयोत्थसदनुरागच्छटाभिः रंजितः

इव स्त्रीणाम् अधरोष्ठपल्लवः शस्तः) अमृतका स्थान, प्रकट हृदयसे जो उठा है अच्छा अनुराग जिसकी कांतिसे रँगाहुआ ऐसा स्त्रियोंका होठ नवीन पत्तेके तुल्य निरंतर अच्छा होता है ॥ १४३ ॥

विषमोऽलघुः प्रलम्बः प्रस्फुटितः खंडितः कृशो रूक्षः ।
दन्तच्छदोऽङ्गनानां दत्ते दौर्भाग्यदुःखत्वे ॥ १४४ ॥

अन्वयार्थौ–(विषमः अलघुः प्रलम्बः प्रस्फुटितः खंडितः कृशः रूक्षः अंगनानां दन्तच्छदः दुःखदौर्भाग्यं दत्ते) ऊंचा, नीचा, बडा, लंबा, फटा, टूटा हुआ, कटा, पतला, रूखा स्त्रियोंका ऐसा होठ होय तो दुःख और अभाग्यको देता है ॥ १४४ ॥

श्यामेन भर्तृहीना स्थूलेन कलिप्रिया भवति नारी ।
अधरोष्ठेन प्रायो दौर्गत्ययुता विवर्णेन ॥ १४५ ॥

अन्वयार्थौ–(श्यामेन अधरोष्ठेन नारी भर्तृहीना भवति) काले होठोंसे स्त्री पतिहीन होतीहै और (स्थूलेन अधरोष्ठेन नारी कलिप्रिया भवति) मोटे होठों करिके स्त्री कलह करनेवाली होती है और (विवर्णेन अधरोष्ठेन प्रायः दौर्गत्ययुता भवति) बुरे रंगके होठोंसे बहुधा दरिद्रिणी होती है ॥ १४५ ॥

सुदृशामिहोत्तरोष्ठः पर्यायनतः सुकोमलो मसृणः ।
स्निग्धो रोमविरहितः किंचिन्मध्योन्नतः शस्तः ॥ १४६ ॥

अन्वयार्थौ–(इह सुदृशाम् उत्तरोष्ठः पर्यायनतः सकोमलः मसृणः स्निग्धः रोमविरहितः किंचिन्मध्योन्नतः शस्तः) इस लोकमें स्त्रियोंके ऊपरका होठ क्रम करके झुका हुवा, मुलायम, चिकना, बिना रोमका कुछ बीचमें ऊँचाई लिये होय तो अच्छा है ॥ १४६ ॥

भवति पृथुरुत्तरोष्ठः समुन्नतो लोमशो लघुर्यस्याः ।
स्थूलः सा रमणी स्याद्विधवा कलहप्रिया प्रायः ॥१४७॥

अन्वयार्थौ–(यस्याः उत्तरोष्ठः पृथुः समुन्नतः लोमशः लघुः स्थूलः भवति, सा रमणी प्रायः विधवा वा कलहप्रिया स्यात्) जिस स्त्रीका

ऊपरका होठ चौडा मोटा, ऊँचा, रोमवाला, छोटा होय सो बहुधा विधवा वा कलह करनेवाली होतीहै ॥ १४७ ॥

अथ दशनलक्षणम् ।

स्निग्धैः समैः शिखरिभिः समुन्नतैर्विशदकुन्दसमशुभ्रैः ।
दशनैर्घनैस्तरुण्यः सौभाग्यैश्वर्यभोगिन्यः ॥ १४८ ॥

अन्वयार्थौ-(स्निग्धैः समैः शिखरिभिः समुन्नतैः विशदकुंदसमशुभ्रैः घनैः दशनैः तरुण्यः सौभाग्यैश्वर्यभोगिन्यो भवन्ति) चिकने चमकने, बराबर नोंके निकली हा ऊँच हों और उजले कुंदके फलके तुल्य सफेद, एकसे एक भिडे होंय तो ऐसे दाँतसे स्त्रियाँ सौभाग्य वा ऐश्वर्यकी भोगनेवाली होतीहैं ॥ १४८ ॥

शुचिरुचयो द्वात्रिंशद्दशना गोक्षीरसन्निभाः सर्वे ।
अध उपरि समा यस्याः सा क्षितिपतिवल्लभा बाला ॥१४९॥

अन्वयार्थौ-(यस्याः सर्वे दशनाः शुचिरुचयः गोक्षीरसन्निभाः अधः उपरि समाः द्वात्रिंशद् भवंति, सा बाला क्षितिपतिवल्लभा भवति) जिस स्त्रीके सब दांत उजले, रुचिकारी, गौके दूधके तुल्य, नीचे ऊपर बराबर बत्तीस होंय सो स्त्री पृथ्वीपति (राजा) की प्यारी होती है ॥ १४९ ॥

अतिह्रस्वदीर्घसूक्ष्माः स्थूला द्विपङ्क्तयो दशनाः ।
विषमाः शुक्त्याकाराः श्यामास्तन्वन्ति दौर्गत्यम् ॥१५०॥

अन्वयार्थौ-(अतिह्रस्वदीर्घसूक्ष्माः स्थूलाः द्विपंक्तयः विषमाः शुक्त्याकाराः श्यामाः ईदृशाः दशनाः दौर्गत्यं तन्वंति) बहुत छोटे लम्बे पतले मोटे, दुहरा पंक्तिके ऊचे नीचे सीपिके आकार, काल होंय तो ऐसे दाँतोंसे स्त्री दरिद्रिणी वा दुखिया होती है ॥ १५० ॥

नियतं रदैरधस्तादधिकैर्निजमातृभक्षिणी रमणी ।
अथ उपरि पुनर्विरलैः कुटिला विकटैश्च पतिरहिता॥१५१॥

अन्वयार्थों-(अधस्तात् रदैः अधिकैः नियतं रमणी निजमातृभक्षिणी भवति) नीचेके दाँत बहुत होनेसे निश्चय स्त्री अपनी माताकी मारनेवाली होती है और (पुनः अधः उपरि विरलैः रदैः कुटिला भवति) जो नीचे ऊपर जुदे जुदे दाँत होंय तो खोटी होती है और (वा विकटैः रदैः पतिरहिता भवति) जो भयंकर दाँत होंय तो विना पतिकी अर्थात् विधवा होती है ॥ १५१ ॥

सितपीठिकास्थिरदा सक्लेशा दन्तुरा पुनः कुटिला ।
चलितरदा पतिरहिता निरपत्या धनमतिर्युवतिः ॥ १५२ ॥

अन्वयार्थों-(सितपीठिकास्थिरदा नारी सक्लेशा भवति) सफेद मसूढे नीचेके हाडके दाँतसे स्त्री क्लेशसहित रहती है और (पुनः दंतुरा नारी कुटिला भवति) फिर खूब बडे दाँतवाली स्त्री खोटी होती है और (चलितरदा नारी पतिरहिता वा निरपत्या धनमतिर्युवतिः भवति) चलायमान है दाँत जिसके ऐसी स्त्री पति पुत्र रहित और कठोर बुद्धिवाली होती है १५२॥

अथ जिह्वालक्षणम् ।

जिह्वा स्निग्धा मृद्वी शोणा मसृणा तनुर्भवति यस्याः ।
मिष्टान्नभोजना स्यात्सौभाग्ययुता सा सदा रमणी ॥ १५३ ॥

अन्वयार्थों-(यस्याः जिह्वा स्निग्धा मृद्वी शोणा मसृणा तनुर्भवति) जिस स्त्रीकी जीभ अच्छी, मुलायम, लाल, चिकनी, पतली होय (सा रमणी सौभाग्ययुता सदा मिष्टान्नभोजना) स्यात्) सो स्त्री सौभाग्ययुक्त और सदा मीठे भोजनके पानेवाली होती है ॥ १५३ ॥

स्यादन्ते सङ्कीर्णा कुशस्येवाग्रविस्तीर्णा वा ।
श्वेतापि न प्रशस्ता कृष्णा प्रायेण रमणीनाम् ॥ १५४ ॥

अन्वयार्थों-(जिह्वा अंते कुशस्येव संकीर्णा वा अग्रविस्तीर्णा श्वेता कृष्णा जिह्वा प्रायेण रमणीनाम् अपि न प्रशस्ता) जीभ अंतमें सकडी और डाभकी भाँति आगेको चौडी, सफेद और काली जीभ बधाहु स्त्रियोंकी अच्छी नहीं है ॥ १५४ ॥

खरया तोये मरणं प्राप्नोति विवाहमेति पाटलया ।
वर्णच्छेदं कलहं श्यामलया जिह्वया युवती ॥ १५५ ॥

अन्वयार्थौ–(युवती खरया जिह्वया तोये मरणं प्राप्नोति) स्त्री खरदरी जीभकरके पानीमें डूबके मरे और (पाटलया जिह्वया विवाहम् एति) कुछ श्वेत कुछ लाल जीभ करके विवाहको पाती है और (श्यामलया जिह्वया वर्णच्छेदं तथा कलहं प्राप्नोति) काली जीभ करके अपनी जातिसे दूसरी जाति होय और कलहको पाती है ॥ १५५ ॥

दारिद्र्यं मांसलया विशालया रसनया पुनः शोकः ।
अतिलम्बयापि सततमभक्ष्यभक्षणरतिः स्त्रीणाम् ॥ १५६ ॥

अन्वयार्थौ–(मांसलया रसनया दारिद्र्यं पुनः विशालया रसनया शोकं प्राप्नोति) मोटी जीभसे दरिद्रताको पावे और फिर बडी लंबी जीभसे शोकको पाती है और (अतिलंबया अपि सततं स्त्रीणाम् अभक्ष्यभक्षणरतिर्भवति) बहुतलंबी जीभसे निरंतर स्त्रियोंकी जो खाने योग्य वस्तु नहीं उसे खानेमें चाहना अर्थात् प्रीति होती है ॥ १५६ ॥

अथ तालुलक्षणम् ।

स्निग्धं कोकनदच्छवि प्रशस्यते तालु कोमलं विमलम् ।
श्यामं पीनं च पुनः सुदृशां दुःखावहं बहुशः ॥ १५७ ॥

अन्वयार्थौ–(सुदृशां स्निग्धं कोकनदच्छवि कोमलं विमलं तालु प्रशस्यते) स्त्रियोंका सुंदर, चिकना, लाल कमलकीसी कांतिवाला, मुलायम, उज्ज्वल तालु प्रशंसाके योग्य अर्थात् अच्छा है और (पुनः श्यामं पीनं तालु बहुशः दुःखावहम्) फिर वही काला मोटा तालु होय तो बहुत दुःखको करनेवाला है ॥ १५७ ॥

तालुनि सिते दरिद्रा पतिहीना दुःखिता भवति कृष्णे ।
प्रव्रज्यासंयुक्ता रूक्षे समले पुनर्नारी ॥ १५८ ॥

अन्वयार्थौ–(तालुनि सिते सति नारी दरिद्रा) सफेद तालु होनेसे स्त्री दरिद्रिणी और (तालुनि कृष्णे सति पतिहीना दुःखिता भवति) काले

तालु होनेसे पतिरहित दुःखी होती है (पुनः रूक्षे समले सति प्रव्रज्यासंयुक्ता जायते) रूखे मलिन तालु हुए वैरागिणी या पतिसंयोगरहित होती है ॥ १५८ ॥

अथ घण्टीलक्षणम् ।

कन्दस्थूला वृत्ता क्रमशस्तीक्ष्णलोहिता शुभा घण्टी ।
स्थूला सूक्ष्मा लम्बा कृष्णा श्वेता शुभा नैव ॥ १५९ ॥

अन्वयार्थौ-(कन्दस्थूला वृत्ता क्रमशः तीक्ष्णलोहिता घण्टी शुभा) जमीकंदकी भाँति मोटी, गोल क्रमसे पैनी, लाल रंगकी घेंटी शुभ है और (स्थूला सूक्ष्मा लम्बा कृष्णा श्वेता घंटी नैव शुभा) मोटी, पतली लंबी काली, सफेद घेंटी शुभ नहीं है ॥ १५९ ॥

अथ हास्यलक्षणम् ।

ईषद्विकासितगण्डं हसितमलक्ष्यद्विजं कलं शस्तम् ।
प्रान्ते मुहुः सकम्पं संमीलितलोचनं निन्द्यम् ॥ १६० ॥

अन्वयार्थौ-(ईषद्विकसितगंडम् अलक्ष्यद्विजं कलं हसितं शस्तम्) थोडे खुले हैं गंडस्थल जिसमें, नहीं दीखपडें दाँत जिसमें ऐसा सुंदर हँसना अच्छा है और (प्रान्ते मुहुः सकंपं संमीलितलोचनं हसितं निंद्यं भवति) अंतमें बारंबार हाथ पाँव कँपै हिलें जिसमें और मुँदगये हैं नेत्र जिसमें ऐसा हँसना निन्दित अर्थात् बुरा होता है ॥ १६० ॥

अथ नासालक्षणम् ।

निःस्वां द्विधाग्रभागा कर्मकरां नासा स्त्रियं लघ्वी ।
भर्तृविहीनां चिपिटा दीर्घा बहुकोपनां कुरुते ॥ १६१ ॥

अन्वयार्थौ-(द्विधाग्रभागा नासा स्त्रियं निःस्वाम्) दोसी दीखैं हैं नोक आगेके भागमें जिसकी ऐसी नाक स्त्रीको दरिद्रिणी करे और (लघ्वी नासा स्त्रियं कर्मकराम्) छोटी नाक स्त्रीको गुलामिनि करे और (चिपिटा

चीटी नासा स्त्रियं भर्तृविहीनां तथा बहुकोपनां कुरुते) चिपटी लंबी नाक स्त्रीको पतिरहित और बहुत क्रोधवाली करै है ॥ १६१ ॥

अथ क्षुतलक्षणम् ।

दीर्घं दीर्घायुष्कं क्षुतं कृतपिण्डितं ह्लादि ।
अनुनादयुतं शस्तं ततोऽन्यथा भवति विपरीतम् ॥ १६२ ॥

अन्वयार्थौ—(दीर्घं क्षुतं दीर्घायुष्कं कृतपिंडितं ह्लादि) बडी छींक भारी बडी न छोटी गोलाकार हुई ऐसी आनंदकारी है और (अनुनादयुतं क्षुतं शस्तम्) शब्दसहित अथवा पिछला शब्दयुक्त छींक अच्छी है और(ततः अन्यथा विपरीतं भवति)इनसे और लक्षणकी छींक बुरी होतीहै॥१६२॥

अथाक्षियुगलक्षणम् ।

गोक्षीरचारुलसिते रक्तान्ते कृष्णतारके तीक्ष्णे ।
प्रच्छन्नं कथयितुमिव कर्णविलग्ने शुभे नयने ॥ १६३ ॥

अन्वयार्थौ—(गोक्षीरचारुलसिते रक्तान्ते कृष्णतारके तीक्ष्णे शुभे नयने प्रच्छन्नं कथयितुम् इव कर्णविलग्ने भवतः) गौके दूधके समान श्वेत रंग शोभायमान लाल हैं अंत जिनके काले हैं तारे जिनमें गुप्त कहनेको मानों कानके पास आयके लगे हैं ऐसे नेत्र शुभ होते हैं ॥ १६३ ॥

नीलोत्पलदलतुल्यैर्विमलैः सूक्ष्मपक्ष्मभिः स्निग्धैः ।
नयनैरिहार्ककमलैर्भवन्ति सौभाग्यभोगिन्यः ॥ १६४ ॥

अन्वयार्थौ—(नीलोत्पलदलतुल्यैः विमलैः सूक्ष्मपक्ष्मभिः स्निग्धैः अर्क-कमलैः इव नयनैः नार्यः सौभाग्यभोगिन्यो भवंति) नीलकमलकी पँखुरीके तुल्य निर्मल, पतली हैं बरोनी जिनकी अच्छे चिकने, जैसे सूर्यसे कमल खिले हुए ऐसे नेत्रों करिके स्त्री सौभाग्यके भोग करनेवाली होती है ॥ १६४ ॥

मृगनेत्रा शशनेत्रा वराहनेत्रा मयूरनेत्रा च ।
पृथुनेत्राम्बुजनेत्रा निर्मलनेत्रा शुभा नारी ॥ १६५ ॥

अन्वयार्थौ-(मृगनेत्रा शशनेत्रा वराहनेत्रा मयूरनेत्रा पृथुनेत्रा अम्बुजनेत्रा निर्मलनेत्रा नारी शुभा भवति) हरिणकेसे नेत्रवाली, खरगोशकेसे नेत्रवाली, सूकरकेसे नेत्रवाली, मोरकेसे नेत्रवाली बडे लम्बे चौडे नेत्रवाली, कमलकेसे नेत्रवाली और उजले नेत्रवाली स्त्री अच्छी होती है ॥ १६५॥

उद्भ्रान्तचित्ता केकरविषमाक्षी निन्दिताक्षी भवेद्युवतिः ।
मेषाक्षी बिडालाक्षी वृत्ताक्षी समुन्नताक्षी न दीर्घायुः ॥१६६॥

अन्वयार्थौ-(केकरविषमाक्षी निन्दिताक्षी उद्भ्रान्तचित्ता युवतिर्भवेत्) काणी, ऊँचे नीचे, निन्दित नेत्रवाली, उडेसे चित्तवाली होती है और (मेषाक्षी बिडालाक्षी वृत्ताक्षी समुन्नताक्षी नारी दीर्घायुः न) मेंढेकीसी नेत्रवाली, बिलावकीसी नेत्रवाली, गोल नेत्रवाली, ऊंचे नीचे नेत्रवाली स्त्री बडी आयुवाली नहीं होती है ॥ १६६ ॥

यस्याः पिङ्गलनेत्रद्वितयं सा सुरतसुखकौशलं लभते ।
दुःशीलत्वेन समं वैधव्यं वा ध्रुवं रमणी ॥ १६७ ॥

अन्वयार्थौ-(यस्याः पिंगलनेत्रद्वितयं भवति सा रमणी सुरतसुखकौशलं लभते) जिस स्त्रीके पीले रंगकेसे दोनों नेत्र होंय सो स्त्री भोगके सुखको पाती है अथवा (दुःशीलत्वेन समं ध्रुवं वैधव्यं लभते) वह खोटे स्वभावके साथ निश्चयकरके विधवापनको पाती है ॥ १६७ ॥

गोपिङ्गलनेत्रयुता पितरं श्वशुरं च मातुलं च पुत्रम् ।
भ्रातरमप्यधिगच्छति कामग्रथिला च मोहपरा ॥ १६८ ॥

अन्वयार्थौ-(या नारी गोपीङ्गलनेत्रयुता भवति सा कामग्रथिला च पुनः मोहपरा वै पितरं श्वशुरं मातुलं पुत्रं भ्रातरम् अपि अधिगच्छति)

अन्वयार्थौ–जो गौकेसे रंग बराबर पीले नेत्रवाली होय सो स्त्री कामकी अधिकताके कारण और मोहके मदमें तत्पर होनेसे निश्चय पिता, श्वशुर, माता, पुत्र और भाईसे अधिक कामकी चाहना करती है अर्थात् इनसे भोग चाहती है ॥ १६८ ॥

कोकनदच्छदरक्तच्छायं नयनद्वयं भवति यस्याः ।
सा परपुरुषाकांक्षिणी रमणी च नित्यं स्यात् ॥ १६९ ॥

अन्वयार्थौ–(यस्याः कोकनदच्छदरक्तच्छायं नयनद्वयं स्यात्, सा रमणी परपुरुषाकांक्षिणी नित्यं भवति) जिस स्त्रीके लाल कमलकी पँखुरीके रंगके तुल्य दोनों नेत्र होवैं उस स्त्रीको दूसरे पुरुषकी चाहना नित्य होती है ॥ १६९ ॥

जलजनयना न शस्ता स्फारितनयना विहीनतरा ।
नरनयना कोटरनयना चञ्चलनयना गंभीरनयनापि ॥१७०॥

अन्वयार्थौ–(जलजनयना नारी न शस्ता) जलसे भरे नेत्रवाली स्त्री अच्छी नहीं और (स्फारितनयना नारी विहीनतरा) फटेसे नेत्रवाली स्त्री बहुत खोटी होती है और (नरनयना कोटरनयना गंभीरनयना चंचलनयना अपि नारी अशुभा भवति)मनुष्यकेसे नेत्रवाली, चलायमान नेत्रवाली, वृक्ष कोटरके तुल्य नेत्रवाली, गहरे गढेसे नेत्रवाली स्त्री अशुभ होतीहै ॥ १७० ॥

या सव्यकाणचक्षुः सा परपुरुषाभिचारिणी रमणी ।
अपसव्यकाणचक्षुः सा जन्मन्येव निरपत्या ॥ १७१ ॥

अन्वयार्थौ–(या नारी सव्यकाणचक्षुः स्यात्, सा रमणी परपुरुषाभिचारिणी भवति) जो स्त्री बाईं आँखसे काणी होय सो स्त्री दूसरे पुरुषके भोगनेकी चाहसे व्यभिचारिणी होतीहै और(या नारी अपसव्यकाणचक्षुः भवति सा रमणी जन्मन्येव निरपत्या स्यात्) जो स्त्री दाहिनी आँखसे काणी होय सो स्त्री जन्मभर विना संतानके होतीहै अर्थात् बाँझ होतीहै ॥ १७१ ॥

अथ पक्ष्मलक्षणम् ।

सुदृढैः स्निग्धैः कृष्णैः सूक्ष्मैः स्यात्पक्ष्मभिर्घनैः सुभगा ।
सूक्ष्मैर्विरलैः कपिलैः स्थूलैर्निन्द्या ध्रुवमजाभैः ॥ १७२ ॥

अन्वयार्थौ-(सुदृढैः स्निग्धैः कृष्णैः सूक्ष्मैः पक्ष्माभिः नारी सुभगा स्यात्) कडी चिकनी, काली, पतली, बहुत पास लगीहुई बरोंनियोंसे स्त्री अच्छी सुंदर सौभाग्यवती होती है और (सूक्ष्मैः विरलैः कपिलैः स्थूलैः अजाभैः ध्रुवं पक्ष्मभिः नारी निंद्या स्यात्) पतली,जुदी जुदी, पीली, मोटी बकरीकीसी कांतिवाली निश्चय ऐसी बरोनियोंसे स्त्री निन्द्य अयोग्य अर्थात् अशुभ होती है ॥ १७२ ॥

रोदनमनिमेषलक्षणमासामपि पुरुषवत्परिज्ञेयम् ।
ग्रन्थप्रपंचभयतः पुनरिह दिङ्मात्रमपि नोक्तम् ॥ १७३ ॥

अन्वयार्थौ-(रोदनम् अनिमेषलक्षणम् आसाम् अपि पुरुषवत् परिज्ञेयम्) रोना और पलकोंके न लगनेके लक्षण पुरुषकी भाँति इनके भी जानने चाहिये और (पुनः इह ग्रंथप्रपंचभयतः दिङ्मात्रम् अपि न उक्तम्) फिर यहां ग्रन्थके बढनेके भयसे दिशामात्रकेभी लक्षण नहीं कहे ॥ १७३ ॥

अथ भ्रूलक्षणम् ।

शस्ता वृत्ता तन्वी भ्रूयुगली[1] कज्जलच्छाया ।
नयनांभोरुहवलयितरूपा नालं समाश्रयति ॥ १७४ ॥

अन्वयार्थौ-(वृत्ता तन्वी कज्जलच्छाया भ्रूयुगली शस्ता) गोलरूप काली कांतिकी दोनों भौंहैं अच्छी हैं और (नयनांभोरुहवलयितरूपा भ्रूयुगली अलं न समाश्रयति) नेत्रोंके कमलोंको घेरनेवाली दोनों भौंहैं अच्छी नहीं होती है ॥ १७४ ॥

लघुमृदुरोममयी भ्रूरधिज्यधनुरिव शुभा सुदृशाम् ।
कीर्णा पिङ्गलवृत्ता पृथुला खररोमका न शुभा ॥ १७५ ॥

अन्वयार्थौ-(सुदृशां लघुमृदुरोममयी अधिज्यधनुरिव भ्रूः शुभा स्यात्)

१-अस्य नपुंसकत्वेऽपि छन्दोऽपूर्तेः सन्देहात्स्त्रीत्वमुक्तं कविनेति प्रतिभाति ।

स्त्रियोंकी छोटी, नरम रोमवाली और चढीहुई कमानके रूप भौंहें शुभ हैं और (कीर्णा पिंगलवृत्ता पृथुला खररोमशा भ्रूः न शुभा भवति) जुदे जुदे बिखरेसे बालवाली पीले रंगवाली गोल चौडी खरदरे रोमवाली भौंहें नहीं शुभ हैं ॥ १७५ ॥

वित्तविहीनां ह्रस्वा मिलिता स्थूला सदैव दुःशीलाम् ।
वंध्यां सुदीर्घरोमा रमणीं भ्रूवल्लरी कुरुते ॥ १७६ ॥

अन्वयार्थौ-(ह्रस्वा भ्रूवल्लरी रमणीं वित्तविहीनाम्) छोटे भौंहें स्त्रीको धनरहित करें और (मिलिता स्थूला भ्रूवल्लरी रमणीं सदैव दुःशीलाम्) मिलीहुई मोटी भौंहरूप बेलि स्त्रीको सदा खोटे चलनवाली करे और (सुदीर्घरोमा भ्रूवल्लरी रमणीं वंध्यां कुरुते) बडे लंबे रोमवाली भौंह रूपबालि स्त्रीको बांझ करैहै ॥ १७६ ॥

अथ कर्णलक्षणम् ।

लम्बा विपुला कर्णद्वयी मिलिता शुभावर्त्तसंयुक्ता ।
दोलायुगलाविरतिप्रीतिं दंपतिकृते युगपत् ॥ १७७ ॥

अन्वयार्थौ-(कर्णद्वयी लम्बा विपुला मिलिता आवर्तसंयुक्ता शुभा) दोनों कान लंबे बडे मिले हुए चक्र युक्त होंय तौ शुभ हैं और (दोलायुगलाविरतिप्रीतिं दंपतिकृते युगपत् कुरुते) दो झूलोंके चक्ररूपसे स्त्री पुरुषके लिये आपसमें प्रीति करैहै ॥ १७७ ॥

रोमोपगता यस्याः शष्कुलिरहिता च नो शस्ता ।
कुटिला कृशा शिराला नारी सा जायते निन्द्या ॥ १७८ ॥

अन्वयार्थौ-(यस्याः कर्णद्वयी रोमोपगता शष्कुलिरहिता नो शस्ता) जिस स्त्रीके दोनों कानमें रोमयुक्त विना प्यालीके होंय तौ अच्छे नहीं और (कुटिला कृशा शिराला कर्णद्वयी नारी सा निंद्या जायते) टेढे, पतले नसोंवाले दोनों कानोंसे स्त्री बुराईके योग्य होती है ॥ १७८ ॥

इति आचिबुककर्णमन्तः संपूर्णा मंददशी ।

अथ ललाटलक्षणम् ।

निर्लोम शिराविरहितमर्द्धेन्दुसमं ललाटतलम् ।
त्र्यङ्गुलमानमनिम्नं स्त्रीणां सौभाग्यमावहति ॥ १७९ ॥

अन्वयार्थौ–(निर्लोम शिराविरहितम् अर्द्धेन्दुसमं त्र्यङ्गुलमानम् अनिम्नं ललाटतलं स्त्रीणां सौभाग्यम् आवहति) रोमरहित, नसों विना, आधे चन्द्रमाके समान, तीन अंगुल प्रमाण, ऊंचा, ऐसा ललाट स्त्रियोंके सौभाग्यको करता है ॥ १७९ ॥

रेखारहितं व्यक्तं स्वस्तिकसमलंकृतं शुभं भालम् ।
प्रगुणं पट्टमिव स्मरनृपस्य राज्याभिषेकाय ॥ १८० ॥

अन्वयार्थौ–(व्यक्तं रेखारहितं स्वस्तिकसमलंकृतं भालं शुभम्) प्रकट रेखा करके रहित स्वस्तिक (साथिया) करके भूषित ऐसा ललाट शुभ है और (स्मरनृपस्य राज्याभिषेकाय प्रगुणं पट्टम् इव) कामदेव राजाके राज्याभिषेकके अर्थ मानों यह दृढ वस्त्र है ॥ १८० ॥

यस्याः प्रलम्बमलिकं सा तु नारी देवरं निजं हन्ति ।
तदपि शिरारोमयुतं सा भवेत्पांसुला बाला ॥ १८१ ॥

अन्वयार्थौ–(यस्याः अलिकं प्रलम्बं सा नारी निजं देवरं हन्ति) जिस स्त्रीका ललाट लम्बा होय सो स्त्री अपने देवरको मारती है और (तदपि भालं शिरारोमयुतं भवेत् सा बाला पांसुला भवति) जो वही लंबा ललाट नसें और रोमयुक्त होय तो सो स्त्री व्यभिचारिणी होतीहै ॥ १८१ ॥

अथ सीमन्तलक्षणम् ।

सीमन्तो ललनानां ललाटपट्टाश्रितः शुभः सरलः ।
प्रगुणित इवार्द्धचन्द्राकृतिः कृतः पुष्पचापेन ॥ १८२ ॥

अन्वयार्थौ–(ललनानां ललाटपट्टाश्रितः सरलः सीमन्तः शुभः) स्त्रियोंके ललाटपट्टके आश्रित सीधी सीमंत अर्थात् माँग शुभ है और (पुष्पचापेन अर्द्धचन्द्राकृतिः प्रगुणितः कृतः इव) कामदेवने आधे चन्द्रमाके आकार मानों यह दृढ किया है ॥ १८२ ॥

अथ शीर्षलक्षणम् ।

कुञ्जरकुम्भनिभं स्याद्वृत्तं शीर्षं समुन्नतं यस्याः ।
सा भवति भूपपत्नी सौभाग्यैश्वर्यसुखसहिता ॥ १८३ ॥

अन्वयार्थौ-(यस्याः शीर्षं समुन्नतं वृत्तं कुंजरकुंभनिभं स्यात् सा भूपपत्नी सौभाग्यैश्वर्यसुखसहिता भवति) जिस स्त्रीका मस्तक ऊँचाई लिये गोल हाथीके शिरकी तुल्य होय सो राजाकी स्त्री सुख सौभाग्य सब सुहागवती होती है ॥ १८३ ॥

स्थूलेन भवति शिरसा विधवा दीर्घेण बन्धकी युवतिः ।
विषमेण विषमदुःखा दौर्भाग्यवती विशालेन ॥ १८४ ॥

अन्वयार्थौ-(स्थूलेन शिरसा विधवा स्यात्) बडे मोटे मस्तकवाली विधवा होय और (दीर्घेण शिरसा युवतिः बन्धकी भवति) लम्बे चौडे मस्तकसे स्त्री व्यभिचारिणी अर्थात् खोटी होती है और (विषमेण शिरसा विषमदुःखा भवति) ऊँचे नीचे मस्तक करिके अत्यन्त दुःखी होतीहै और (विशालेन शिरसा दौर्भाग्यवती भवति) बहुत बडे मस्तकवाली स्त्री अभागिनी होती है ॥ १८४ ॥

अथ केशलक्षणम् ।

रोलम्बसमच्छायाः सूक्ष्माः समुन्नताः स्निग्धाः ।
केशा एकैकभवा जायन्ते भूपपत्नीनाम् ॥ १८५ ॥

अन्वयार्थौ-(रोलम्बसमच्छायाः सूक्ष्माः समुन्नताः स्निग्धाः एकैकभवाः भूपपत्नीनाम् ईदृशाः केशाः जायन्ते) भौंरेकी समान काले पतले और ऊँचे चमकदार, चिकने सुन्दर इकहरे होय तो राजाकी स्त्रियोंके ऐसे बाल होते हैं ॥ १८५ ॥

आकुञ्चिताग्रभागाः स्निग्धांबुजकालकान्तयः सुभगाः ।
चिकुरा हरन्ति यमुनातरङ्गभङ्गीं वरस्त्रीणाम् ॥ १८६ ॥

अन्वयार्थौ-(आकुंचिताग्रभागाः स्निग्धाम्बुजकालकान्तयः सुभगाः वरस्त्रीणां चिकुराः यमुनातरंगभंगीं हरन्ति) सिकुड रहे हैं आगेके भाग जिनके अर्थात् घुँघरारे ऐसे सचिक्कण कालेकमलके रंग चमकदार, सुंदर (अच्छे स्त्रियोंके ऐसे बाल मानों यमुनाकी तरंगकी रचनाको हरतेहैं १८६

यस्याः प्रस्फुटिताग्राः सूक्ष्माः परुषाः शिरोरुहा लघवः ।
उच्चा विरला जटिला विषमाः सा दुःखिनी युवतिः ॥ १८७ ॥

अन्वयार्थौ-(यस्याः शिरोरुहाः प्रस्फुटिताग्राः सूक्ष्माः परुषाः लघवः उच्चाः विरलाः जटिलाः विषमाः भवंति सा युवतिः दुःखिनी स्यात्) जिस स्त्रीके बाल फटेहुए हैं आगेके भाग जिसके ऐसे और पतले, रूखे, खरदरे, छोटे, ऊँचे, बिखरेहुए, लिपटे, ऊँचे नीचे होंय सो स्त्री दुखिया होती है ॥ १८७ ॥

अतिशयदीर्घस्थूलैर्भर्तृघ्नी कामिनी भवति ।
केशैः कपिलैरमनस्कारस्कंधप्रभवैः पुनर्निन्द्या ॥ १८८ ॥

अन्वयार्थौ-(अतिशयदीर्घस्थूलैः केशैः कामिनी भर्तृघ्नी भवति) बहुत बडे, लम्बे, मोटे बालोंसे स्त्री पतिको मारनेवाली होतीहै और (पुनः कपिलैः अमनस्कारस्कन्धप्रभवैः केशैः नारी निंद्या भवति) फिर भूरे बुरे कंधोंतक छिटके हुए बालोंसे स्त्री बुराईके योग्य अर्थात् बुरी होती है ॥ १८८ ॥

इति श्रीमहत्तमश्रीनृसिंहात्मजदुर्लभराजविरचिते सामुद्रिकतिलके अपरनाम्नि नरस्त्रीलक्षणशास्त्रे संस्थानाधिकारश्चतुर्थः ॥ ४ ॥

अथ व्यञ्जनलक्षणम् ।

व्यञ्जनमथ प्रकृतयो मिश्रकमेतदपि भवति संख्यानम् ।
संक्षेपाल्लक्षणमथ ह्यनुक्रमेणैव वक्ष्यामि ॥ १ ॥

अन्वयार्थौ-(अथ व्यंजनं प्रकृतयः मिश्रकम् एतत् अपि संक्षेपात् लक्षणम् अनुक्रमेण एव संख्यानं वक्ष्यामि) आगे व्यंजन और प्रकृति और मिश्रक इनके संक्षेप लक्षण क्रम करके इसी संख्यासे मैं कहूँगा ॥ १ ॥

जन्मान्तरं व्यंजनमिह शुभाशुभं व्यज्यते ध्रुवं येन ।
तनुमयमहत्त्वगादि व्यंजनमाख्यायते सद्भिः ॥ २ ॥

अन्वयार्थौ-(इह येन जन्मान्तरं शुभाशुभं ध्रुवं व्यज्यते तत् व्यंजनम्) इस ग्रंथमें जिसकरके पहले जन्मका शुभ अशुभ लक्षण निश्चय करके प्रकट किया होय तिसका नाम व्यंजन है और (तनुमयमहत्त्वगादि सद्भिः व्यंजनम् आख्यायते) शरीरसंबंधी बडी चर्म आदिकको पंडित व्यंजन कहते हैं२

अथ मशकलक्षणम् ।

रक्तः कृष्णो धूम्रो बिन्दुसमो मशक एव विज्ञेयः ।
तिलकं तिलकाकारं ततोऽन्यदपि लांछनं स्त्रीणाम् ॥ ३ ॥

अन्वयार्थौ-(रक्तः कृष्णः धूम्रः बिन्दुसमः मशक एव विज्ञेयः) लाल, काली, धूएँकासा बूँद समान होय उसीका नाम मशक जानिये और(तिलकं तिलकाकारं ततः स्त्रीणाम् अन्यदपि लांछनं भवति) तिलके आकार तिल, तिसके पीछे कोई और चिह्न स्त्रियोंके होय उसका नाम लांछन होता है३॥

अन्तर्भ्रूयुग्मे वा ललाटमध्ये विलोक्यते यस्याः ।
सुस्निग्धाभो मशकः सा भवति महीपतेः पत्नी ॥४॥

अन्वयार्थौ-(यस्याः अंतर्भ्रूयुग्मे वा ललाटमध्ये सुस्निग्धाभः मशकः विलोक्यते सा स्त्री महीपतेः पत्नी भवति) जिस स्त्रीकी दोनों भौंहोंके

बीचमें वा ललाटके बीचमें सुंदर मशक देख पडे सो स्त्री राजाकी रानी होतीहै ॥ ४ ॥

अन्तर्वामकपोले स्फुटता मशकेन लोहिता भवति ।
मिष्टान्नभोजनमत्ति प्रायेण सा नितम्बिनी लोके ॥ ५ ॥

अन्वयार्थौ–(या अन्तर्वामकपोले मशकेन स्फुटता लोहिता भवति) जो स्त्री बाँयें कपोलमें प्रकट मसासे लाल होय (सा नितंबिनी लोके प्रायेण मिष्टान्नभोजनम् अत्ति) सो स्त्री लोकमें बहुधा मीठे भोजनको पातीहै॥ ५॥

अथ तिलकलक्षणम् ।

तिलकं लांछनमथवा हृदि रक्ताभं विलोक्यते यस्याः ।
सा धनधान्योपेता पतिप्रिया जायते पत्नी ॥ ६ ॥

अन्वयार्थौ–(यस्याः हृदि रक्ताभं तिलकम् अथवा लांछनं विलोक्यते सा पत्नी धनधान्योपेता पतिप्रिया जायते) जिस स्त्रीके हृदयमें लाल तिल वा और कोइ चिन्ह दीसे सो स्त्री धन धान्यसे युक्त और पतिकी प्यारी होतीहै ॥ ६ ॥

रक्तं तिलकं लांछनमपसव्यपयोधरे भवति यस्याः ।
पुत्रीचतुष्टयं सा सुतत्रयं चाङ्गना सूते ॥ ७ ॥

अन्वयार्थौ–(यस्याः अपसव्यपयोधरे रक्तं तिलकं लांछनं भवति, सा अंगना पुत्रीचतुष्टयं च पुनः सुतत्रयं सूते) जिस स्त्रीके दाहिने कुचमें लाल तिल अथवा कोइ और चिन्ह होय सो स्त्री चार पुत्री और तीन पुत्रको उत्पन्न करैहै ॥ ७ ॥

तिलके शुभवामकुचे विलासवती तदा स्तनालेन ।
स्फुटमेकपुत्रजननी सा विधवा दुःखिनी भवति ॥ ८ ॥

अन्वयार्थौ–(शुभवामकुचे तिलके सति विलासवती स्तनालेन, स्फुटम् एकपुत्रजननी पश्चात् विधवा तथा दुःखिनी भवति) जो सुंदर बायें

कुचमें तिल होय तो अपने नाल करिके प्रकट एक पुत्रकी जननेवाली होके पीछे विधवा और दुखिय होती है ॥ ८ ॥

गुह्यस्य कुंकुमाभस्तिलकः प्रान्तेऽथ दक्षिणे भागे ।
सा भवति भूपपत्नी नृपजननी जायते वापि ॥ ९ ॥

अन्वयार्थौ-(यस्याः गुह्यस्य प्रान्ते अथ दक्षिणे भागे कुंकुमाभः तिलको भवति सा भूपपत्नी वा नृपजननी अपि भवति) जिस स्त्रीकी योनिके पास या दाहिने तिल हो वह राजाकी पत्नी या माता होतीहै॥९॥

मशको लोहितवर्णो नासाग्रे दृश्यते स्फुटो यस्याः ।
सा भूपपट्टराज्ञी राजानं सूयते सूनुम् ॥ १० ॥

अन्वयार्थौ-(यस्या नासाग्रे लोहितवर्णः मशकः स्फुटः दृश्यते सा भूपपट्टराज्ञी वा राजानं सूनुं सूयते) जिस स्त्रीकी नाकके आगेके भागमें लालरंगका तिल वा मस्सा प्रकट दीख पडे सो राजाकी पटरानी वा राजा पुत्रको उत्पन्न करे ॥ १० ॥

विस्फुरति नासिकाग्रे यस्यास्तिलकः सकज्जलच्छायः ।
भर्तृघ्नी सा नारी विशेषतः पांसुला भवति ॥ ११ ॥

अन्वयार्थौ-(यस्याः नासिकाग्रे सकज्जलच्छायः तिलकः विस्फुरति सा नारी भर्तृघ्नी वा विशेषतः पांसुला भवति) जिस स्त्रीकी नाकके आगेके भागमें काला तिल प्रकट होय सो स्त्री पतिको मारे और विशेष करके वह व्यभिचारिणी होती है और खोटी होतीहै ॥ ११ ॥

नाभेरधोविभागे मशको वा तिलकलांछने स्याताम् ।
यस्या भवतः स्निग्धे सा रमणी वहति कल्याणम् ॥ १२ ॥

अन्वयार्थौ-(यस्याः नाभेरधोविभागे मशकः वा तिलकलांछने स्निग्धे भवतः सा रमणी कल्याणं वहति) जिस स्त्रीकी टूंडीके नीचेके भागमें मस्सा अथवा तिलक वा और कोई चिह्न चमकता होय तो सो स्त्री कल्याणको प्राप्त करनेवाली होती है ॥ १२ ॥

स्यातां गुल्फौ यस्याः स्फुटलांछनमशकातिलकसंयुक्तौ ।
सा धनधान्यविहीना दुःखवती जीवति प्रायः ॥ १३ ॥

अन्वयार्थौ-(यस्याः गुल्फौ स्फुटलांछनमशकातिलकसंयुक्तौ स्यातां सा धनधान्यविहीना प्रायः दुःखवती जीवति) जिस स्त्रीके टकनेमें प्रकट चिह्न मस्सा वा तिल युक्त होय सो धनधान्यसे रहित बहुधा दुखिया होकर जीवती है ॥ १३ ॥

वामे हस्ते कण्ठे वा काये जायते ध्रुवं यस्याः ।
मशको यदि वा तिलकः प्राग्गर्भे सा सुतं सूते ॥ १४ ॥

अन्वयार्थौ-(यस्याः काये वामे हस्ते वा कण्ठे मशकः यदि वा तिलकः ध्रुवं जायते, सा प्राक् गर्भे सुतं सूते) जिस स्त्रीके शरीरमें बायें हाथमें वा कंठमें मस्सा वा तिलक निश्चय होय सो स्त्री पहलेही गर्भमें पुत्रको उत्पन्न करती है ॥ १४ ॥

मशकं तिलकं लांछनमुक्तस्थाने कृताशुभं यासाम् ।
अङ्गे पुनरपसव्ये सुदृशां क्लेशावहं बहुशः ॥ १५ ॥

अन्वयार्थौ-(यासां सुदृशाम् उक्तस्थाने मशकं तिलकं लांछनम् अशुभं कृतम्) जिन स्त्रियोंके कहेहुए स्थानोंमें मस्सा तिल और कोई चिह्न होय तो अशुभ है और (पुनः अपसव्ये अङ्गे बहुशः क्लेशावहं भवति) फिर जो दाहिने अंगमें चिह्न न होय तो अतिदुःखके करनेवाले होते हैं ॥ १५ ॥

अथ प्रकृतिलक्षणम् ।

प्रकृतिर्द्विविधा गदिता स्त्रीणां श्लेष्मादिका स्वभावाख्या ।
प्रथमा सापि त्रेधा द्वादशधा भवति पुनरन्या ॥ १६ ॥

अन्वयार्थौ-(स्त्रीणां प्रकृतिर्द्विविधा गदिता श्लेष्मादिका च पुनः स्वभावाख्या, सापि प्रथमा त्रेधा पुनः अन्या द्वादशधा भवति) स्त्रियोंकी प्रकृति दो प्रकारकी कही है श्लेष्मादिक और स्वभाव, सो पहली तीन प्रकारकी है, फिर दूसरी १२ प्रकारकी होती है ॥ १६ ॥

नारीमतेऽस्ति प्रकृतिः सत्यप्रियभाषिणी स्थिरस्नेहा ।
बहुप्रसूतिं लभते नीलोत्पलदूर्वाङ्कुरश्यामा ॥ १७ ॥

अन्वयार्थौ-(नारीमते प्रकृतिः आस्ति, सा नारी स्थिरस्नेहा भवति) के मतमें स्वभाव है सो स्त्री थर स्नेह अर्थात् स्थिरप्रीतिवाली होती है और (सत्यप्रियभाषिणी भावति) सच्ची और मीठा बोलनेवाली होती ह और तथा (नीलोत्पलदूर्वांकुरश्यामा बहुप्रसूतिं लभते) नील कमल और दूबके अंकुरके समान श्यामरंग, बहुत जननेवाली होती है ॥ १७ ॥

स्निग्धनखरोमत्वङ्नारी सुविलोचना क्षमायुक्ता ।
सुविभक्तसमावयवा बहुसत्यापत्यवीर्ययुता ॥ १८ ॥

अन्वयार्थौ-(स्निग्धनखरोमत्वक् सुविलोचना नारी क्षमायुक्ता भवति) चिकने हैं नख, राम और त्वचा जिसके और सुंदर नेत्रोंकरके युक्त ऐसी स्त्री क्षमावाली होती है और (सुविभक्तसमावयवा बहुसत्यापत्यवीर्ययुता भवति) जुदे जुदे हैं बराबर हाथ पाँव आदि अंग जिसके ऐसी स्त्री बहुत सत्य और संतान और पराक्रम युक्त होती है ॥ १८ ॥

अस्थूला सरसा त्वक्प्रसूनतुल्यानुलेपना सुभगा ।
धर्मार्थिनी कृतज्ञा दयान्विता कमलपदा सुमुखी ॥१९॥

अन्वयार्थौ-(मोटी न होय, पतली होय, सूखी खरदरी न होय रसदार होय ऐसी त्वचा फूलकासा है अनुलेपन जिसमें और धर्मसेही है प्रयोजन जिसमें, कहेको माननेवाली और दयावती कमलकेसे हैं पाँव जिसके और सुन्दर है मुख जिसका ऐसी स्त्री अच्छी होती है ॥ १९ ॥

प्रच्छन्नधृतवेषा क्षुत्तृष्णाक्षमात्रपोपेता ।
मितवचना पानभोजनसमया क्ष्मातले पृथुलनयना ॥२०॥

अन्वयार्थौ-(क्ष्मातले पृथुलनयना नारी प्रच्छन्नधृतवेषा, क्षुत्तृष्णाक्षमात्रपोपेता मितवचना पानभोजनसमया स्यात्) पृथ्वीमें बडे नेत्रवाली स्त्री

गुप्त धरे हैं अनेक वेष जिसने, भूख प्यास सहनशीलता और लज्जा इन चारों करिके युक्त, प्रमाणके वचन हैं जिसके, अन्न जल है समय पै जिसके ऐसी होती है ॥ २० ॥

साधारणसुरतेच्छा निद्रालुः शीतमांसलश्रोणिः ।
जलदजलाशयजलजकृतवांछा या भवेत्स्वप्ने ॥ २१ ॥

अन्वयार्थौ–साधारण है सुरतकी इच्छा जिसकी, निद्रावती अर्थात् जिसको निद्रा अधिक होय, ठंढी है मांससे भरी योनि जिसकी और स्वप्नमें (सोनेमें) मेघ और पानीके स्थान और पदार्थ इनमें वांछा करने वाली होती है ॥ २१ ॥

योषित्पित्तप्रकृतिर्गौरी कृष्णाथवा हृष्टा ।
आताम्रा नयनकररुहरसनापाणितलतालुतला ॥ २२ ॥

अन्वयार्थौ–(पित्तप्रकृतिः योषित् गौरी कृष्णा अथवा हृष्टा) पित्तके सुभाववाली स्त्री गोरेरंग वा काली प्रसन्न रहती है और (नयनकररुहरसनापाणितलतालुतला आताम्रा भवति) नेत्र, नख, जीभ, हाथकी हथेली, तालु, पाँवका तलवा ये जिसके लाल होते हैं वह अच्छी है ॥ २२ ॥

क्षणक्षणविकसच्चेष्टाऽभीष्टशीतमधुररसा पुनर्मृद्वी ।
विरलकपिलमूर्द्धजरोमा मेधावती प्रायः ॥ २३ ॥

अन्वयार्थौ–(क्षणक्षणविकसच्चेष्टा) छिनछिनमें खिले आते हैं देहव्यापार जिसके और (अभीष्टशीतमधुररसा) प्यारा है शीत और मीठारस जिसका (पुनर्मृद्वी) फिर मुलायम है शरीर जिसका (प्रायः विरलकपिलमूर्द्धजरोमा मेधावती भवति) बहुधा जुदे जुदे भूरे रंगके बाल और रोम जिसके सो बुद्धिमती होती ह ॥ २३ ॥

प्रियशुचिवसनमाल्या उपनाड्युष्णाशिथिलमृदुगुह्या ।
अभिमानिनी शुचिरता विशदस्मितवल्लभा शूरा ॥ २४ ॥

अन्वयार्थौ–(अस्मिन्श्लोके क्रमान्वयः) प्यारे हैं पवित्र कपडे और माला जिसके फिर कैसी है वह उपनाडी (छोटीनसें) युक्त और गरम है गुदगुदी

ढीली नरम योनि जिसकी गर्भवती और पवित्र बातोंकी चाहनेवाली, निर्मल है हँसना प्यारा जिसका और जो शूरा है वह शुभ है ॥ २४ ॥

धृतवलिपलितक्षुत्तृट् तनुवीर्या मृदुलमोहनक्रीडा ।
किंशु कदिग्दाहतडिद्दहनादीन्पश्यति स्वप्ने ॥ २५ ॥

अन्वयार्थौ–(धारण करी हैं सलवट और छींक, प्यास थोडा है, साहस मुलायम भोग जिसका वह टेसूके फूल और दिशाओंका जलना और बिजली आग आदिको देखती है ॥ २५ ॥

वनिता वातप्रकृतिः स्फुटितकचा भग्नपादतला ।
रूक्षा वै नखदशनाश्चलवृत्ता चञ्चलप्रकृतिः ॥ २६ ॥

अन्वयार्थौ–(स्फुटितकचा भग्नपादतला) फटे टूटे हैं बाल और पाँवके तलवे जिसके और (वै इति निश्चयेन नखदशनाः रूक्षाः) रूखे हैं नख और दाँत जिसके और (चलवृत्ता चंचलप्रकृतिः) चलायमान है आचरण और चंचल स्वभाव जिसका (वातप्रकृतिः वनिता ईदृशी भवति) वातप्रकृतिवाली स्त्री ऐसी होती है ॥ २६ ॥

अजितेन्द्रिया खराङ्गी गन्धर्वविलासहासकलहरतिः ।
बहुभोजनाल्पनिद्रा बहुलालापभ्रमणशीला ॥ २७ ॥

अन्वयार्थौ–(नहीं वशमें हैं इंद्रिय जिसके और खरदरा है अंग जिसका गाने और भोग हँसी कलह करनेमें है प्रीति जिसकी और बहुत भोजन और थोडा सोनेवाली बहुत बोलने और फिरनेका है स्वभाव जिसका॥ २७

धूसरशरीरवर्णा छायाविद्वेषमधुररसा शिशिरा ।
किंचिद्विवृताक्षमुखी सोते विलपति निशि त्रसति ॥ २८ ॥

अन्वयार्थौ–धलके रंगके तुल्य है शरीरका रंग जिसका और छायासे वैर और मीठे रस ठंढकी चाहनेवाली और थोडी खुली हुई आँख और मुख जिसका रातमें सोनेमें रोती डरती हुई विलाप करती है ॥ २८ ॥

बहम्ललवणतिक्तस्निग्धकषायप्रिया सुरतिकठिना ।
गोजिह्वाकर्कशतनुरोमा सुश्रोणिबिम्बयुता ॥ २९ ॥

अन्वयार्थौ–बहुत खट्टा, नमकीन, चरपरा, चिकना, कसैला ऐसे हैं स्वाद प्यारे जिसको और गायकी जीभकासा खरदरा और कडा शरीर अथवा बाल जिसके और कमरके बिम्बयुक्त रतिमें कडी होती है ॥ २९ ॥

उद्यानवनक्रीडारतिरत्युष्णप्रिया स्थिरक्रोधा ।
तरुपर्वताधिरोहं स्वप्ने कुरुते न भोगमनाः ॥ ३० ॥

अन्वयार्थौ–बाग बगीचे और वनमें खेलने वा जानेकी है प्रीति जिसकी और बहुत गरम है प्रिय जिसके और स्थिर क्रोध है जिसका वह वृक्ष और पर्वतोंपर चढनेका स्वप्न देखनेवाली और भोगमें मन नहीं करै है ॥ ३० ॥

प्रायेणैषा प्रकृतिः शुद्धेव विलोक्यते स्फुटं क्वापि ।
भेदाः पुनरेतासां बहवोऽपि भवंति मनुजानाम् ॥ ३१ ॥

अन्वयार्थौ–(प्रायेण एषा प्रकृतिः शुद्धेव स्फुटं क्वापि विलोक्यते) बहुधा करके यह शुद्ध प्रकृति प्रकट कहीं देखी जाती है, और (पुनः मनुजानाम् एतासां भेदाः अपि बहवः भवंति) फिर मनुष्योंकी इन्हीं प्रकृतियोंके बहुतसे भेद होते हैं ॥ ३१ ॥

सुरविद्याधरगन्धर्वयक्षराक्षसपिशाचवानरकपिभिः ।
अहिखरबिडालसिंहैस्तुल्यान्या प्रकृतिरत्रैषा ॥ ३२ ॥

अन्वयार्थौ–सुर, विद्याधर, गंधर्व, यक्ष, राक्षस, पिशाच, वानर, कपि, अहि, खर, बिडाल, सिंह आदि ये सब देवताओंके भेद हैं ऐसी इनकी समान और भी प्रकृति है ॥ ३२ ॥

अल्पाशिनी सुगन्धा समुज्ज्वला चारुमानसा शुद्धा ।
प्रियवसना तनुनिद्रा निर्दिष्टा सा सुरप्रकृतिः ॥ ३३ ॥

अन्वयार्थौ–(अल्पाशिना सुगंधा) थोडा भोजन करनेवाली और अच्छी है गंध जिसमें और (समुज्ज्वला चारुमानसा शुद्धा) निर्मल कान्ति युक्त सुन्दर चित्त शुद्ध स्वभाववाली और (प्रियवसना तनुनिद्रा) प्यारे हैं वस्त्र और थोडी है नींद जिसको (सा नारी सुरप्रकृतिः निर्दिष्टा) सो स्त्री देवताकी प्रकृतिवाली कही है ॥ ३३ ॥

विद्याधरस्वभावा भवति कलागुणविचक्षणा शान्ता ।
चन्द्रानना सुभोगा मनोहरस्थानबद्धरतिः ॥ ३४ ॥

अन्वयार्थौ-(कलागुणविचक्षणा शांता) कला और गुण इनमें चतुर शांन्त है चित्त जिसका और (चन्द्रानना सुभोगा (चन्द्रमाकासा है मुख जिसका, सुंदर भोगवाली (मनोहरस्थानबद्धरतिः सुंदर स्थानमें बांधी है प्रीति जिसने (ईदृशी नारी विद्याधरस्वभावा भवति) ऐसी स्त्री विद्याधर-स्वभाववाली होती है ॥ ३४ ॥

उद्यानवनासक्ता कलस्वरा गीतनृत्यरक्तमनाः ।
परिचितसुगन्धमाल्यागंधर्वप्रकृतिरबला सा ॥ ३५ ॥

अन्वयार्थौ-(उद्यानवनासक्ता) बाग बगीचे और वनमें है चित्त जिसका और (कलस्वरा गीतनृत्यरक्तमनाः) सुंदर है शब्द और गीत और नृत्यमें है मन जिसका (परिचितसुगंधमाल्या) सुगंध और मालासे पहिचान करनेवाली (सा अबला गंधर्वप्रकृतिः ज्ञेया) सो स्त्री गंधर्वस्वभा-ववाली जानिये ॥ ३५ ॥

आरामजलक्रीडारता विभूषणपरायणा कान्ता ।
प्रायो यक्षप्रकृतिर्धनरक्षणकांक्षिणी रमणी ॥ ३६ ॥

अन्वयार्थौ-(आरामजलक्रीडारता) बाग बगीचेकी सैरमें तत्पर (विभूषणपरायणा) भूषण पहरनेमें तत्पर रहै (धनरक्षणकांक्षिणी रमणी) धनकी रक्षा करने और चाहने और भोग करनेवाली (सा कान्ता प्रायः यक्षप्रकृतिर्भवति) सो स्त्री बहुधा यक्षस्वभाववाली होती है ॥ ३६ ॥

बह्वशना क्रुद्धमना हंति पतिं प्राणलग्नमप्युग्रा ।
सा राक्षसस्वभावा कटुकालापा दुराचारा ॥ ३७ ॥

अवन्यार्थौ-(बह्वशना) बहुत खानेवाली (क्रुद्धमनाः) लडनेमें है मन जिसका(प्राणलग्नम् अपि पतिं हंति)प्राणसे लगेभी पतिको मारनेवाली (उग्रा कटुकालापा दुराचारा) भयंकर और कडुवा बोलने और बुरे आचरणवाली (सा नारी राक्षसस्वभावा भवति) सो स्त्री राक्षसी स्वभाववाली होतीहै ३७

शौचाचारभ्रष्टा रूपविहीना भयंकरा सततम् ।
प्रस्वेदमलोपेता भवति पिशाचप्रकृतिरशुभा ॥ ३८ ॥

अन्वयार्थौ-(शौचाचारभ्रष्टा) पवित्र आचरणसे रहित (रूपविहीना) सूरतसे बुरी (सततं भयंकरा) निरंतर डर करनेवाली (प्रस्वेदमलोपेता) पसीना और मलकरिके युक्त (सा नारी अशुभा पिशाचप्रकृतिर्भवति) सो स्त्री अशुभ पिशाचिकी स्वभावकी होती है ॥ ३८ ॥

दानदयानियमरतिः पतिव्रता देवगुरुकृताज्ञा च ।
कार्याकार्यविविक्ता नरस्वभावा भवति नारी ॥ ३९ ॥

अन्वयार्थौ-(दानदयानियमरतिः) दान दया और नियममें है प्रीति जिसकी (पतिव्रता देवगुरुकृताज्ञा च) पतिके मानने और देव, गुरुकी करी है आज्ञा जिसने (कार्याकार्यविविक्ता) भले बुरे कामका विचार करनेवाली (सा नारी नरस्वभावा भवति) सो स्त्री मनुष्य स्वभावकी होती है॥ ३९ ॥

स्थैर्यं क्वापि न कुरुते समस्तदिग्वीक्षणेक्षणासक्ता ।
उत्फालगतिर्लुब्धा दुर्वेषा सा कपिप्रकृतिः ॥ ४० ॥

अन्वयार्थौ-(क्वापि स्थैर्यं न कुरुते) कहीं ठहर न सके (समस्तदिग्वीक्षणेक्षणासक्ता) सब दिशाओंके देखनेमें नेत्रोंको फेरनेवाली (उत्फालगतिः) उछलके चलनेवाली (लुब्धा) लोभवाली (दुर्वेषा) बुरे वेषकी (खोटे रूपवाली) (सा नारी कपिप्रकृतिर्भवति) सो स्त्री बंदरके स्वभाववाली होती है ४०

अन्यच्छिद्रान्वेषणपरायणा कुटिलगामिनी रौद्रा ।
धृतवैरा क्रोधरुचिरहिस्वभावा च वनिता स्यात् ॥ ४१ ॥

अन्वयार्थौ-(अन्यच्छिद्रान्वेषणपरायणा) औरोंके दोष ढूंढनेमें तत्पर (कुटिलगामिनी रौद्रा) टेढी चाल और खोटे भयंकर स्वभाववाली (धृतवैरा) वैरकी करनेवाली (क्रोधरुचिः) क्रोधमें है रुचि (चाह) जिसकी (सा वनिता अहिस्वभावा स्यात्) सो स्त्री सांपके स्वभाववाली होती है ४१ ॥

सहते परां विभूतिं खरमैथुनसेविनी मुसलनादा ।
अन्नेन येन केनचिदुपचितगात्रा खरप्रकृतिः ॥ ४२ ॥

अन्वयार्थौ–(परां विभूतिं सहते) दूसरेके ठाटको सहनेवाली (खरमैथुनसेविनी) बहुत जोरसे भोगके चाहनेवाली अर्थात् गधेकेसे रमनेवाली (मुसलनादा) भयंकर बोलनेवाली (येन केनचित् अन्नेन उपचितगात्रा) किसी अन्नकरके मोटा होगया है शरीर जिसका (सा नारी खरप्रकृतिर्भवति) सो स्त्री गधेके स्वभाववाली होती है ॥ ४२ ॥

छन्नं कुरुते पापं परपीडान्यस्तमानसा सततम् ।
स्त्री सापवादरक्षणपरा बिडालस्वभावा च ॥ ४३ ॥

अन्वयार्थौ–(या स्त्री छन्नं पापं कुरुते) जो स्त्री छिपके पाप करे (या स्त्री सततं परपीडान्यस्तमानसा) जो स्त्री दूसरेके मनको दुःख देनेवाली (या स्त्री अपवादरक्षणपरा) जो स्त्री बुराईके साथ रक्षामें तत्पर (सा स्त्री बिडालस्वभावा भवति) सो स्त्री बिलावके स्वभाववाली होती है ॥४३॥

एकान्तस्थानरतिश्चिरेण मैथुननिषेवणस्था च ।
निद्रालसा गतभया सिंहप्रकृतिर्भवति युवतिः ॥ ४४ ॥

अन्वयार्थौ–(या स्त्री एकान्तस्थानरतिः) जो स्त्री एकान्त स्थानमें रहनेकी इच्छावाली है (या स्त्री चिरेण मैथुन निषेवणस्था) जो स्त्री बहुत भोग करनेवाली(निद्रालसा)नींद और आलसवाली(गतभया)गया है भय जिसका (सा युवतिः सिंहप्रकृतिर्भवति) सो स्त्री सिंहके स्वभाववाली होतीहै४४॥

अथ मिश्रकलक्षणम् ।

या मण्डूककुक्षिर्भवति न्यग्रोधमण्डला युवतिः ।
सा सूते सुतमेकं सोऽपि पुनश्चक्रवर्ती स्यात् ॥ ४५ ॥

अन्वयार्थौ–(या युवतिः मंडूककुक्षी तथा न्यग्रोधमंडला भवति) जो स्त्रीके मेंडककीसी कोख और नीचेसे हलकी ऊपरसे भारी बडवृक्षकासा आकार होय (सा एकं सुतं सूते) सो एक पुत्रको उत्पन्न करती है(पुनः सोऽपि सुतः चक्रवर्ती स्यात्) फिर वही पुत्र चक्रवर्ती राजा होताहै ४५॥

भालस्थले त्रिशूलं विलोक्यते दैवनिर्मितं यस्याः ।
तस्याः स्वामित्वं स्याद्भुवने वनितासहस्राणाम् ॥४६॥

अन्वयार्थौ-(यस्याः भालस्थले देवनिर्मितं त्रिशूलं विलोक्यते) जिस स्त्रीके ललाटमें देवका बनाया हुवा त्रिशूल दीखे तो (तस्याः भुवने सहस्राणां वनितानां स्वामित्वं स्यात्) तिस स्त्रीको लोकमें हजार स्त्रियोंका मालिकपना होता है ॥ ४६ ॥

या हरिणाक्षी हरिणग्रीवा हरिणोदरी हरिणजङ्घा ।
जातापि दासवंशे सा युवतिर्भवति नृपपत्नी ॥ ४७ ॥

अन्वयार्थौ-(या युवतिः हरिणाक्षी, हरिणग्रीवा, हरिणोदरी हरिणजंघा स्यात्) जिस स्त्रीकी हिरणकीसी आँख और हिरणकीसी नाड और हिरणकासा पेट और हिरणकीसी पिंडली होय तो (दासवंशे जातापि सा युवतिः नृपपत्नी भवति) वह टहलनीके भी वंशमें उत्पन्न हुई होय सोभी स्त्री राजाकी रानी होती है ॥ ४७ ॥

मधुपिङ्गाक्षी स्निग्धा श्यामाङ्गी राजहंसगतिनादा ।
अष्टौ जनयति पुत्रान्धनधान्यविवर्धिनी तन्वी ॥ ४८ ॥

अन्वयार्थौ-(मधुपिंगाक्षी) शहदकेसे हैं नेत्र जिसके और (स्निग्धश्यामांगी) चिकना सुंदर है साँवला अंग जिसका और (राजहंसगतिनादा) राजहंसकीसी है चाल और बोल जिसका (ईदृशी तन्वी धनधान्यविवर्द्धिनी) ऐसी स्त्री धन धान्यको बढानेवाली (तथा अष्टौ पुत्रान् जनयति) यह आठ पुत्रोंको उत्पन्न करै है ॥ ४८ ॥

पीवरनितम्बबिम्बा पीवरवक्षोजमण्डला बाला ।
पीवरकपोलपाली सा सौभाग्यान्विता युवतिः ॥ ४९ ॥

अन्वयार्थौ-(या बाला पीवरनितम्बबिम्बा) खूब भरे हुए मोटे फूले हैं कूले जिसके और (पीवरवक्षोजमण्डला) भरे हुए हैं कुचोंके मंडल जिसके और (पीवरकपोलपाली) फूले हुए हैं कपोलोंके हड्डे जिसके (सा युवतिः सौभाग्यान्विता भवति) सो स्त्री सौभाग्ययुक्त अर्थात् सर्व सुहागिनी होती है ॥ ४९ ॥

रक्तातालुनखरसना रक्तोष्ठी रक्तपाणिपादतला ।
रक्तनयनान्तगुह्या धनधान्यसमन्विता वनिता ॥ ५० ॥

अन्वयार्थौ–(रक्तातालुनखरसना रक्तोष्ठी रक्तपाणिपादतला रक्तनयनान्तगुह्या स्यात्) लाल तालु और नख, जीभ, लाल होठ, लाल हाथ, पाँवके तलुवा लाल, नेत्रोंके अंत और योनि जिसकी लाल है (सा वनिता धनधान्यसमन्विता भवति) सो स्त्री धनधान्य युक्त होती है ॥ ५० ॥

पृथुनयना पृथुजघना पृथुवक्षाः पृथुकटिः पृथुश्रोणिः ।
पृथुशीला च पुरंध्री सुपूजिता जायते जगति ॥ ५१ ॥

अन्वयार्थौ–(पृथुनयना पृथुजघना पृथुवक्षाः पृथुकटिः पृथुश्रोणिः पृथुशीला पुरंध्री जगति सुपूजिता जायते) लंबे चौडे नेत्र और लंबा चौडा कूलेका आगा, बडी चौडी छाती, बडी चौडी कमर, बडी चौडी योनि, बडी उदारता दीखे ऐसी स्त्री लोकमें माननीय अर्थात् पूजने योग्य होतीहै॥ ५१॥

मृदुरोमा मृदुगात्री मृदुकोपा मृदुशिरोरुहा रमणी ।
मृदुभाषिणी अगण्यैः पुण्यैरासाद्यते सद्यः ॥ ५२ ॥

अन्वयार्थौ–(मृदुरोमा मृदुगात्री मृदुकोपा मृदुशिरोरुहा मृदुभाषिणी ईदृशी रमणी अगण्यैः पुण्यैः सद्यः आसाद्यते) नरम रोम कोमल शरीर, थोडे कोपवाली, कोमल बाल, मीठे बोलनेवाली ऐसी स्त्री बडे पुण्योंसे शीघ्रही मिलती है ॥ ५२ ॥

जानुयुगं जङ्घाद्वयमपि लगति परस्परेण यस्याः ।
उत्कृष्टकामिनी या सा सौभाग्यान्विता रमणी ॥ ५३ ॥

अन्वयार्थौ–(यस्याः जानुयुगं जंघाद्वयम् अपि परस्परेण लगति या उत्कृष्टकामिनी सा रमणी सौभाग्यान्विता भवति) जिस स्त्रीके दोनों घोटुओंके ऊपरके भाग जानु संज्ञक तथा आपसमें दोनों जंघा लगीहों और जो श्रेष्ठ कामकी चाह करनेवाली है सो स्त्री सौभाग्यवती अर्थात् अच्छे भाग्ययुक्त होती है ॥ ५३ ॥

दीर्घमुखी दीर्घाक्षी दीर्घभुजा दीर्घमूर्द्धजा तन्वी ।
दीर्घाङ्गुलिका प्राप्नोत्यायुर्दीर्घं सुखोपेतम् ॥ ५४ ॥

अन्वयार्थौ-(दीर्घमुखी दीर्घाक्षी दीर्घभुजा दीर्घमूर्द्धजा दीर्घांगुलिका तन्वी सुखोपेतं दीर्घम् आयुः प्राप्नोति) बडा लंबा मुख, बडे लंबे नेत्र, बडी लंबी बाहें, बडे लंबे बाल, बडी लंबी अंगुली हैं जिसकी ऐसी स्त्री सुख करके युक्त बडी आयु पातीहै ॥ ५४ ॥

वृत्तमुखी वृत्तकुचा वृत्तप्रसृतोरुजानुगुल्फयुगा ।
वृत्तग्रीवानाभिर्वृत्तशिरा जायते धन्या ॥ ५५ ॥

अन्वयार्थौ-(वृत्तमुखी वृत्तकुचा वृत्तप्रसृतोरुजानुगुल्फयुगा वृत्तग्रीवानाभिः वृत्तशिरा नारी धन्या जायते) गोल मुख, गोल चूंची, गोल पसरे ऊरु, जानु और दोनों टकने, गोल नाड, टूंडी और गोल मस्तक है जिसका ऐसी स्त्री धन्य अर्थात् अच्छी होतीहै ॥ ५५ ॥

व्यक्ता भवंति रेखा मणिबंधे कण्ठदेशके नूनम् ।
पूर्णास्तिस्रो यस्या नृपस्य सा जायते जाया ॥ ५६ ॥

अन्वयार्थौ-(यस्याः मणिबंधे कंठदेशके व्यक्ताः पूर्णाः तिस्रो रेखाः भवंति-सा नूनं नृपस्य जाया जायते) जिस स्त्रीके पहुँचेमें और कंठमें प्रकट तीन रेखा पूरी होयँ सो निश्चय करके राजाकी रानी होतीहै ॥ ५६ ॥

उत्तप्तस्वर्णरुचिरा तनुत्वचा सकलकोमलावयवा ।
लब्धसमुदायशोभा प्रायः श्रीभाजनं सुदृशी ॥ ५७ ॥

अन्वयार्थौ-(या उत्तप्तस्वर्णरुचिरा तनुत्वचा सकलकोमलावयवा लब्धसमुदायशोभा सा सुदृशी प्रायः श्रीभाजनं भवति) जो स्त्री तपे हुए सोनेके रंग और पतली खाल और संपूर्ण कोमल हैं हाथ, पाँव अंग जिसके और पाई है इकटी शोभा जिसने सो स्त्री बहुधा लक्ष्मीका पात्र अर्थात् भोगनेवाली होती है ॥ ५७ ॥

पद्मिन्यथ हस्तिन्यथ शंखिनी चित्रिणी च भेदेन ।
वनिता चतुष्प्रकारा क्रमेण तल्लक्षणं वयं ब्रूमः ॥ ५८ ॥

अन्वयार्थौ-(वनिता चतुष्प्रकारा भेदेन पद्मिनी हस्तिनी शंखिनी चित्रिणी क्रमेण तल्लक्षणं वयं ब्रूमः) स्त्रियोंके चार प्रकारके भेद हैं पद्मिनी१, हस्तिनी२, शंखिनी३, चित्रिणी४, तिनके क्रमसे लक्षण हम कहतेहैं ॥ ५८ ॥

स्निग्धश्यामलकान्तिस्तिलकुसुमाकारसुभगनासिका यस्याः।
त्रिवलीतरङ्गमध्या वृत्तकुचा स्निग्धकृष्णकचा ॥ ५९ ॥
पद्ममुखी मधुगन्धा पद्मायतलोचना प्रियालापा ।
बिम्बोष्ठी हंसगतिर्धर्मरतिः पद्मिनी भवति ॥ ६० ॥

अन्वयार्थौ-(स्निग्धश्यामलकान्तिः तिलकुसुमाकारसुभगनासिका त्रिवलीतरंगमध्या वृत्तकुचा स्निग्धकृष्णकचा पद्ममुखी मधुगंधा पद्मायतलोचना प्रियालापा बिम्बोष्ठी हंसगतिः धर्मरतिः सा नारी पद्मिनी भवति) सुन्दर चिकना साँवला है रंग जिसका और तिलके फलके आकार सुन्दर है नाक जिसकी, त्रिवलीकी तरंग है बीचमें जिसके गोल हैं कुच जिसके और सुन्दर काले बाल, कमलकासा है मुख जिसका, सुन्दर मीठी है सुगंध जिसमें, कमलकेसे हैं बडे नेत्र जिसके, मीठा बोलनेवाली, कुँदुरूकेसे हैं लाल होठ जिसके, हंसकीसी है चाल जिसकी, धर्ममें है प्रीति जिसकी सो नारी पद्मिनी नामकी होती है ॥ ५९ ॥ ६० ॥

स्थूलदशना सुमध्या गद्गदनादा मदोत्कटा चपला ।
ह्रस्वोरुभुजग्रीवाजङ्घा वादित्रगीतरतिः ॥ ६१ ॥
स्निग्धतररङ्गकेशी पीनोन्नतविपुलवृत्तकुचकलशा ।
मत्तमतङ्गजगमना मदगन्धा हस्तिनी भवति ॥ ६२ ॥

अन्वयार्थौ-(स्थूलदशना) बडे मोटे हैं दाँत जिसके, (सुमध्या) सुन्दर है कमर जिसकी, (गद्गदनादा) गद्गद बोलवाली, (मदोत्कटा चपला) सदा मतवाली, चंचल (ह्रस्वोरुभुजग्रीवाजंघा) छोटे हैं ऊरु और भुजा, गला, जंघा जिसके, (वादित्रगीतरतिः) बाजे और गीतमें है प्रीति जिसकी (स्निग्धतररंगकेशी) सुन्दर रंगकेसे हैं बाल जिसके (पीनोन्नतविपुलवृत्तकुचकलशा) मांसीले ऊंचे और बडे गोल हैं कुचकलश जाके (मत्तमतङ्गजगमना) मतवाले हाथीकीसी है चाल जिसकी, (मदगंधा सा हस्तिनी भवति) मदकीसी सुगंध है जिसमें सो हस्तिनी होतीहै ॥ ६१ ॥ ६२ ॥

विषमकुचा बिसगन्धा दीर्घप्रसृतोरुनासिकानयना ।
तनुकेशी खरचित्ता शंखरदा शंखिनी योषित् ॥ ६३ ॥

अन्वयार्थौ—(विषमकुचा बिसगंधा दीर्घप्रसृतोरुनासिकानयना तनु- केशी खरचित्ता शंखरदा सा योषित् शंखिनी भवति) ऊँचे नीचे हैं कुच जिसके और कमलके तन्तुकीसी है गंध जिसमें, लम्बे हैं हाथके पंजे और ऊरु, नाक, नेत्र जिसके, छोटे और थोडे पतले हैं बाल जिसके, तेज स्वभाव जिसका, शंखकेसे हैं दाँत जिसके ऐसी स्त्री शंखिनी होतीहै॥ ६३॥

तुङ्गपयोधरभारा विचित्रवस्त्रप्रियाचलालापा ।
सुक्षारगन्धनिचिता चित्राक्षी चित्रिणी गदिता ॥ ६४ ॥

अन्वयार्थौ—ऊँचे बडे कुचोंके भारवाली, अनेक प्रकारके जो वस्त्र वह हैं प्रिय जिसको, और चञ्चल है बोल जिसका खारी गंध करके व्याप्त जिसमें, विचित्र हैं आंखें जिसकी, सो स्त्री चित्रिणी कही है ॥ ६४ ॥

कपिलविलोचनलूनां कपिलकचां कपिलरोमराजिचिताम् ।
कपिलावयवां बालां सन्तः शंसन्ति न प्रायः ॥ ६५ ॥

अन्वयार्थौ—भूरे हैं पिलाई लिये नेत्र और बाल जिसके, भूरा है रोम युक्त शरीर जिसका, भूरे हैं हाथ पाँव अंग जिसके, ऐसी स्त्राका पंडित बहुधा प्रशंसा नहीं करते हैं अर्थात् अशुभ है ॥ ६५ ॥

विपुलमुखी विपुलकचा विपुलाक्षी विपुलकर्णपदा ।
विपुलाङ्गुलिका प्रायो भर्तृघ्नी जायते योषित् ॥ ६६ ॥

अन्वयार्थौ—चौडा बडा है मुख जिसका, बडे मोटे हैं बहुत बाल जिसके, बडे चौडे हैं भयंकर नेत्र जाके और बडे चौडे हैं कान और पाँवके पंजे जिसके, बडी हैं अंगुली जिसकी ऐसी स्त्री बहुधा पतिको मार- नेवाली होती है ॥ ६६ ॥

कृष्णाक्षी कृष्णाङ्गी कृष्णनखा कृष्णरोमराजिकचा ।
कृष्णौष्ठतालुरसना सा नियत कृष्णचारित्रा ॥ ६७ ॥

अन्वयार्थौ—काली आंख, काला अंग, काले नख, काले रोम और बाल बहुत जाके, और काले होठ और तालु, जीभ जिसकी सो स्त्री निश्चय करके खोटे चलनेकी होती है ॥ ६७ ॥

लम्बललाटी लम्बग्रीवा लम्बोष्ठनासिका न शुभा ।
लम्बपयोधरबाला लंबस्फिग्लम्बरमणमणिः ॥ ६८ ॥

अन्वयार्थौ—(लम्बललाटी लम्बग्रीवा लम्बोष्ठनासिका न शुभा, तथा लम्बपयोधरबाला लम्बस्फिक् लम्बरमणमणिः ईदृशी बाला न शुभा) लंबा ललाट, लंबी नाड़, लंबे होंठ और नाक ये अच्छे नहीं हैं और लंबे कुच, लंबे कोख, लंबी है योनिमें कली जिसके ऐसी स्त्री अच्छी नहींहै॥ ६८

निःसरति वदनकुहराल्लाला यस्याः सदा शयानायाः ।
स्मेरे किंचिन्नेत्रे सा बाला कथ्यते कुलटा ॥ ६९ ॥

अन्वयार्थौ—(शयानायाः यस्याः वदनकुहरात् लाला सदा निःसरति तथा किंचित् नेत्रे स्मेरे भवतः सा बाला सदा कुलटा कथ्यते) सोतेहुए जिसके मुखसे लार सदा निकले और थोड़े नेत्र जिसके खुले होयँ सो स्त्री व्यभिचारिणी अर्थात् खोटी कही जाती है ॥ ६९ ॥

यदि नाभ्यावर्त्तवले रेखाहीनं पृथूदरं यस्याः ।
दुःखाद्व्याकुलचित्ता सा युवतिर्जायते सततम् ॥ ७० ॥

अन्वयार्थौ—(यस्याः नाभ्यावर्तवले पृथूदरं यदि रेखाहीनं स्यात् सा युवतिः सततं दुःखात् व्याकुलचित्ता जायते) जिस स्त्रीकी टूंडीके चक्रसे ऊपर चौड़ा पेट जो रेखाहीन होय सो स्त्री निरंतर दुःखसे व्याकुल चित्त-वाली होती है ॥ ७० ॥

प्रसभं प्रसरति बाष्पं प्रहसंत्या नेत्रकोणयोर्यस्याः ।
लाला च मुखात्तस्याः कौतस्त्या शीलरक्षा स्यात् ॥७१॥

अन्वयार्थौ—(प्रहसंत्याः यस्याः नेत्रकोणयोः प्रसभं बाष्पं प्रसरति तथा मुखात् लालाऽपि निःसरति तस्याः शीलरक्षा कौतस्त्या स्यात्) हँसते हुए जिसके नेत्रोंके कोनेसे बहुत जोरसे आँसू गिरे और मुखसे लार भी गिरे तिसके शीलकी रक्षा कहांसे होय ? अर्थात् उसका चाल चलन अच्छा नहीं होय ॥ ७१ ॥

युगपद्भवन्ति यस्या दुर्गन्धाः श्वासमूत्रवपुरक्तलवः ।
साक्षादेव कुठारी सा वंशविकर्तिनी वनिता ॥ ७२ ॥

अन्वयार्थौ-(यस्याः श्वासमूत्रवपुरक्तलवः युगपत् दुर्गन्धा भवंति, सा वनिता साक्षात् एव वंशविकर्तिनी कुठारी भवति) जिस स्त्रीके श्वास, मूत्र, शरीर और रज आदि सबमें बुरी बास हो तो वह साक्षात् वंश अर्थात् कुलको काटनेवाली कुल्हाडी होती है ॥ ७२ ॥

यस्याः स्फुटं हसंत्याः कपोलयोः कूपकौ स्याताम् ।
नयने नितांतचपले सा भर्तृघ्नी भवत्यसती ॥ ७३ ॥

अन्वयार्थौ-(हसंत्याः यस्याः कपोलयोः स्फुटं कूपकौ स्याताम् तथा नयने नितांतचपले स्याताम् सा असती भर्तृघ्नी भवति) हँसतेहुए जिसके कपोलोंमें प्रकट गढेले होयँ और जिसके नेत्र चलते वा फडकते होयँ सो स्त्री कुलटा भर्त्ताको मारनेवाली होतीहै ॥ ७३ ॥

यान्त्याः स्वैरं यस्या दैववशात्पटपटायते वसनम् ।
सा सततमेव कलयति रमणी कल्याणवैकल्यम् ॥ ७४ ॥

अन्वयार्थौ-(यांत्याः यस्याः स्वैरं दैववशात् वसनं पटपटायते सा रमणी सततं कल्याणवैकल्यं कलयत्येव) चलतीहुई जिस स्त्रीके आपसे आप दैवयोगसे कपडे फटफट करें सो स्त्री निरंतर कल्याणको बिगाडतीहै ॥ ७४ ॥

सर्वेऽस्थिसंधिबंधा यस्या गमनेन विकटिकायन्ते ।
सुतमपि पतिं चिकीर्षति सा संगतयौवनं युवतिः ॥ ७५ ॥

अन्वयार्थौ-(यस्याः गमनेन सर्वेऽस्थिसंधिबंधाः विकटिकायन्ते सा युवतिः संगतयौवनं सुतमपि पतिं चिकीर्षति) जिस स्त्रीके चलनेमें सब हाडोंके जोड बंध चटकें सो स्त्री तरुण बेटेकोभी पति चाहती है ॥ ७५ ॥

अपराङ्गं रोमयुतं पूर्वाङ्गं रोमविरहितं यस्याः ।
भवति विपरीतमथवा भयंकरा सा पिशाची च ॥ ७६ ॥

अन्वयार्थौ-(यस्याः पूर्वाङ्गं रोमविरहितं तथा अपरांगं रोमयुतम् विपरीतं भवति सा नारी भयंकरा च पुनः पिशाची ज्ञेया) जिस स्त्रीके

ऊपरका आधा अंग रोमयुक्त न होय और नीचेका अंग रोम युक्त होय अथवा इधर होय उधर न होय सो स्त्री डरावनी और पिशाचिनी जानिये॥७६

फल्गुप्रचारशीला निष्कारणदृङ्निरीक्षणप्रगुणा ।
निष्फलबहुलालापा सा नारी दूरतस्त्याज्या ॥ ७७ ॥

अन्वयार्थौ-विना काम घूमनेका स्वभाव जिसका और विना काम आंख चलानेवाली और विना काम व्यर्थ बहुत बात करनेवाली सो स्त्री दूरसेही छोड देने योग्य है ॥ ७७ ॥

अतिह्रस्वमुखा धूर्ता दीर्घमुखा दुःखभागिनी वनिता ।
शुष्कमुखी वक्रमुखी सा सौभाग्यैश्वर्यसुखहीना ॥ ७८ ॥

अन्वयार्थौ-बहुत छोटे मुखवाली स्त्री धोखा देनेवाली होती है और बडे लंबे मुखवाली स्त्री दुःख भोगनेवाली होती है सूखे और टेढे मुखवाली स्त्री सुहागपन तथा धन और सुखसे हीन होती है ॥ ७८ ॥

यस्याः कपिला वृत्ता निरंतरा वपुषि रोमराजिः स्यात् ।
जाता पितृपतिगोत्रे सा भुवि भजते भुजिष्यात्वम् ॥ ७९ ॥

अन्वयार्थौ-(यस्याः वपुषि रोमराजिः निरंतरा कपिला वृत्ता स्यात् पितृपतिगोत्रे जाता भुवि सा भुजिष्यात्वं भजते) जिस स्त्रीके शरीरमें रोमयुक्त पंक्ति बराबर, भूरे रंगकी भौंरी वा चक्रयुक्त होय तो पिताके पतिके कुलमें जो उत्पन्न हुई सो पृथ्वीमें वह टहलनीका काम करती है ॥ ७९ ॥

सततं विस्पष्टमाना खरोच्चकटुकस्वरा स्फुरद्भ्रुकुटिः ।
स्वच्छन्दाचारगतिः सा स्याद्रहिता निरन्तरं लक्ष्म्याः ॥ ८० ॥

अन्वयार्थौ-(सततं विस्पष्टमाना खरोच्चकटुस्वरा स्फुरद्भ्रुकुटिः या स्वच्छन्दाचारगतिः सा निरन्तरं लक्ष्म्या रहिता स्यात्) निरंतरही प्रकट तीक्ष्ण ऊंचा और कडुवा बोल जिसका और भौंह जिसकी फरका करें और अपनी इच्छाके अनुकूल आचारमें चलना जिसका सो स्त्री सदा लक्ष्मी करिके रहित अर्थात् दरिद्रिणी होय ॥ ८० ॥

उत्कण्टकं साङ्गुलिकं पाणितलपादतलद्वयं यस्याः ।
राजान्वयजातापि त्याज्या दूरादपि प्रमदा ॥ ८१ ॥

अन्वयार्थौ-(यस्याः साङ्गुलिकं पाणितलं तथा पादतलद्वयम् उत्कंटकं स्यात्) जिस स्त्रीकी अंगुलियों सहित हाथकी हथेली और पांवके तलुवे दोनों कांटेकी भांति फटे खरदरे होय तो (राजान्वयजातापि) राजाके कुलमेंभी उत्पन्न हुई (सा प्रमदा दूरादपि त्याज्या) वह स्त्री दूरसेही छोड़ देने योग्य है ॥ ८१ ॥

अतिह्रस्वा द्राघिष्ठाऽथवा तनिष्ठाङ्गना स्थविष्ठा वा ।
रूपिण्यपि विश्वस्मिन्सा स्पष्टमनिष्टदा भवति ॥८२॥

अन्वयार्थौ-(या अंगना अतिह्रस्वा द्राघिष्ठा अथवा तनिष्ठा वा स्थविष्ठा भवति-विश्वस्मिन्रूपिणि अपि सा स्पष्टम् अनिष्टदा भवति) जो स्त्री बहुत छोटी, बहुत लम्बी और बहुत पतली वा बहुत मोटी होय तो संसारमें ऐसी रूपवती होय सो प्रकट विघ्नकी देनेवाली होती है ॥ ८२ ॥

पादौ यस्याः स्फुटितौ रोमशचिपिटाङ्गुली गूढनखौ ।
वा कच्छपपृष्ठनखौ सा नारी दुःखदारिद्रताहेतुः ॥ ८३ ॥

अन्वयार्थौ-(यस्याः पादौ स्फुटितौ रोमशचिपिटांगुली गूढनखौ वा कच्छपपृष्ठनखौ स्याताम् सा नारी दुःखदारिद्रताहेतुर्भवति) पांवकी फटी टूटी रोम युक्त चिपटी हैं अंगुली जिसकी और दबे हुए हैं गहरे नख जिसके वा कछुवेकी पीठकेसे नख होंय तो वह स्त्री दुःख और दारिद्रताका कारण होतीहै ॥ ८३ ॥

विकलाङ्गी व्याधियुता शुष्काङ्गी वामना तथा कुब्जा ।
नीचान्वयजा रमणी परिहरणीया सुरूपाऽपि ॥ ८४ ॥

अन्वयार्थौ-(विकलांगी) कुरूपा (व्याधियुता) रोगिणी (शुष्काङ्गी) सूखे अंगवाली (वामना) बौनी (कुब्जा) कुबडी (नीचान्वयजा) नीच कुलमें उत्पन्न हुई (ईदृशी सुरूपाऽपि रमणी परिहरणीया) ऐसी स्त्री सुन्दर रूपवती भी छोडने योग्य है ॥ ८४ ॥

निशि सुप्ता या सततं पिनष्टि दशनान्परस्परं नारी ।
यत्किंचिदपि प्रलपति सा न च शस्ता सुलक्षणाऽपि ॥८५॥

अन्वयार्थौ-(या नारी निशि सुप्ता दशनान् सततं परस्परं पिनष्टि, यत् किंचित् अपि प्रलपति सा नारी सुलक्षणा अपि न शस्ता) जो स्त्री रातमें सोतेहुए निरंतर आपसमें दाँतोंको पीसे और कुछ कुछ बाक उठै सो स्त्री सुलक्षणा अर्थात् अच्छे लक्षणवाली भी अच्छी नहीं है ॥ ८५ ॥

काकमुखी काकाक्षी काकरवा काकजङ्घिका नारी ।
काकगतिश्चेष्टा स्यान्नूनं दारिद्र्यदुःखवती ॥ ८६ ॥

अन्वयार्थौ-कौवेकासा मुख, कौवेकीसी आँख, कौवेकासा बोल, कौवेकीसी जाँघ, कौवेकीसी चाल और चेष्टा जिसकी है ऐसी स्त्री निश्चय करके दारिद्र्य करके दुःखवती होती है ॥ ८६ ॥

सततं कोपाविष्टा स्तब्धाङ्गी चंचला महाबाहुः ।
अतिकृशकरपादयुगा न कदाचन मङ्गला प्रमदा ॥ ८७ ॥

अन्वयार्थौ-निरंतर क्रोधवाली, कडा है अंग जिसका वह और चपल, लंबी भुजावाली बहुत सूखेसे दुबले हैं हाथ पाँव दोनों जिसके-ऐसी स्त्री कभीभी मंगल अर्थात् शुभको करनेवाली नहीं है ॥ ८७ ॥

अङ्गुष्ठेन विरहिता यस्याः करपादाङ्गुलीमिलिताः ।
सा दारिद्र्यवती स्याद्युवतिर्यदि वा न दीर्घायुः ॥ ८८ ॥

अन्वयार्थौ-(यस्याः अंगुष्ठेन विरहिता करपादांगुलीमिलिताः स्युः सा युवतिः दारिद्र्यवती-यदि वा दीर्घायुः न भवति) जिस स्त्रीके अंगूठेके विना हाथ पाँवकी सब अंगुली मिलजाँय सो स्त्री दरिद्रिणी होवे और वह बडी आयुवाली नहीं अर्थात् थोडी आयुकी होती है ॥ ८८ ॥

कपिवक्त्रा कपिनेत्रा कपिनासा कपिकटिर्या च ।
कपिकर्णा रोमशापि प्रतीपकृज्जायते प्रायः ॥ ८९ ॥

अन्वयार्थौ-बंदरकासा मुख, बंदरकेसे नेत्र, बंदरकीसी नाक, बंदरकीसी कमर, बंदरकेसे कान, और बाल होंय जिसके वह स्त्री बहुधा उलटे काम करनेवाली होती है ॥ ८९ ॥

नगविहंगनदीनाम्नी वृक्षलतागुल्मनामिका नारी ।
नक्षत्रग्रहनाम्नी न रज्यते स्वैरिणी पत्या ॥ ९० ॥

अन्वयार्थौ–पर्वत, पक्षी, नदी इनके नाम पर स्त्रीका नाम होय अथवा वृक्ष और वेलिके वा घास फूसके और नक्षत्र और ग्रह नामवाली होय तो (ईदृशी स्वैरिणी नारी पत्या न रज्जते) ऐसी खोटी स्त्री पतिके साथ प्रसन्न नहीं रहती अर्थात् पतिको नहीं चाहती है ॥ ९० ॥

शुक्रसुरासुरनाम्नी पुंनाम्नी गगननामिका नियतम् ।
भीषणनाम्नी रमणी स्वच्छन्दा जायते प्रायः ॥ ९१ ॥

अन्वयार्थौ–इंद्र, देवता, दैत्य इनके नामपर तथा पुरुषके नामकी अथवा आकाशके नामकी वा भयंकर नामकी होय तो (नियतं प्रायः स्वच्छन्दा जायते) निश्चय करिके बहुधा वह वेश्याके तुल्य होजाती है ॥ ९१ ॥

इह भवति मृगीवडवाकारिणीभेदेन कामिनी त्रेधा ।
तासां लक्षणमधुना दिङ्मात्रमनूद्यते क्रमशः ॥ ९२ ॥

अन्वयार्थौ–(इह मृगीवडवाकरिणीभेदेन कामिनी त्रेधा भवति अधुना तासाम् लक्षणं क्रमशः दिङ्मात्रम् अनूद्यते) इस ग्रंथमें हरिणी और घोडी हथिनी इन तीन भेदों करके स्त्रियें तीन प्रकारकी होती हैं और तिनके लक्षण क्रमसे दिशामात्र अर्थात् संक्षेपसे कहे जाते हैं ॥ ९२ ॥

यस्याः षडङ्गुलं स्यादष्टांगुलं वा सरोजमुकुलाभम् ।
नार्या वराङ्गमध्यं निगद्यते सा मृगी युवतिः ॥ ९३ ॥

अन्वयार्थौ–(यस्याः नार्याः षडंगुलं वा अष्टांगुलं सरोजमुकुलाभम् स्यात् सा युवतिः मृगी निगद्यते) जिस स्त्रीका भग छः अंगुलका अथवा आठ अंगुलका गहिरा कमलकी कली सरीका होय सो स्त्री मृगी तथा हरिणी कहाती है ॥ ९३ ॥

पार्वती गिरजादिनामभाक् । २ । हंसी–लक्ष्मणादिनामभाक् अथवा विनतादिनामभाक् । ३ गङ्गा–यमुना–नर्मदेत्यादिनामभाक ।

यस्या नवदशकाङ्गुलमेकादशाङ्गुलं सा वडवा ।
द्वादशत्रिदशाङ्गुलकं यदि करिणी कथिता ॥ ९४ ॥

अन्वयार्थौ-(यस्या वराङ्गं नवांगुलं वैकादशांगुलं स्यात्, सा नारी वडवा भवति यदि वा द्वादशत्रिदशांगुलं तदा करिणी सा कथिता) जिस स्त्रीकी योनि नव, दश, एकादश अंगुलकी हो वह वडवा (घोडी) कहलाती है और जिसकी बारह वा तेरह अंगुलकी योनि हो वह करिणी (हस्तिनी) बोली जाती है ॥ ९४ ॥

प्रायेण मृगीवडवाकरिणीनां जायते सह मृगाद्यैः ।
प्रीतिस्सहजा मनुजैर्यथाक्रमं संप्रयुक्तानाम् ॥ ९५ ॥

अन्वयार्थौ-(यथाक्रमं संप्रयुक्तानां मृगीवडवाकरिणीनां सहजा प्रीतिः प्रायेण मृगाद्यैः मनुजैः सह जायते) जैसे क्रमसे कही जो हैं हरिणी,घोडी, हथिनी, इनकी स्वाभाविक अच्छी प्रीति बहुधा करके मृग, घोडा, हाथी ऐसेही मनुष्योंके साथ होती है अर्थात् जैसेको तैसा मिलनेसे उनकी प्रीति अच्छी होती है ॥ ९५ ॥

कामस्य सततवसतिस्ततो जगति कामिनीति विदिता स्त्री ।
द्वादशवर्षादूर्ध्वं कामो विस्फुरति पुनरधिकः ॥ ९६ ॥

अन्वयार्थौ-(कामस्य सततं वसतिः ततः जगति स्त्री कामिनी इति विदिता द्वादशवर्षाद् ऊर्ध्वं पुनः अधिकः कामः विस्फुरति) स्त्री कामका निरंतर स्थान है-तिससे लोकमें कामिनी इस नामसे प्रसिद्ध है बारह वर्षसे ऊपर फिर अधिक काम जगता है ॥ ९६ ॥

तत्कारणं तु यौवनमनन्तरं सुभ्रुवो भवन्त्येते ।
छेकोक्तिनयनलीलानितम्बबिम्बस्तनोद्भेदाः ॥ ९७ ॥

अन्वयार्थौ-(तत् कारणं तु सुभ्रुवः यौवनम् अनंतरम् एते छेकोक्तिनयनलीलानितम्बबिम्बस्तनोद्भेदाः भवन्ति) तिसका कारण स्त्रीका यौवन है-ताके पीछे स्त्रियोंको हाव भाव नेत्रोंकी अवस्था औरही हो जाती है तथा नितम्बबिम्ब और कुचोंमें औरही भेद हो जाते हैं ॥ ९७ ॥

गर्भाधाने रजसः शुक्राधिक्येन योषितां तनया ।
हीनेन पुनस्तनयो भवति समत्वयोर्युगलम् ॥ ९८ ॥

अन्वयार्थौ—(योषितां गर्भाधाने अधिकेन रजसा हीनेन शुक्रेण तनया भवति तथा अधिकेन शुक्रेण हीनेन रजसा तनयः यदि समत्वयोर्युगलं भवति) स्त्रियोंके गर्भाधानसमयमें रज तो अधिक होय और शुक्र न्यून होय तो पुत्री उत्पन्न होती है और शुक्र अधिक होय रज न्यून होय तो पुत्र उत्पन्न जानिये अथवा शुक्र और रज बराबर होंय तो नपुंसक होता है ९८

नारीणामपि तद्वत्स्नेहः क्षेत्राणि संहतिर्ज्ञेया ।
तेषां यतो विशेषो वितर्कितः कोऽपि नास्माभिः ॥ ९९ ॥

अन्वयार्थौ--(नारीणाम् अपि स्नेहः क्षेत्राणि संहतिः तद्वत् पुरुषवत् ज्ञेया तेषां पुरुषाणां यथा कथितः तद्वत् ज्ञेया, यतः अस्माभिः विशेषः न कोऽपि वितर्कितः) स्त्रियोंका स्नेह और क्षेत्र संहति पुरुषोंकीसी जानिये जैसे पुरुषोंका कहा तैसेही स्त्रियोंका जानिये यहां हमने और विशेष करके नहीं कहा ॥ ९९ ॥

शुभलक्षणाधिरूपाधिकापि विख्यातगोत्रजातापि ।
सौभाग्यभाग्यभागपि न शुभा दुश्चारिणी रमणी ॥ १०० ॥

अन्वयार्थौ—(शुभलक्षणाधिरूपाधिका अपि विख्यातगोत्रजातापि नारी सौभाग्यभाग्यभागपि दुश्चारिणी शुभा न) शुभलक्षणवाली रूपवती, प्रसिद्ध कुलमें उत्पन्न हुई ऐसी नारी सुहागपन और भाग्य इनकी भोगनेवाली भी यदि व्यभिचारिणी होय तो शुभ नहीं है ॥ १०० ॥

वृत्तं च लक्ष्म वृत्तं रूपं वृत्तं समग्रसौभाग्यम् ।
वृत्तं गुणादिकं यत्तद्वृत्तं शस्यते सुदृशाम् ॥ १०१ ॥

अन्वयार्थौ—(सुदृशां वृत्तं च लक्ष्म रूपं वृत्तं समग्रसौभाग्यं वृत्तं यत् गुणाधिकं वृत्तं तत् शस्यते) स्त्रियोंके अच्छे लक्षण, अच्छे रूप, अच्छे समस्त सौभाग्योंमें जो उत्तम गुणादिक हैं. वेही इनमें अच्छे समझे जाते हैं ॥ १०१ ॥

---

१ प्रशस्तमित्यर्थः ' मतिबुद्धिपूजार्थेभ्यः ' इति क्तः ।

अपि दुर्लक्षणलक्ष्मा महार्थता शीलसंयुता जातिः ।
शीलेन विना वनिता न शुभाशुभलक्षणवृत्तापि ॥ १०२ ॥

अन्वयार्थौ-(दुर्लक्षणलक्ष्मा अपि शीलसंयुता जातिः महार्थता तथा शुभाशुभलक्षणवृत्तापि वनिता शीलेन विना न शुभा) खोटे लक्षण करके भी और कुलक्षण करके युक्त भी शीलसंयुक्त जाति बडे अर्थकी करनेवाली होतीहै और शुभाशुभ लक्षण करकेभी स्त्री विना शीलके शुभ नहींहै१०२॥

संत्यपि यत्राकृतयस्तत्र गुणाः सततमेव निवसंति ।
रूपाधिका पुरंध्री वृत्तादिगुणान्विता प्रायः ॥ १०३ ॥

अन्वयार्थौ-(यत्र आकृतयः संति, तत्रैव गुणाः सततं निवसंति तथा वृत्तादिगुणान्विता अपि पुरंध्री प्रायः रूपाधिका शुभा भवति) जहां स्वरूप है तहां निरंतर गुण वसते हैं और (रूपाधिका) बहुत सुन्दर रूपवाली ही बहुधा वृत्तादि गुणयुक्त होती है ॥ १०३ ॥

इति महत्तमसंस्थानाधिकरो द्वितीयः ।

शुभसंस्थानवृतादपि सुदृशां प्रायः प्रशस्यते वर्णः ।
येनैता वर्णिन्यस्तस्मात्तल्लक्षणं वक्ष्ये ॥ १०४ ॥

अन्वयार्थौ-(शुभसंस्थानवृतात् अपि प्रायः सुदृशां वर्णः प्रशस्यते येन एताः वर्णिन्यो भवंति तस्मात् तल्लक्षणम् अहं वक्ष्ये) शुभ आकारसेभी बहुधा स्त्रियोंका रंग प्रशंसाके योग्य है और जिस कारणसे वेही स्त्री उत्तम वर्णनीय होती हैं इस कारण उनके लक्षण मैं आगे कहता हूं ॥ १०४ ॥

पङ्कजकिञ्जल्काभः स्त्रीणां नवतप्तकनकभङ्गनिभः ।
चंपककुसुमसमानः स्निग्धो गौरः शुभो वर्णः ॥ १०५ ॥

अन्वयार्थौ-(पंकजकिञ्जल्काभः नवतप्तकनकभंगनिभः चंपककुसुमसमानः स्निग्धः गौरः स्त्रीणां वर्णः शुभो भवति) कमलके फूलकी केसरकासा रंग, नये तपेहुए सोनेके पत्रके समान सुंदर गोरा रंग स्त्रियोंका शुभ अर्थात् अच्छा होता है ॥ १०५ ॥

नवदूर्वाङ्कुरतुल्यः स्मेरश्यामोऽर्जुनप्रसूनाभः ।
कान्तः श्यामो वर्णः सौभाग्यं सुभ्रुवां तनुते ॥ १०६ ॥

अन्वयार्थौ-(सुभ्रुवां नवदूर्वाङ्कुरतुल्यः वर्णः स्मेरश्यामः अर्जुनप्रसूनाभः कान्तः श्यामः सौभाग्यं तनुते) स्त्रियोंके नये दूबके अंकुरके तुल्य रंग और खिलाहुआ श्याम, अर्जुनवृक्षके फूलके तुल्य सुंदर साँवला रंग सौभाग्यको फैलाता है अर्थात् बढाता है ॥ १०६ ॥

शुद्धोऽपि मध्यमः स्यात्कृष्णः सुस्निग्धगजजलच्छायः ।
वायसतुण्डविडंबी पुनर्जघन्यो घनविरूक्षः ॥ १०७ ॥

अन्वयार्थौ-(शुद्धोऽपि कृष्णः सुस्निग्धगजजलच्छायः वर्णः मध्यमः वायसतुंडविडंबी पुनः घनविरूक्षः जघन्यो भवति) निर्मलभी सांवला रंग सुंदर चिकना, हाथी और जलकीसी कांतिवाला मध्यम है-और कौवेकी चोंचके आकार कडा रूखा रंग जघन्य अर्थात् नीच होता है ॥ १०७ ॥

द्युतिमान् यो हरिबालस्तमिस्रानिभो नीलो भवेद्विवर्णः ।
श्यामासंनिभवर्णो लावण्यगुणाधिकं स्त्रीणाम् ॥ १०८ ॥

अन्वयार्थौ-(यः द्युतिमान् हरिबालः तमिस्रानिभः नीलः वर्णः विवर्णः भवेत् श्यामसन्निभवर्णः स्त्रीणां लावण्यगुणाधिकं तनुते) जो चमकदार सिंहके बालके वा अंधेरी रातकासा नीला रंग बेरंग होता है और जो श्यामा चिडियाके तुल्य रंग है सो स्त्रियोंकी शोभा और गुणोंकी अधिकताको फैलाता अर्थात् बढाता है ॥ १०८ ॥

प्रव्रजितापि प्रायो न पाण्डुराका स्याच्छुभाचारा ।
कपिलातिगौरवर्णा न शस्यते मिश्रवर्णापि ॥ १०९ ॥

अन्वयार्थौ-(पाण्डुराका शुभाचारा न स्यात्,प्रायः प्रव्रजितापि स्यात्, कपिलातिगौरवर्णा मिश्रवर्णापि न शस्यते) सफेद चाँदनीकेसे रंगवाली अच्छे चलनवाली नहीं होती है, बहुधा वह वैरागिणी होजाती है और कबरे चित्र विचित्र बहुत गोरे रंगके मिलेहुए रंगवाली स्त्री अच्छी नहीं होती है१०९॥

अथ गन्धलक्षणम् ।

वरवर्णिन्यपि न शुभा गतगन्धा कर्णिकारकलिकेव ।
तस्या गन्धास्तद्वत्तल्लक्षणं ब्रूमहे तस्मात् ॥ ११० ॥

अन्वयार्थौ–(गतगंधा कर्णिकारकलिका इव वरवर्णिन्यपि न शुभा तस्मात् तस्याः गन्धान् तल्लक्षणं वयं ब्रूमहे) गई है गंध जिसकी अर्थात् विना सुगंध कनेरकीसी कली जैसी ऐसे उजले रंगवाली भी स्त्री शुभ नहीं है तिस कारणसे तिसका गन्ध और लक्षण हम कहते हैं ॥ ११० ॥

जातीचंपकविचिकिल्लशतपत्रीबकुलकेतकीतुल्यः ।
स्वेदः श्वासादिभवः प्रशस्यते योषितां गन्धः ॥ १११ ॥

अन्वयार्थौ–(जातीचंपकविचिकिलशतपत्रीबकुलकेतकीतुल्यः योषितां स्वेदः श्वासादिभवः गंधः प्रशस्यते) चमेली, चंपा, विचिकल, सेवती, मौलशिरी और केतकीके फूलके तुल्य (इनकी भाँति) स्त्रियोंके पसीने और श्वासमें सुगंध होय सो प्रशंसाके योग्य है ॥ १११ ॥

गन्धः सर्वाङ्गीणो मृगनाभिसन्निभो भवति यस्याः ।
सा योषिदग्रमहिषी विहीनरूपापि भूमिपतेः॥ ११२ ॥

अन्वयार्थौ–(यस्याः सर्वाङ्गीणः गंधःमृगनाभीसन्निभो भवति, विहीनरूपापि सा योषित् भूमिपतेः अग्रमहिषी स्यात्) जिस स्त्रीके सब अंगकी गंध कस्तूरीकीसी होय वह कुरूपाभी स्त्री राजाकीमुख्य पटरानी होतीहै११२

ऋतुमत्या अपि यस्या विलसति गंधस्तिलप्रसूनाभः ।
सुरभिद्रव्यसमानः सा सुभगत्वान्विता वनिता ॥११३॥

अन्वयार्थौ–(ऋतुमत्या अपि यस्याः सुरभिद्रव्यसमानः गंधः तिलप्रसूनाभः विलसति, सा वनिता सुभगत्वान्विता भवति) रजोधर्म युक्तस्त्रीकी कोई भी सुगंधित पदार्थके तुल्य गंध वा तिलके फलके तुल्य होय सो स्त्री सुंदर सुहागवती होती है ॥ ११३ ॥

तुंबीकुसुमसुगन्धा कटुगन्धा या रसोनगन्धा या ।
सा न कदाचन गर्भं सुदुर्भगा कामिनी धत्ते ॥ ११४ ॥

अन्वयार्थौ–(या नारी तुंबीकुसुमसुगंधा वा कटुगंधा वा या रसोनगंधा भवेत् सा कामिनी सुदुर्भगा कदाचन गर्भं न धत्ते) जो स्त्री तूँबीके फूल-

कीसी गंधवाली अथवा कडवी गंधवाली वा लहसुनकीसी गंधवाली होय सो स्त्री कुलक्षणी कभी गर्भको धारण न करे अर्थात् वह गर्भवती न होय ११४

या हरितालीगन्धाः मिश्रवसामांसपूतिसमगन्धाः ।
अत्युग्रदुष्टगन्धाः सुभगा न सुरूपवत्योऽपि ॥ ११५ ॥

अन्वयार्थौ-(याः नार्यः हरितालीगन्धाः वा मिश्रवसामांसपूतिसमगंधाः वा अत्युग्रदुष्टगंधाः ताः सुरूपवत्योऽपि सुभगाः न) जो स्त्री हरितालकीसी गंधवाली वा हाथीकी चर्बी और दुर्गन्धित मांसके समान गंध वा बहुत बुरी सैंठसी गंध जिनके होय वे स्त्री स्वरूपवती भी सौभाग्यवती नहीं होतीहै ११५.

अथ आवर्तलक्षणम् ।

आवर्तो नारीणां प्रदक्षिणो पाणिपल्लवे व्यक्तः ।
धर्मधनधान्यकारी न जातु शस्तः पुनर्वामः ॥ ११६ ॥

अन्वयार्थौ-(नारीणां पाणिपल्लवे प्रदक्षिणः व्यक्तः आवर्तः धर्मधनधान्यकारी भवेत्-पुनः वामः जातु न शस्तः) स्त्रियोंकी दाहिनी हथेलीमें प्रकट चक्र वा भौंरी होय तो वह धर्म, धन, धान्यकी करनेवाली होय और फिर सोही चक्र वा भौंरी बाई हथेलीमें होय तो वह कभी अच्छी नहीं है११६

नाभ्यां श्रुतियुगले वा दक्षिणवलिताः शुभास्त्वगावर्ताः ।
चूडावर्तोऽपि पुनः प्रशस्यते दक्षिणः शिरसि ॥११७॥

अन्वयार्थौ-(नाभ्यां वा श्रुतियुगले त्वगावर्ताः दक्षिणवलिताः शुभाः पुनः शिरसि दक्षिणः चूडावर्तः अपि प्रशस्यते) टूंडीमें वा दोनों कानोंमें चक्र वा भौंरी दाहिनी ओर झुकी हुई शुभ होती है फिर शिरमें दाहिनी ओर झुका हुवा चक्र वा भौंरी प्रशंसाके योग्य है ॥ ११७ ॥

दक्षिणभागे स्त्रीणामावर्तो भवति पृष्ठवंशस्य ।
सौभाग्यकरः सुव्यक्तो वामविभागे पुनर्न शुभः ॥११८॥

अन्वयार्थौ-(स्त्रीणां पृष्ठवंशस्य दक्षिणभागे सुव्यक्तः यदि आवर्त्तः सौभाग्यकरो भवति पुनः वामविभागे न शुभः) स्त्रियोंके शरीरके दाहिने

भागमें जो प्रकट भौंरी होय तौ सौभाग्यकी करनेवाली होतीहै और फिर वोही भौंरी बाईं ओरके भागमें होय तो अच्छी नहीं है ॥ ११८ ॥

अन्तःपृष्ठं यस्या नाभिसमो भवति दक्षिणावर्तः ।
चिरजीविन्यास्तस्या बहून्यपत्यानि जायन्ते ॥ ११९ ॥

अन्वयार्थौ-(यस्याः अंतःपृष्ठं नाभिसमो दक्षिणावर्तो भवति, चिरजीविन्याः तस्याः बहून्यपत्यानि जायन्ते) जिस स्त्रीकी पीठके मध्यमें जो टूँडीकी भाँति दाहिनी ओर भौंरी होय तो बहुत जीवनेवाली होय और उस स्त्रीके बहुत लडका लडकी होते हैं ॥ ११९ ॥

शकटाभो भगमूले यस्याः स्निग्धः प्रदक्षिणावर्तः ।
सा भवति नृपपत्नी पुत्रवती सुरभसौभाग्या ॥ १२० ॥

अन्वयार्थौ-(यस्याः भगमूले शकटाभः स्निग्धः प्रदक्षिणावर्तः भवति, सा सुरभसौभाग्या पुत्रवती भूपपत्नी भवति) जिस स्त्रीकी योनीके बीच मूलमें छकडेके समान चिकनी सुंदर दाहिनी ओर भौंरी होय सो प्रसिद्ध है सुहागपन जिसका सो पुत्रवती अर्थात् पुत्रवाली राजाकी स्त्री होतीहै१२०

आवर्तः कटिमध्ये यस्याः संभवति गुह्यमध्ये च ।
पत्युरपत्यानामपि विपातनं वितनुते सापि ॥ १२१ ॥

अन्वयार्थौ-(यस्याः कटिमध्ये च पुनः गुह्यमध्ये आवर्तः संभवति, सा स्त्री तथा अपत्यानां विपातनं वितनुते) जिस स्त्रीकी कमरके और योनिके बीचमें भौंरी दाहिनी ओर होय सो स्त्री पतिका और पुत्रपुत्रियोंका नाश करे है ॥ १२१ ॥

पृष्ठावर्तद्वितयं यस्याः सुव्यक्तमुदरवेधेन ।
सा हत्वा भर्तारं दुःशीला जायते प्रायः ॥ १२२ ॥

अन्वयार्थौ-(यस्याः उदरवेधेन सुव्यक्तं पृष्ठावर्तद्वितयं भवति सा नारी भर्तारं हत्वा प्रायः दुःशीला जायते) जिस स्त्रीके उदरपर प्रकट और पीठ पर भौंरी दो होयँ सो स्त्री पतिको मारके बहुधा खानगी (कसबी) अर्थात् व्यभिचारणी होती है ॥ १२२ ॥

दक्षिणवलितः स्त्रीणामावर्तः कण्ठकन्दले व्यक्तः ।
वैधव्यदुःखदौर्भाग्यदायको न हि प्रशस्यः स्यात् ॥१२३॥

अन्वयार्थौ-(स्त्रीणाम् आवर्तः दक्षिणवलितः कण्ठकंदले व्यक्तो भवति सा वैधव्यदुःखदौर्भाग्यदायकः न प्रशस्यः स्यात्) स्त्रियोंकी भौंरी दाहिनी ओर झुकी हुई कंठदेशमें प्रकट होय तो विधवापन और दुःख और बुरे भाग्यके देनेवाली है, प्रशंसाके योग्य नहीं है ॥ १२३ ॥

सीमन्तपथप्रान्ते ललाटमध्ये च जायते यस्याः ।
आवर्तः सुव्यक्तः सा दुःशीलाऽथ वा विधवा ॥ १२४ ॥

अन्वयार्थौ-(यस्याः सीमन्तपथप्रान्ते ललाटमध्ये आवर्तः सुव्यक्तः जायते, सा नारी दुःशीला अथवा विधवा भवेत्) जिस स्त्रीकी माँगके अंतमें सन्मुख ललाटमें भौंरी प्रकट होय सो स्त्री खोटे चलनकी वा विधवा होय १२४

मध्ये कृकाटिकाया वक्रावर्तः प्रदक्षिणो यस्याः ।
वर्षेणैकेन पतिं हत्वा सान्यं समाश्रयते ॥ १२४ ॥

अन्वयार्थौ-(यस्याः कृकाटिकायाः मध्ये प्रदक्षिणः वक्रावर्तः स्यात् सा नारी एकेन वर्षेण पतिं हत्वा अन्यं समाश्रयते) जिस स्त्रीकी घेंटीके बीचमें दाहिनी ओर झुकीहुई टेढी भौंरी होय सो स्त्री एकही वर्षमें पतिको मारके दूसरेका आसरा पकडे अर्थात् औरके पास जाय ॥ १२५ ॥

एको द्वौ वा मस्तकमध्ये यस्याः प्रदक्षिणो नियतम् ।
सा हन्ति पतिं पापा दशदिवसाभ्यन्तरेणैव ॥ १२६ ॥

अन्वयार्थौ-(यस्याः मस्तकमध्ये एकः वा द्वौ नियतं प्रदक्षिणावर्तौ स्याताम् सा पापा स्त्री दशदिवसाभ्यन्तरेणैव पतिं हन्ति) जिस स्त्रीके मस्तकके बीचमें एक वा दो निश्चय करके दाहिनी ओर भौंरी होय सो पापिनी स्त्री दश दिनके भीतर पतिको मारती है ॥ १२६ ॥

कट्यावर्ता कुटिला नाभ्यावर्ता पतिव्रता सततम् ।
पृष्ठावर्ता निन्द्या भर्तृघ्नी जायते योषित् ॥ १२७ ॥

अन्वयार्थौ-(या नारी कट्यावर्ता सा कुटिला, या नारी नाभ्यावर्ता सततं पतिव्रता, या योषित् पृष्ठावर्ता सा निन्द्या वा भर्तृघ्नी जायते)

अन्वयार्थौ–जो स्त्रीकी कमरमें भौंरी होय सो स्त्री खोटे चलनकी होय और जिस स्त्रीकी टूँडीमें भौंरी होय सो निरंतर पतिव्रता और जिस स्त्रीकी पीठमें भौंरी होय सो स्त्री बुरी वा पतिके मारनेवाली होती है ॥ १२७ ॥

अथ सत्त्वलक्षणम् ।

आपद्यपि संपद्यपि मुक्तमना दुःखमनोत्सुकेयम् ।
अपगतविषादहर्षा हतशोकोत्साहनिःसत्त्वा ॥ १२८ ॥

अन्वयार्थौ–(इयम् आपदि अपि मुक्तमना तथा संपदि अपि दुःखमनोत्सुका अपगतविषादहर्षा च पुनः हतशोकोत्साहनिःसत्त्वा) आपत्तिमें छोडा है मन जिसने और संपत्तिमें दुःखयुक्त मनकी अभिलाषा करनेवाली और गया है दुःख और हर्ष जिसका और नष्ट होगया है शोक और उत्साह जिसका ऐसी स्त्री पराक्रम रहित जानिये ॥ १२८ ॥

सत्त्वोपेता प्रायः सदया सत्या स्थिरा गभीरा च ।
कौटिल्यशल्यरहिताहितकल्याणा भवति नारी ॥ १२९ ॥

अन्वयार्थौ–(प्रायः सत्त्वोपेता नारी सदया सत्या स्थिरा गभीरा कौटिल्यशल्यरहिता आहितकल्याणा भवति) बहुधा शक्तियुक्त स्त्री दयासहित सच्ची स्थिर गंभीर कुटिलता और विना खटकवाली कल्याण करनेवाली होती है ॥ १२९ ॥

अथ स्वरलक्षणम् ।

नारीणामनुनादः शुभस्वरः कामलाकलामन्दः ।
श्रुतिपथगतापि नियतं जगतोऽपि मनः समादत्ते ॥ १३० ॥

अन्वयार्थौ–(नारीणाम् अनुवादः शुभस्वरः कामलाकलामन्दो भवति नियतं श्रुतिपथगता सती अपि जगतः मनः समादत्ते) स्त्रियोंका बोल और अच्छा स्वर कामकी कलाओंमें थोडा होताहै--और ऐसे शुभ बोल युक्त स्त्री निश्चय कर शास्त्रके मार्गमें चलनेवाली हो तिससे जगत्के मनको पकडती है अर्थात् ग्रहण करती है ॥ १३० ॥

वीणावेणुनिनादाः कोकिलहंसस्वराः पयोदरवाः ।
केकिध्वनयो भुवने भवंति ललना नृपतिपत्न्यः ॥ १३१ ॥

अन्वयार्थौ–वीणा और वंशीकासा है बोल जिसका और कोकिल और हँसकासा है स्वर जिसका और मेघकासा और मोरकासा है बोल जिसका ऐसी स्त्री लोकमें राजाकी रानी होती है ॥ १३१ ॥

गतकौटिल्यमदीनं स्निग्धं दाक्षिण्यपुण्यमकठोरम् ।
सकलजनसांत्वनकरं भाषितमिह योषितां शस्तम् ॥ १३२ ॥

अन्वयार्थौ–(इह योषितां शस्तं भाषितं गतकौटिल्यम् अदीनं स्निग्धं दाक्षिण्यपुण्यम् अकठोरं सकलजनसांत्वनकरं भवति) इस लोकमें स्त्रियोंका अच्छा बोल चाल कुटिलता और दीनतारहित सुंदर मीठा चतुरता, पवित्रता, मुलायम, सब मनुष्योंको आनंदका करनेवाला होताहै ॥ १३२ ॥

नारी विभिन्नकांस्यक्रोष्टुखरोलूककाककङ्करवा ।
दुःखबहुशोकशङ्कावैधव्यव्याधिभाग्भवति ॥ १३३ ॥

अन्वयार्थौ–(विभिन्नकांस्यक्रोष्टुखरोलूककाककंकरवा नारी दुःखबहुशोकशंकावैधव्यव्याधिभाक् भवति) फूटी कांसी, गीदड, गधा, उल्लू, कउवा, कंक (पक्षीविशेष)इनकासा बोल होय तो ऐसी स्त्री दुःख और बहुत शोकशंका और विधवापन रोगव्यथा इनको भोगनेवाली होती है १३३॥

विस्फुटितश्च श्रोतुः स्वस्त्ययनकरः शुभस्वरो मधुरः ।
संक्रांताधरपल्लवसुधारसच्छद इव स्त्रीणाम् ॥ १३४ ॥

अन्वयार्थौ–(स्त्रीणां विस्फुटितः संक्रांताधरपल्लवसुधारसच्छद इव मधुरः शुभस्वरः श्रोतुः स्वस्त्ययनकरो भवति) स्त्रियोंका प्रकट लगाहुवा होठोंसे सुधारसकी पत्रकी भांति मीठा अच्छा बोल सुननेवालेका कल्याण करनेवाला होताहै ॥ १३४ ॥

अथ गतिलक्षणम् ।

मत्तसंनिभेन पदा मत्तमतङ्गहंसगतितुल्या ।
सुभगा गतिः सुललिता विलसति वसुधेशपत्नानाम् ॥१३५॥

अन्वयार्थौ–(वसुधेशपत्नीनां मत्तसंन्निभेन पदा मत्तमतंगहंसगति तुल्या सुललिता सुभगा गतिर्विलसति) राजाओंकी रानीकी,

मतवाले मनुष्यके पाँवकीसी-और मतवाले हाथी और हंसकीसी चालकी भांति अच्छी सुंदर चाल होती है ॥ १३५ ॥

गोवृषभनकुलमृगपतिमयूरमार्जारगामिनी नियतम्।
सौभाग्यैश्वर्ययुता भाग्यवती भोगिनी भवति ॥ १३६ ॥

अन्वयार्थौ–गाय, बैल,नौला, सिंह,मोर बिल्ली, इनकीसी चालवाली स्त्री निश्चय करके सुहागपन और ऐश्वर्ययुक्त भाग्यवती भोगनेवाली होतीहै१३६

मण्डूकघूकवृकबकजंबूकशुभकोष्ट्रसरटकपिगतयः।
दौर्गत्यदुःखसहिता जायन्ते युवतयः प्रायः ॥ १३७ ॥

अन्वयार्थौ–मेंडक, ऊल्लू, भेडिया, बगुला, गीदुवा-अच्छा गीदड, करकेटा, बंदर, इनकीसी चालवाली (प्रायः दौर्गत्यदुःखसहिता युवतयः जायन्ते) बहुधा बुरी गति और दुःखसहनेवाली स्त्रियां होती हैं ॥ १३७॥

ह्रस्वप्लुतानुविद्धा लसत्पदाभ्यन्तराबला बाह्या।
स्तब्धा मंदा विषमा लघुक्रमा शोभना न गतिः ॥ १३८ ॥

अन्वयार्थौ–(कुछ ऊपरको उछलके जो गति होय और शोभायमान पाँव भीतर बाहर जिस चालमें होयँ और रुकरुकके थोडी कमती बढती चाल और हल्के पडें पाँव जिसमें (ईदृशी गतिः शोभना न) ऐसी चाल अच्छी नहीं होती है ॥ १३८ ॥

निःस्वा विलम्बितगतिर्विषमा न सा योषित्।
दासी कुरङ्गगमना कुलटा द्रुतगामिनी भवति ॥ १३९ ॥

अन्वयार्थौ–(विलंबितगतिः निःस्वा भवति विषमगतिः सा योषित् विषमा न कुरंगगमना गतिः दासी, द्रुतगामिनी कुलटा भवति) धीरे चलनेवाली स्त्री दरिद्रिणी होती है और कमती बढती चालवाली ऐसी स्त्री तीक्ष्ण नहीं होती है और हिरणकीसी चालवाली स्त्री दासी होतीहै और शीघ्र चलनेवाली स्त्री खोटी व्यभिचारिणी होती है ॥ १३९ ॥

अथ छायालक्षणम्।

छादयति लक्षणानि स्त्रीणामग्रे तदुच्यते छाया।
लावण्यं सौभाग्यं तां लक्षणवेदिनो ब्रुवते ॥ १४० ॥

अन्वयार्थौ-(स्त्रीणां लक्षणानि छाया छादयति तत् अग्रे उच्यते, च पुनः लक्षणवेदिनः सौभाग्यलावण्यं तां ब्रुवते) स्त्रियोंके लक्षणोंको जो छाया है सो ढक देती है तिसको आगे कहते हैं और लक्षणके जाननेवाले जो हैं सो इन लक्षणोंको सुंदर सौभाग्य शोभा कहते हैं ॥ १४० ॥

वस्त्वतिरिक्तं किञ्चन महाकवीनां यथा गिरा स्फुरति ।
अङ्गे दृक्षा तद्वन्मनोहरा लवणिमा छाया ॥ १४१ ॥

अन्वयार्थौ-(किंचन वस्त्वतिरिक्तं महाकवीनां यथा गिरा स्फुरति तद्वत् स्त्रीणाम् अंगे छाया दृक्षा लवणिमा मनोहरा भवति) कुछ वस्तुओंके सिवाय बडे कवीश्वरोंकी जैसे वाणी फुरैहै तैसेही स्त्रियोंके अंगमें कांति चतुरता नमकीनी शोभा मनकी हरनेवाली होती है ॥ १४१ ॥

सौभाग्यं छायैव प्रमुखा निखिलेषु लक्ष्मसु स्त्रीणाम् ।
यदभावे भुवि वनिता पांचालीवन्न भोगार्हा ॥ १४२ ॥

अन्वयार्थौ-(निखिलेषु लक्ष्मसु स्त्रीणां छाया एव प्रमुखा सौभाग्यम्) संपूर्ण चिह्नों वा लक्षणोंमें स्त्रियोंकी छाया जो है सोई मुख्य सौभाग्यकी करने-वाली है और (भुवि यदभावे वनिता पांचालीवत् भोगार्हा न भवति) लोकमें बिना छायाके स्त्री व्यभिचारिणीकी भांति भोगनेके योग्य नहीं होती है१४२

चित्तचमत्कृतिजननी हृदि संतापं तनोति जगतोपि ।
या दृष्टापि स्पष्टं सा छाया शस्यते सुदृशाम् ॥१४३॥

अन्वयार्थौ-(चित्तचमत्कृतिजननी या स्पष्टं दृष्टा सती अपि जगतोपि हृदि संतापं तनोति सा सुदृशाम् ईदृशी छाया प्रशस्यते) चित्तको प्रसन्न करनेवाली और जो स्पष्ट देखनेपरभी जगत्के हृदयको संताप करे सो स्त्रियोंकी छाया प्रशंसाके योग्य है ॥ १४३ ॥

यस्याः सर्वाङ्गीणा विराजते हंत लवणिमा छाया ।
चित्रमिदं सा जगति माधुर्यं समधिकं दधते ॥१४४॥

अन्वयार्थौ-(यस्याः सर्वांगीणा लवणिमा छाया हंत विराजते सा छाया जगति माधुर्यं दधते इदं समधिकं चित्रम्) जिन स्त्रियोंके सब अंगकी अच्छी छाया आनंदकी देनेवाली शोभायमान है सोई छाया जगत्में मीठे-पनको धारण करती है, यह बहुत बडा अचरज है ॥१४४॥

यदि सौभाग्यच्छायालङ्करणा ध्रुवं विलसति बाला ।
रूपेण लक्षणैर्वा प्रयोजनं जगति किं तस्याः ॥१४५॥

अन्वयार्थौ-(यदि बाला सौभाग्यच्छायालंकरणा ध्रुवं विलसति, तस्याः रूपेण वा लक्षणैः जगतः किं प्रयोजनम्) जिस स्त्रीकी छायाही भूषण करके निश्चय शोभायमान है तिस स्त्रीका रूप और लक्षण करके जगत्में क्या प्रयोजन है ॥ १४५ ॥

रूपाकारविहीने शुभलक्षणविरहिते नियतमङ्गे ।
सौभाग्यमस्ति यस्याः सा ललना दुर्लभा भुवने॥१४६॥

अन्वयार्थौ-(यस्याः अंगे रूपाकारविहीने तथा शुभलक्षणविरहिते सति सौभाग्यम् अस्ति, इह भुवने सा ललना नियतं दुर्लभा भवति) जिस स्त्रीका अंग, रूप आकार और शुभ लक्षण रहित होते हुए भी सौभाग्य है ऐसी स्त्री निश्चय करके इस लोकमें दुर्लभ होती है ॥ १४६ ॥

यदि लावण्यच्छायाछन्नं शुभलक्ष्मरूपमङ्गं स्यात् ।
तद्द्वयसंयोगेन शृतदुग्धे शर्कराक्षेपः ॥ १४७ ॥

अन्वयार्थौ- जो शोभायुक्त छायायुत और शुभ लक्षणरूप अंग होय तो उन दोनोंके संयोग करके जैसे औटाये दूधमें मिश्रीका डालदेना तैसेही जानिये ॥ १४७ ॥

यत्रोक्तं पूर्वस्मिन्नौचित्यं तन्नरेपि तारावत् ।
यद्यस्मिन्नपि पुनः सकलं तन्नरवदभ्यूह्यम् ॥ १४८ ॥

अन्वयार्थौ-(यत्र पूर्वस्मिन् नरे उक्तम् तत् पुनः तारावत् न औचित्यं यदि अस्मिन् पुनः न उक्तं तत् सकलं नरवत् अभ्यूह्यम्) जैसे कि पहले नरप्रकरणमें जो कहा सो फिर कहना तारोंकी भाँति उचित नहीं है और जो इस नारी प्रकरणमें फिर नहीं कहा सोई वह सब नर प्रकरणकी भाँति जानना चाहिये ॥ १४८ ॥

सामुद्रिकतिलकाख्यं पुरुषस्त्रीलक्षणं प्रपंचभयात् ।
दिङ्मात्रमत्र गदितं सापि समुद्रोक्तिरपि नान्या ॥ १४९ ॥

अन्वयार्थौ-(पुरुषस्त्रीलक्षणं प्रपंचभयात् सामुद्रिकतिलकाख्यम् अत्र यत् दिङ्मात्र गदितम् सा समुद्रोक्तिः अपि अन्या न) पुरुष और स्त्रीके

लक्षणोंवाली सामुद्रिककी टीका बढजानेके भयसे यह दिशामात्र ही कहा है सो भी समुद्रकाही कहा हुआ है अर्थात् किसी दूसरेका नहीं है १४९॥

इति श्रीमहत्तमश्रीनृसिंहात्मजदुर्लभराजविरचिते सामुद्रिकतिलकाख्येऽपर नाम्नि पुरुषस्त्रीलक्षणे वर्णाद्यधिकारश्चतुर्थः ॥ ४ ॥

अथ कविवृत्तान्तकथनम् ।

अत्रास्ति कोऽपि वंशः प्राग्वाटाख्यस्त्रिलोकविख्यातः ।
नृपसंपदि वृद्धौ वा चालम्बनयष्टिरभवद्यः ॥ १ ॥

अन्वयार्थौ-(अत्र कः अपि त्रिलोकविख्यातः प्राग्वाटाख्यो वंशः अस्ति यः नृपसंपदि वा वृद्धौ आलंबनयष्टिः अभवत्) इन तीनों भुवनोंमें प्रसिद्ध है नाम जिसका ऐसा कोई एक प्राग्वाटाख्य वंश है-और जो वंश राजाकी संपत्ति वा समृद्धिमें सहारेकी लाठी हुआ ॥ १ ॥

आसीत्तत्र विचित्रश्रीमद्वाहिल्लसंज्ञया ज्ञातः ।
व्ययकरणपदामात्यो नृपतेः श्रीभामदेवस्य ॥ २ ॥

अन्वयार्थौ-(तत्र विचित्रश्रीमद्वाहिल्लसंज्ञया ज्ञातः श्रीभामदेवस्य नृपतेः व्ययकरणपदामात्यः आसीत्) तहां चित्र विचित्र लक्ष्मी करके वाहिल्ल संज्ञासे जानाजाय जो सो श्रीभामदेव राजाका व्ययकरण नाम मंत्री होताभया ॥ २ ॥

समजनि तदङ्गजन्मा प्रथितः श्रीराजपाल इति नाम्ना ।
प्रतिपक्षद्विपसिंहः श्रीनृसिंहः सुतस्तस्य ॥ ३ ॥
श्रीमान् दुर्लभराजस्तदपत्यं बुद्धिधाम सुकविरभूत् ।
यं श्रीकुमारपालो महत्तमं क्षितिपतिं कृतवान् ॥ ४ ॥

अन्वयार्थौ-(तदङ्गजन्मा श्रीराजपालः इति नाम्ना प्रथितः प्रतिपक्षद्विपसिंहः श्रीनृसिंहः तस्य सुतः समजनि, श्रीमान् बुद्धिधाम सुकविः दुर्लभराजः तदपत्यम् अभूत्, श्रीकुमारपालः महत्तमं यं क्षितिपतिं कृतवान्) तिसके अंगसे है जन्म जिसका सो श्रीराजपाल नाम करके प्रसिद्ध है, सो शत्रुरूप हस्तियोंको सिंहके तुल्य श्रीनृसिंह तिसका पुत्र उत्पन्न हुवा, सो

लक्ष्मीवान् और बुद्धिका घर अच्छा कवि दुर्लभराज नामसे होता भया और श्रीकुमारपाल बडा है तप जिसका तिसको राजा करता भया ॥ ३॥४॥

प्रक्षालयितुं मलमिव वाणी मज्जति चतुर्विधाम्बुधिषु ।
यस्य विलासवती गजतुरंगशकुनिप्रबंधेषु ॥ ५ ॥
तेनोपज्ञातमिदं पुरुषस्त्रीलक्षणं तदनु कविता ।
तस्यैव सुतेन जगद्देवेन समर्थयांचक्रे ॥ ६ ॥

अन्वयार्थौः-(गजतुरंगशकुनिप्रबन्धेषु चतुर्विधाम्बुधिषु मलं प्रक्षालयितुम् इव यस्य विलासवती वाणी मज्जति, तस्यैव सुतेन तेनैव जगद्देवेन इदं पुरुषस्त्रीलक्षणम् उपज्ञात तदनु कविता उपज्ञाता इव समर्थयांचक्रे) हाथी, घोडे, शकुनि इनके जो प्रबंध कहिये शास्त्रोंमें चारों दिशाके जो समुद्रकी भाँति मलके धोनेको जिसकी चमत्कारी वाणी गोता मारती है तिसीके पुत्र जगद्देवने यह पुरुष स्त्रीके हैं लक्षण जिसमें आद्य ज्ञान वर्णन किया तिसके पीछे कविता वर्णन करके इसको आर्या छंदमें बनाया॥५॥६॥

अहमपि परेपि कवयस्तथापि महदन्तरं परिज्ञेयम् ।
ऐक्यं रलयोरिति यदि तत्किं कलभायते करभः ॥ ७॥
सुललितपदा सुवर्णा सालंकारा सुदुर्लभा सार्था ।
एकाप्यर्थसुरम्या किं पुनरष्टौ शतं चैताः ॥ ८ ॥

अन्वयार्थौ-(अहम् अपि परेपि कवयः संति, तथापि-महदन्तरं परिज्ञेयम् यदि रलयोः ऐक्यम् इति तत् किं करभः कलभायते सुललितपदा सुवर्णा सालंकारा सार्था अर्थसुरम्या एकापि आर्या सुदुर्लभा अष्टौ शतम् एताः किं पुनः वक्तव्यम्) मैं भी कवि हूं और भी कवि हैं तौभी बडा अन्तर समझना चाहिये, क्योंकि जो रकार और लकारकी एकता है तो क्या करभ (ऊंट) कलभ (हाथी) होजायगा । सुन्दर है पद जिसमें और सुंदर ही हैं अक्षर जिसमें और अलङ्कार सहित है अर्थ जिसमें ऐसी अर्थ करके सुन्दर आर्या एकभी बनाना कठिन है और जो वे आठसौ ऐसे अर्थ सहित होंय तौ फिर क्या कहना है ॥ ७ ॥ ८ ॥

परहृदयाभिप्रायं परगदितार्थस्य वेत्ति यः सत्त्वम् ।
सत्त्वं भुवने दुर्लभसम्भूतिः सुकविरेवैकः ॥ ९ ॥
नृस्त्रीलक्षणपुष्पां स्रजमेतां सुरभिवर्णगुणगुंफाम् ।
मृगराजसभाविख्याता अपि सन्तः कुरुत कण्ठस्थाम् १०॥

अन्वयार्थौ–(यः परगदितार्थस्य हृदयाभिप्रायं वेत्ति, स सत्त्वम् तथा भुवने सत्त्वं दुर्लभम् एकः सुकविः एवः सम्भूतिः हे मृगराजसभाविख्याताः सन्तः अपि पुरुषा एतां नृस्त्रीलक्षणपुष्पां सुरभिवर्णगुणगुंफां स्रजं कण्ठस्थां कुरुत) जो दूसरेके कहे हुए प्रयोजनको जानिलेय सोई सत्त्व है-और लोकमें सत्त्व ही दुर्लभ है-और एक सुन्दर कवि है यही सम्भूति है हे सिंहसभाके विख्यात पंडितो इस पुरुष स्त्रीके लक्षणरूप हैं पुष्प जिसमें और सुगन्धित रंगवाले इन गुणों करके गुँथी हुई मालाको कण्ठमें स्थित करो॥९॥१०॥

इति सामुद्रिकशास्त्रे कविवृत्तान्तकथनम् ।

सामुद्रिकभाषेयं राधाकृष्णेन निर्मिता रम्या ॥
लब्ध्वा साहाय्यं वै विदुषो घनश्यामनाम्नश्च ॥ १ ॥
गिरिवेदनवक्ष्माभिः प्रमिते संवत्सरे सुपौषे च ॥
मेचकपक्षे रुचिरे दुर्गातिथियुतरवेर्वारे ॥ २ ॥
अर्गलपुरवरनगरे कालिन्दीरसंस्थिते रम्ये ॥
नृस्त्रीलक्षणशास्त्रं पूर्णं जातं हि लोकेऽस्मिन् ॥ ३ ॥
समाप्तोयं ग्रन्थः ॥

पुस्तक मिलनेका ठिकाना–

गङ्गाविष्णु श्रीकृष्णदास, "लक्ष्मीवेङ्कटेश्वर" स्टीम् प्रेस, कल्याण–मुंबई.

खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" स्टीम् प्रेस, खेतवाडी–मुंबई.